# चालुक्यराजअय्यणवंशचरितकाव्यम्

दिनेश कुमार अवस्थी

# चालुक्यराजअय्यणवंशचरितकाव्यम्

दिनेश चन्द्र अवस्थी

साहित्य संस्थान
लोनी, गाजियाबाद

ISBN : 81-89482-05-X



**प्रकाशक** : **आकाश पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स**
ई-10/663, उत्तरांचल कालोनी (निकट संगम सिनेमा)
लोनी बॉर्डर, लोनी, गाजियाबाद-201102
दूरभाष : 0120-2603892

**मूल्य** : रु. 225.00

**संस्करण** : 2005

**शब्दांकन** : उमेश लेज़र प्रिंट्स, दिल्ली-32

**आवरण** : उमेश शर्मा

**मुद्रक** : रुचिका प्रिंटर्स, दिल्ली-110032
(दूरभाष : 22821174, 20013119)

## समर्पण

स्व पितृपाद पद्मेषु सर्वविज्ञ वरेषु वै।
समर्पितो सुबन्धोऽयं दिनेशचन्द्रावस्थिना॥

राष्ट्रपति का प्रेस सचिव
Press Secretary to the President

सत्यमेव जयते

राष्ट्रपति सचिवालय
राष्ट्रपति भवन
नई दिल्ली-110004
President's Secretariat
Rashtrapati Bhavan
New Delhi - 110004



## MESSAGE

It gives me pleasure to know that the research work of Manuscript of ***"Chalukya Raj Ayyan Vansh Charit Kavyasya Sasandarbh Sampadnam"*** by Dr. Dinesh Chander Awasthi, is being published by the Sanskrit Sahitya Sansthan. It is indeed an arduous work which has been accomplished meticulously.

I convey my best wishes and warm greetings on the occasion.

4.3.05

(S.M. KHAN)

New Delhi
4th March, 2005

## अनुक्रम

# प्राक्कथनम्

शोधकार्यं सम्पाद्य विधावारिध्युपाधेः प्राप्तुमीहा मम मनसि चिरकालात् समुत्सुकेन परिवृतासीत्। परमकारुणिकानां विद्यार्णवपारङ्गतानां पण्डितधौरेयाणां गुरुवाराणां प्रोफेसरश्रीकैलासपति-त्रिपाठिमहाभागनां निःसीमप्रेम्णा तेषामेव निर्देशने शोधकार्यं सम्पाद्य प्रस्तूयते शोधप्रबन्धः। अस्य शोधकार्यस्य सम्पादने तेषामाशीर्वदिरेवाहं पारमगच्छम् अत्र गुरूणां नानाविधसाहायैः कृतकार्षोऽहं न जाने कथमहमाचार्यर्णैरुन्मुक्तो भविष्यामि।

श्रौतास्मार्ताचारैःपूतहृदयाः मे प्राप्तकैवल्याः पितरः पण्डित-प्रवराः श्रीमन्तः रामलोटनाभिधा अवस्थिमहाभागा एव मे विद्यागुरुवोऽपि, तैरेव संस्कृतभाषायाः गन्धो मयाऽवाप्तो मात्रा श्रीमत्या श्यामादेव्या नित्यं विद्याध्ययनाय प्रोत्साहितोऽतस्तेषां कृते कृतज्ञताज्ञापनं कथं स्यादुचितमिति पित्रोश्चरणेषु शोधपुष्पं समर्पयामि।

आचार्यपरीक्षां समुत्तीर्णोऽहं सततं ज्येष्ठभ्रातृणां प्रेरणाभिः प्रेरितो काश्यामागत्य गुरुवराणां प्रोफेसर पण्डितश्रीकैलासपतित्रिपाठिमहाभागनां चरणेषु शोधकार्यं प्रारभे स्म। अतोऽस्य शोधकार्यस्य सम्पादने विद्यास्नातामग्रजवराणां पण्डितश्रीमहेशचन्द्र-नामाङ्कितानामवस्थिमहाभागनां प्रेरणा एव गौरवमावहन्ति।

गार्हस्थं नानाविधबाधाबहुलं सदपि, अत्रास्मिन् कार्ये मे साहाय्यं मे सहधर्मन्या श्रीमत्या उमया यथानामैव कृतम्, अतोऽहं तस्याः सहाय्यं बहु मन्ये।

मे पितुर्वरिष्ठाः शिष्याः जनताइण्टरकॉलेज मुनि बुलंदशहरस्थाः प्राक् प्राचार्याः स्वर्गीयाः पण्डितश्रेष्ठाः श्री के. एल. शास्त्रिणोऽपि शोधकार्याय मे प्रेरका आसन्। अतस्तान् प्रति कृतज्ञतां विज्ञापयामि।

साहित्यव्याकरणन्यायाचार्यः में पितुर्वरिष्ठाः शिष्याः स्वर्गस्थाः पण्डितश्रीरामजी-लालशर्माणो मे गुरवः येषामाशीर्वदिरेवाहं कृतकार्योऽतस्तान् प्रति बहुमानं कृतज्ञतां ज्ञापयामि।

एस.एम.जे.ई.सी. इंटरकॉलेज खुर्जास्थौ समादरणीयः डॉ. सुधीरगोविलमहोदयस्तथा भूतपूर्वप्राचार्यश्रीप्रेमनारायणगुप्तमहाभागश्चोभौ प्रति साभारं कृतज्ञोऽस्मि याभ्यां सस्नेहं शोधकार्यसम्पादनायानुमतिर्मे प्रदत्ता।

एस. एम. जे. ई. सी. इण्टरकॉलेज खुर्जास्थान् प्राचार्यप्रवरान् श्रीमतः नेतरामशर्मणः

प्रति कृतज्ञतां निवेदयामि, यै र्मे शोधकार्यसम्पादने प्रत्यक्षाप्रत्यक्षरूपेणं साहाय्यं कृतम्।

मे पितुः शिष्यप्रवराः श्रीमन्तः आचार्यरामकिशोरशर्माणो मे साहित्यशास्त्रगुरवस्तान् प्रत्यहं कृतज्ञतां विज्ञापयामि।

श्रीमन्तो बहोरीलालशर्माणः साहित्यशास्त्रपारङ्गताः मे पितुःशिप्यास्तेषां प्रेरणाः से बहुहितकरास्तान् प्रति कृतज्ञोऽहम्।

मे सखाः पण्डितश्रीनरेशचन्द्रद्विवेदिमहाभागस्तस्यास्मिन् शोधकार्ये साहाय्यं बहुमूल्यम विस्मरणीयन्येति तत् सततमहं बहु ज्ञास्यामि।

अत्रास्मिन् विधावारिध्युपाधये शोधकार्यस्य सम्पादने ये के महानुभावाः प्रत्यक्षाप्रत्यक्षरूपेण सहायका मेऽभवन् तान् सर्वान् प्रति साभारं कृतज्ञतां प्रकटीकरोमि।

कार्यालयपण्डितपदभाजः श्रीरामेश्वरशर्माणोऽपि पंजीकरणादिकार्यसम्पादनपूर्वकं शोधसम्बद्धपाण्डुलिप्योरन्येषान्च ग्रन्थानां प्रदानेन मे साहाय्यं कृतवन्तः अतस्तान् प्रति साभारं कृतज्ञातां विज्ञापयामि।

शोधार्थिनां सहायय्ये सततं कृतयत्नाः अनुसन्धानसहायकपदभाजः पण्डितश्रीदिवाकरदीक्षितमहाभागा अपि यथाकालमावश्यकीनिर्देशान् प्रदाय शोधकार्ये साहाय्यं कृतवन्तः, अतस्तान् प्रत्यपि कृतज्ञोऽस्मि।

गुरुणां कृपया चैतद् गणपतेरनुकम्पया।
प्रबन्धः पूर्णतां यातः पूर्णो यत्नं विधातु मे॥

**दिनेश चन्द्र अवस्थी**

# भूमिका

ईशामीशं गणेशं हि पितरौ ज्ञानदं गुरुम्।
शारदाङ्कमहं याचे क्रीडायै ज्ञानमण्डपे॥

## अनुसन्धानकार्येप्रवृत्ति–

गुरुचरणकमलरेणूनामनुकम्पाया चिरमभिलषितं 'डॉक्टर' इति मनोरथभूतं शब्दम्, तदथं विद्यावारिध्युपाधेरनुसन्धानकार्यसम्पादनाय, अत्र काशीस्थः सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य साहित्यविभागे पंजीकरण समपद्यत।

## विषयस्य निर्धारणम्–

अनुसन्धानोपाधिसमितौ सर्वैः समादरणीयैः सदस्यैः परमया प्रीत्यानुकम्पया च 'चालुक्यराज-अय्यण-वंशचरितकाव्यस्य सम्पादन्' इत्यद्वितीयो विषयः स्वीकृत्यानुकम्पितोऽहम्। काव्यमिदमश्रुतपूर्वमिवैव वर्ततेऽधुनापि संस्कृत-साहित्ये। चालुक्यवंशो हि पुराणेतिहासप्रसिद्धो वंशः। सोमवंशपरम्परास्य वंशस्योत्सः। कविना सोमप्रादुर्भूतवंशपरम्पराजातचालुक्यवंशपरम्परामधिकृत्य 'चालुक्यराज-अय्यण-वंशचरितकाव्यम्' कृतम्।

## काव्यस्य स्वरूपम्–

तददोषौ शब्दार्थौ सगुणावनलङ्कृतीपुनः क्वापि[1]।

सर्वत्रादोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्। परं यत्र कुत्रचिददलङ्काररहितौ सगुणावदोषौ शब्दार्थावपि काव्यम्। काव्यतत्वविदामनुध्यातमिदं मम्मटीयं काव्यलक्षणं काव्याधारं वरीवर्तते। इतः पूर्वं परन्च नैकेषामाचार्याणां काव्यलक्षणानि वर्तन्ते। तानि यथा–

(1) शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा[2]।
(2) काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वतते[3]।
(3) शब्दार्थौ काव्यम्[4]।

(4) अदोषौ सगुणो सालङ्कारौ च शब्दार्थौ काव्यम्[5]।

(5) शब्दार्थै निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम्–

साधुशब्दार्थसंदर्भं गुणालङ्कारभूषितम्।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये[6]॥
गुणालङ्कारसहिता शब्दार्थौ दोषवर्जितौ[7]॥

(7) शब्दार्थौ वपुरस्य तत्र निबुधैरात्माभ्यधायि ध्वनिः[8]।

(8) शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली[9]॥

(9) शब्दार्थौ ते शरीरम्, संस्कृतं मुखम्, प्राकृतं बाहुः, जघनमपभ्रंशः पैशाचं पादौ, उरो मिश्रम्, समः प्रसन्नो मधुर उदार अजस्वी चासि। उक्तिचणं च ते वचः, रस आत्मा, रामाणि छंदांसि, प्रश्नोत्तरप्रवह्लिाकादिकं च वाक्केलिः, अनुप्रासोपमादयश्च त्वामलङ्कुर्वन्ति[10]।

(10) निर्दोषालक्षणवती सरीतिर्गुणभूषणा।
सालङ्काररसानेकवृत्तिर्वाक्कायनामभाक्[11]॥

(11) रमणीयार्थ प्रतिपादकः शब्दः काव्यम्[12]॥

प्रसिद्धानीमानि काव्यलक्षणानि। काव्येऽस्मिन् वीरो रसः, प्रसादो गुणस्तथा च यत्र तत्रालङ्ण्काराणां वाहुल्यञ्चरित। सोमवंशे जातानां चालुक्यवंशीयानां बलपराक्रम-प्रतापपौरुषोत्साहसाहसशीलविनयविधाविक्रमसत्यसत्कर्मसदाचारसाधुसज्जनश्रुति-स्मृतिपुराण निखिलागमपुरुषार्थचतुष्टयषाड्गुणपारायणानां मातृपितृगोविप्रपूजकानांदेवेषु बद्धश्रद्धावतां धर्मैकप्राणानां राज्ञामत्रास्ति वर्णनम्।

**काव्यस्यभेदाः**

''दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्[13]।

पद्ययुग्मकमहाकाव्यखण्डकाव्यकोषगद्यकथाख्यायिकाचम्पूविरुदकरम्भकानि समानि काव्यानि श्रव्यकाव्यान्येव[14]। एवमेव पंचदशसर्गेषु निबद्धं ''चालुक्यराज-अय्ययणवंशचरितं काव्यम्। काव्यमेतद्धि श्रव्यं काव्यम्। श्रव्ये काव्ये महाकावकोटिमधितिष्ठति 'चालुक्यराजअय्यणावंशचरितम्' नाम काव्यम्। यतो हि

**महाकाव्यस्य लक्षणम्–**

सर्गसम्बन्धो महाकाव्यम्[15]।

यस्मिन् काव्ये सर्गाणां बन्धो भवेत्, अष्टाधिकाः सर्गाः भवेयुस्तद् महाकाव्यं भवति।

**सर्गनिर्धारणम्–**

नातिस्वल्पा नातिदीर्घाः सर्गाप्यष्टाधिकाइह॥[16]

प्रकृतं काव्यं पंचदशसर्गात्मकं विद्यते। नातिलघुकलेवराणां नातिदीर्घकलेवराणामष्टाधिकानां सर्गाणां यत्र बन्धो भवेत् तत्तु महाकाव्यं भवति।

**सर्गबन्धः–**

निबद्धेषु सर्गेषु ह्यावान्तरकथानां विन्यासोऽपेक्षितो भवति। अत्र 'चालुक्यराज-अय्यण-वंशचरिते महाकाव्ये' वर्णनप्रक्रिया तथैव शास्त्रीयैवास्ति। काव्यस्यास्य प्रतिसर्गस्य पुष्पिका यथा–

(1) चालुक्यराज-अय्यण वंशचरिते काव्ये वंशपरिचये विष्णोरशंभूतचन्द्र-वंशीयत्ववर्णनं नाम प्रथमः सर्गः।

(2) चालुक्यराज-अय्यण-वंशचरिते काव्ये चालुक्यवंशपरिचये प्रथमजसिंह-नृपवर्णनं नाम द्वितीयः सर्गः।

(3) चालुक्यराज-अय्यण-वंशचरिते काव्ये मङ्गलीशराज्यसिंहासनप्राप्तिर्नाम तृतीयः सर्गः।

(4) चालुक्यराज-अय्यण-वंशचरिते काव्ये प्रथमविक्रमादित्यवर्गनं नामचतुर्थः सर्गः।

(5) चालुक्यराज-अय्यण-वंशचरिते काव्ये क्षितीयकीर्तिमैवर्णनं नाम पंचमः सर्गः।

(6) चालुक्यराज-अय्यण-वंशचरितेकाव्ये द्वितीयतैलपवर्णनं नाम षष्ठः सर्गः।

(7) चालुक्यराज-अय्यण-वंशचरितें काव्ये अय्ययणवर्णनम नाम सप्तमः सर्गः।

(8) चालुक्यराज-अय्यण-वंशचरिते काव्ये अय्यणवर्णनं नाम अष्टमः सर्गः।

(9) चालुक्यराज-अय्यण-वंशचरिते काव्ये दत्तकपुत्रग्रहणं नाम नवमः सर्गः।

(10) चालुक्यराज-अय्यण-वंशचरिते काव्ये नारायणदेवादिवर्णनं नाम दशमः सर्गः।

(11) चालुक्यराज-अय्यण-वंशचरिते काव्ये हिन्दुकदनं नाम एकादशः सर्गः।

(12) चालुक्यराज-अय्यण-वंशचरिते काव्ये तुकदेवादिवर्णनं नाम द्वादशः सर्गः।

(13) चालुक्यराज-अय्यण-वंशचरिते काव्ये गोवाग्रहणोद्योगो नाम त्रयोदशः सर्गः।

(14) चालुक्यराज-अय्यण-वंशचरिते काव्ये चालुक्यान्वयस्यापत्यतनं नाम चतुर्दशः सर्गः।

(15) चालुक्यराज-अय्यण-वंशचरिते काव्ये विजयानगरे विष्णुप्रतिमानयनं नाम पंचदशः सर्गः।

एवमत्र 'चालुक्यराज-अय्यण-वंशचरिते महाकाव्ये' चालुक्यवंशस्य चन्द्रवंशीयत्व-वर्णनम्, प्रथमजयसिंहवर्णनम्, राज्ञः प्रथममंगलीशस्य महाबलो महोत्साहो विशुद्धज्ञानं संस्कृतः।

द्रष्टेव प्रकृतेः कायं वीक्ष्यमाणस्तु पूरुषः[17]॥

एवं भूतस्तु राजा अय्यणो हि चालुक्यकुलभूषणो राज्यं भ्रात्रे दत्वा वनं गत्वा तपसा योगसाधनया सार्धं तत्र चन्द्रतारकयोः रहस्यस्यानुसन्धानमकरोत्। तद्यथा—

विद्रोहं सर्वतो ज्ञात्वा मिथ्यात्वं जगतः स्मरन्।
प्रेम्णानुजं समाहूय राज्यभारं प्रदाय च॥
गतस्तपस्वी विपिनं त्यक्त्वा राज्यादिकं क्षणात्[18]।
तत्रासौ घोरं तपश्चक्रे
तारदेवडिसंज्ञे तु गहने तप आचरन्।
चिरायाभ्यन्तरैः षड्भी रिपुभिः परिवर्जितः[19]॥
ततोऽसौ
यतागिरावपि वने किन्चित्कालं निविश्य च।
चन्द्रतारगत्योश्चाऽकरोत् सूक्ष्माभिवीक्षणम्॥
गणितज्यौतिषज्ञानात् खगोले कृतनिश्चयः[20]।

अनेन प्राकृतभाषायां विरचितो ज्योतिषां ग्रन्थः, अस्य प्रपौत्रेण गोविन्ददेवेन काश्यां केनापि पण्डितेन संस्कृत्य प्राकाश्यं नीतः, तस्मिन्नेव ग्रन्थेऽस्य राज्ञः विशिष्टं वर्णनं समुपलभ्यते[21]।

## काव्यस्य वृत्तम्

पुराणेतिहासेषु प्रसिद्धाश्चालुक्यो वंशः, स एवास्य चालुक्यराज अय्यण-वंशचरितमहाकाव्यस्य विषयः, अत्राऽस्मिन्महाकाव्ये चालुक्यानां भृभूताभिनिवृत्तं कविना वर्णितम्। तद्यथा शास्त्रस्यानुदेशः—

इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्[22]।

अत्रास्मिन् काव्ये चतुवर्गेषु धर्मार्थकाममोक्षेषु राष्ट्ररक्षालकस्य कामरूपस्य पुरुषार्थस्यार्थतः इति यावत् प्राधान्यं दरीदृश्यते। अस्मिन् वंशे समुद्भूताः सर्व एव राजानः राष्ट्ररक्षायै एव कृतप्रयत्ना अभवन्। काव्यफलनिर्देशो यथा—

चत्वारस्तस्य वर्गाः स्युत्तेष्वेकं च फलं भवेत्[23]।

राज्यप्राप्तिवर्णनम्, प्रथमविक्रमादित्यवर्णनम्, द्वितीयकीर्तिवर्मवर्णनम्, राज्ञः द्वितीयस्य तैलपस्य वर्णनम्, राज्ञो ह्यय्यणस्य वर्णनम्, दत्तकपुत्रग्रहणवर्णनम्, नारायण-देवादीनां वर्णनम्, हिन्दूनां कदनस्य वर्णनम्, तुकदेवादीनां वर्णनम्, गोवाग्रहणोद्योगस्य वर्णनम्, चालुक्यवंशस्यापत्यनवर्णनं विजयानगरे विष्णुप्रतिमानयनन्चेति वंचदशसर्गेषु वर्णिताः विषयाः। सर्गेष्वावान्तरवर्णनैरुपलक्षितः रसवत्पद्यकम्बविन्यसो मजाकाव्यपदमधिरोहति। तथात्रोपलक्ष्यते। सर्गास्तु नातिस्वल्पकलेवराः न चातिदीर्घकलेवराः भवेयुरिति। अत्रास्मिन् महाकाव्ये सर्गक्रमणेण 67, 46, 31, 65, 39, 43, 70, 52, 75, 97, 51, 75, 75, 74, 45 श्लोकाः सन्ति।

**नायकनिर्धारणम्–**

अस्मिन् काव्ये चालुक्यवंशभवानामनेकेषां राज्ञां वर्णनं विद्यते।

चालुक्यवंशपरम्परायां द्वितीयस्त्वय्यणो राजा प्रथमादय्णायत् पंचमः पुरुषः, चतुर्थस्य विक्रमादित्यस्य प्रपौत्रः, द्वितीय तैलपस्य पौत्रः, सत्याश्रयस्य भ्रातृव्यः, दशावर्मणो द्वितयः पुत्रोऽभवत्। अस्य वंशे राजवंशपरम्परा बहुकालं यावत् प्राचलत्। अतः अस्य काव्यस्य केन्द्रस्थितः स एव। अस्मिन् चालुक्यवंशे अय्यणात् पूर्वं परन्च विजयादित्य-विष्णुवर्धन-जयसिंह-पृथ्वीराज-रणराग-पुलकेशि-विक्रमादित्य-कीर्तिवर्म-तैलप-भीम-सोमेश्वर-चन्द्रदेव-हरपालदेव-गोविन्ददेव कामदेव-प्रतापरुद्र-बंकिदेव-नारायणदेव-कोण्डिबादेव-तुकदेव-कमलोजी-प्रभृतयः राजानो महिमाशालिनोऽभवन्।

सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा[24]।

वंशोद्भवास्त्वनेके धीरोदात्तगुणान्विताः राजानो नायकाः सन्ति। तेषु राजाय्यणो न हि धीरोदात्तगुणभूषितो विद्वान्, तपस्वी, त्यागी योगिपुरुषश्चासीत्।

अविकत्थनः क्षमावानतिगम्भीरो महासत्वः।
स्थेयानिन्गूढमानो धीरोदात्तो दृढ़व्रतः कथितः[25]॥
धीरो दात्रस्तु नायकः एवंभूतो भवति।
परन्तु साधारणतया तु नायक एवं भूयात्
त्यागीनृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षो अनुरक्तलोकरतेजोवैदग्ध्यशीलव्यन्नेता॥

**नायकेषु–**

त्वचं कर्णः शिविर्मासं जीवं जीमूतवाहनः
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम्॥

परमदानशौण्डास्त्यागिनो महात्मानो नायकाः। हापुरुषा एतेऽभवन् भ्रात्रा जयसिंहेन क्रते विप्लवे कुलस्य रक्षायै सहर्षं राज्यं भ्रात्रे दत्वा। यमय्यणस्तपस्वीमहाभागस्त्यागमूर्तिर्वनं जगाम। तत्रायं तपश्चार्यायां निरतो भूत्वा योगधारणया चात्मतोषेण समं खगोलविषयेऽनेकान्ननुसन्धान् कुर्वन् सूर्यसिद्धान्तरूपमद्वितीयमन्तरिक्षशास्त्रीयं ग्रन्थरत्नं ज्योतिषशास्त्रे समुद्भावयति स्म कृती।

विद्वान् विपश्चिद्दोषज्ञःसन् सुधीः कोविदो बुधः।
धीरोमनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः॥
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः।
दूरदर्शी दीर्घदर्शी....[27]॥

राजायमय्यणस्त्यागी, कृती, कुलीनः, दक्षः, विद्याविनयसम्पन्नोऽभवत्।
भात्रे श्रीजयसिंहाय राज्यधूः परिकल्पिता।
येन स्नयान्नात्र कलहो मा भवेदवंशसंक्षयः[२४]॥

तथा च—

देवद्विजग्वां गोप्तां प्रजानां प्रातिवर्धनः।
जातो नृपः पूतमना अय्यणस्त्वय्यणोपमः॥
सदैवधर्मशास्त्रेषु पुराणेषु श्रुतीषु च।
तत्वमस्यादिवाक्येषु दत्तचित्तः क्षमान्वितः॥
दानशौण्डः सत्यवक्ता धर्मात्मा शंसितव्रतः।
धर्मराजावतारश्च यज्ञयागरतः सुधीः॥
साक्षान्नारायणस्यांशः शशिशेखरभक्तिमान्।
सदेव ब्रह्मचिन्तायां निरतो योगतत्वविद्॥
कमलायतनेत्रोऽसौ शोभनाजनुबाहुकः॥
दीप्त्या प्रकाशमानश्च समेषां सुखदायकः॥

## काव्ये रसश्दन्दांसि च

अत्र काव्ये वीररसस्यैव प्राधान्यमन्येत्वङ्गभूताः रसाः वर्तन्ते। अनुष्टुपेन छन्दसा निबन्धेऽस्मिन् महाकाव्ये सर्गमध्ये यत्र तत्र सर्गस्यान्ते वृत्तान्तरं विद्यते।

## काव्यस्यावदानम्

महाकाव्यगुणैरङ्कितैषा कृति र्हीतिवृत्तात्मिका सरलया भाषया सुगमार्थबोधकत्व-रूप प्रसादगुणसमलङ्कृता सर्वजनसुबोध्या छात्राणां कृते बहूपयोगिनी प्राचीन-भारतीयेतिहासजिज्ञासूनाम्।

## अस्य महाकाव्यस्य कविः

चालुक्यराज-अय्यणवंशचरितं महाकाव्यं हि पंचदशसर्गात्मकं काव्य-गुणैरलङ्कृतमिषुनन्दगजात्मकसंख्यापरिमितपद्यरूपं केन कविना कृतं न नाम निर्दिष्टं तेनात्र। प्राचीनसंस्कृतग्रन्थागारे सन्ति हि परमोच्च कोटिस्पृशो बहवो ग्रन्थाः येषां कर्तृणां नामापि नोपलभ्यते का वार्ता तेषामितिवृत्तस्य। अस्य काव्यस्यापि वर्तत एवं भूतैव स्थितिः।

ग्रन्थस्यास्य समालोचनेऽस्य प्रथमेसर्गे गुरुशिष्यसंवादेन काव्यवृत्तस्य सूत्रपातो भवति। समाधौ स्थितो गुरुः समाधिस्थितावेव प्रहसति। समाधिस्थितस्य गुरोः परिलक्ष्य शिष्यो गुरुं पृच्छति।

आनन्दकानने कश्चित् त्रिकण्टकविराजिते।
न्यवसज्जान्हवीतीरे वाराणस्यां महामुनिः॥
योगाभ्यासरतो धीमान् शान्तो दान्तः शुचिव्रतः।
निगमागमसर्वज्ञः सत्यवाक् शङ्करोपमः॥
शिष्यैश्च बटुभिर्युक्तो देशदेशान्तरागतैः।
सेव्यमानस्तु तैः सर्वैः कामक्रोधविवर्जितैः।
पारे ब्रह्मणि लग्नोऽपि देशचिन्तायुतः सदा॥
कदाचिन्मुनिशार्दूलो ध्यानावस्थितचेतनः।
निमीलिताक्षिपद्मोऽनि मध्यतः प्रजहास च॥
तद्दृष्ट्वा शिष्यवर्गस्तु गुरुसेवापरायणः।
अभूतपूर्ववृत्तेन विस्मयं परं ययौ[29]।

शिष्येषु कश्चिषच्छिष्यश्चालुक्यकुलजातआसीत्। स हि निगमागमसर्वज्ञस्य योगस्थितस्य गुरोः प्रहसनं श्रुत्वा विस्मितस्तं हास्यस्य कारणं पपृच्छ। तेषु कश्चित् प्रियः शिष्यश्चालुक्यकुलसम्भवः[30]।

चालुक्यकुलजस्य तस्य शिष्यस्य वचनं श्रुत्वा प्रीतो गुरुस्तमाह-
रहस्यवादिनो यस्माद् गुरवः शिष्यवत्सलाः।
तस्मात् सर्वं विस्तरेण वक्तुमीहे हि साम्प्रतम्[31]।

कर्मणां गतिस्तु नैव वक्रा भवति। यथाक्रम फलानां भोगाः समायान्ति। अनेके राजवंशा अभवन्, तेषु यः कश्चिदेव सत्कर्मणां महिम्ना तिष्ठति, अन्ये तु विलयं गताः। देशस्येदानीं विषमास्थितिः। जनाः विपरीतवुद्धयः दरीहश्यन्ते। इदानीं निगमागमानां वर्णाश्रुमाणाञ्च दुरवस्था देशवासिनां—नैव सुखकारिणी भविता। एवं भूतायां स्थितौ—

ये कूलाचारमाश्रित्य सदाचारं समाश्रिताः।
अकार्यं नैव कुर्वन्ति तेषां वंशः प्रमोदते॥
बहवो ख्यापिता वंशाचिकालागताश्च ये।
तेषु चालुक्यजातानामितिहासं सनातनम्[32]॥

गुरोः मुखारविन्दाच्चालुक्यकुलस्य महिमानं श्रुत्वोत्सुकश्चालुक्यकुलजः कश्चिच्छिष्यो योगिनं गुरुं चालुक्यवंशवृत्तकथनाय प्रार्थितवान् गुरुर्हीतोऽग्रेऽस्य काव्यस्येति पर्यन्तमस्य चालुक्यवंशस्य सुदीर्घमितिवृत्तमश्रावयत्। अतः काव्यस्य वृत्तं प्रारभ्यते। व्याख्यातात्र गुरुः श्रोतारश्च शिष्यास्तत्रैको हि चालुक्यकुलजः शिष्यः, यस्य स्ववंशवृत्तश्रवणौत्सुक्यं प्राधान्यमिव भजते।

एवमुक्तस्य तथ्यस्याध्ययनेन पर्यालोचनया च गुरुः शिष्यश्चोभौ प्रधानौ दृश्येते। अतो ह्यनया मीमांसया परिलक्ष्यते यत् कोऽपि चालुक्यकुलज एव विविदिषुरध्येता गुरोः सकाशात् स्वस्य वंशस्य वृत्तं श्रुत्वा छन्दोभिः संवेष्ट्यैतद्रूपं प्रादात्।

अस्य काव्यस्य समुपलब्धं रूपं निर्मथ्यानुयते यदि काव्यमिदं मूलरूपे तु

कस्यामपि दक्षिणभारतीयभाषायामिवासीत्, सम्भाव्यते स्यादेतत्वान्द्रभाषायायाम्। प्राकृतभाषायां केनापि विरचितस्य चालुक्यवंशोतिहासस्य, केनापि चणनामकेन विदुषा प्रतिभाशालिना चसंस्कृतभाषायामनूघरूपमेतद्महाकाव्य निर्धार्य संस्कृतसाहित्येरत्नभूतं 'चालुक्यराजाय्यणवंशचरितमहाकाव्यम्' योजयते स्म। साधारण संस्कृतभाषाज्ञानवतामध्येतृणां छात्राणां चेतिहासिकज्ञानविवर्धनाय काव्यमिदमीतसुगममिति।

**रचनाकाल–**

अस्य काव्यस्येतिवृत्तं तु पुराकालात् प्रारभ्यते। परन्तु 341 शकवत्सरात्–

रामवेदाब्जसंख्याके शके चौवलिनामके।
ग्रामे निवसतिं चक्रे श्रीमाहेश्वरसन्निधौ[33]॥

**प्रारभ्य**

गजाब्धिरसचन्द्राब्दे चांदबीबीति विश्रुता।
मुगलेभ्यो बरारं तु प्रादात् प्रेम्णा भयेन च[34]॥

1678 शकसंवत्सरं यावदितिवृत्तं कविता कवयति स्म। अतो ह्यस्य चालुक्यराजाय्यणवंशचरितमहाकाव्यस्य रचना कालः 1678 शकाब्दादनन्तरमेवाभवत्। 1678 शकवत्सरात् परं सम्भूतैतिहासिका, न कापि घटनात्र सम्प्रदर्शिता, अतः 1678 शकवत्सरसविध एवास्य काव्यस्य निर्मितिः। तेनास्य काव्यस्य निर्माणकालो हि शकवत्सरस्य सप्तदशशताब्द्याश्चतुर्थं चरणमेव भवेदिति।

**ग्रन्थरचायाः स्यानम्–**

अस्य काव्यस्य रचना तुम काश्यामेवा भवेदिति ग्रन्थारम्भभूमिकयैवालक्ष्यते–

आनन्दकानने कश्चित् त्रिकण्टकविराजिते।
न्यवसज्जाह्नवीतीरे वाराणस्यां महामुनिः[35]॥

स तपस्वी योगी च सर्वविद्यानिधानो मुनिवरश्चालुक्यजस्य शिष्यस्य गुरुरत्र काश्यां निवसन्, तपः कुर्वन्, योगसाधनां साधयन् शान्तो दान्तः शुचिव्रतः शङ्करावतार इव सत्यवाग् विपश्चिच्चाध्यापयच्छिष्याम्। गुरुरयं चतुर्थाश्रमीत्यपि ध्वन्यते–

पारे ब्रह्मणि लग्नोऽपि देशचिन्तायुतः सदा[36]।

सर्वेषां कामानां न्यासः परित्यागः संन्यासः, भवविभवविमुक्तः संन्यासी ब्रह्मस्वरूपं भजते। पारे ब्रह्मणि लग्नोऽपि स संन्यासाश्रमिस्थितो गुरुः देशस्य दुरवस्थया चिन्तया विमुक्तो नासीत्। शङ्करोपमः शिवस्वरूपः सांसारिकमिथ्याचारपराङ्मुखः–

निगमागमसर्वज्ञः सत्यवाक् शङ्करोपमः[37]॥

सत्यवाक् शङ्करोपमः ब्रह्मस्वरूपो गुरुरासीत् च संन्यासी।

## काव्यस्य भाषा–

चालुक्यराजाय्यणवंशचरितमहाकाव्ये प्रयुक्ता देववाणी पौराणिकीं परिपाटीं निर्वहन्ती प्रसन्नातिसरला चास्ति। कविना प्रयुक्तायां भाषायां प्रतिपाद्यविषयबोधकताशक्ति-निर्भरत्वमनुभूयते। काव्येऽस्मिन्नैतिहासिकवृत्तात्मके भाषाचमत्कारस्य शब्दानामुच्छल-मायाः छलनायाश्च सर्वथाभावः। काव्य कथानकप्रकटनकृतश्रमः कविः कवित्तव-चमत्कारात्मकप्रयोगप्रकटने सर्वथारुचिवान् दृश्यते। अथवायमेवक वित्वशक्तेश्चमत्कार-स्तेन स्वीकृतो यत् काव्यं सर्वजनबोधगम्यं भवेत्। अतः काव्यमिदं सरलसंस्कृतभाषाप्रयोगेण साधारणसंस्कृतभाषाज्ञानसम्पन्नाः बाला अपि पठितुं तदर्थमधिगन्तुं च पारयिष्यन्ति।

## शैली

शैली नाम विधा प्रकारो वा। चालुक्यराजाय्यणवंशचरितं काव्यं काव्यप्रकारेषु महाकाव्यम्। कविनात्र प्रतिपाद्यविषयेबोधगम्यतामेव प्रधानीकृत्य सरलया प्रसादगुणयुक्त्या विधया काव्यकलेवरं स्थिरीकृतम्। अतः प्राथमिककक्षायाश्छात्रा अपि काव्यमिदमधीत्य तदैतिहासिकं वृत्तमाकलय्य प्राचीनभारतीयेतिहासविषये समुत्सुकाः भूत्वा प्रवृत्ताः भवेयुः।

## व्याकरणम्

सार्थकवाक्यसम्भृतपदसमूह एव भाषारूपं भजते। वाक्येषु पदानां विन्यासार्थं केचिन्नियमाः कर्तृकर्मक्रियारूपाः प्राचीनैः प्रतिपादितास्ते नियमा एव व्याकरण-पदेनाभिधीयन्ते। व्याकरणं विहाय भाषायाः स्थितिरेवासम्भवेति। कविर्लेखको वक्ता वा व्याकरणपरिनिष्ठितदानि संप्रयुज्य स्ववक्तव्यं पाठकस्य श्रोतुर्वा बोधविषयं करोति। अत्रापि कविस्तथैव व्याकरणस्य सरलं स्वरूपं संगृह्य सरलया भाषया काव्यं व्यतनोत्। यथा पूर्वमेव भाषाशैलीस्तम्भे प्रकटितो विचारः यत् काव्यस्य भाषा सरला शैली सुबोधा कविना स्वीकृता। सरलायां भाषायां विधायान्च क्लिष्टानां व्याकरणप्रयोगाणां कृते प्रायः स्थानाभाव एव भवति। अतोऽस्मिन् चालुक्यराजाय्यणवंशचरितमहाकाव्ये कविना व्याकरणस्य सरलाः प्रचलिताश्च प्रयोगाः प्रयुक्ताः।

## चालुकयराजाय्यणचरितमहाकाव्यस्य नामकरणम्

सोमवंशे यथा पुरुवंशः, यदुवंश, कुरुवंश, पाण्डुवंशश्च वंशाः प्रचलितास्तथैव चालुक्यवंशोऽपि प्रचलितः। सोमवंशपरम्परायां काव्ये प्रदर्शितेषु राजषु उदयनं यावदन्न कोऽपि चालुक्यश्चालुक्यो वा, चलुकश्चालुको वा समुपलभ्यते। राज्ञ उदयनात् परमेकोनषष्टिसंख्याकाः राजनोऽभवन् तथा चास्मिन् वंशे यो राजा कोल्हालोऽभवत् तस्मात् पूर्वन्त्वेकोनाशीति संख्याकाः राजानोऽभवन्, कोल्हालस्त्वशीति संख्याको राजासीदिति कवेर्मतिः।

एकोनषष्ठिराजानोऽभन्नुदयानात् परम्।
शशासुर्ये महद्राज्यं चालुक्यान्वयभूभृताम्॥

उदयनात् परं एकोनषष्ठिराजोऽभवन्, ये चालुक्यान्वयभूभृतां महद्राज्यं शशासुः। अत्र ह्येकोनषष्ठि राजानस्तु चालुक्यान्वयभूभृतां राज्यं शशासुरेव। अतः एतेषामेकोनषष्ठिसंख्यानां राज्ञां पूर्वमेव कोऽपि चालुक्यो राजा भवदिति कवेः स्वारस्यम्।

चालुक्यो हि दक्षिणभारते पर्वतविशेषस्तस्य दक्षिणे भागे चालुक्याः शासका अभवन्।

एतत् पूर्वं तु वंशस्य चालुक्यस्य च दक्षिणे।
एकोनाशीति राजानो राज्यं चक्रुः सुनीतितः॥

चालुक्यस्य पर्वतविशेषस्य दक्षिणेभागे एतत्पूर्वं नाम एतेषां एकोनषष्ठिसंख्याकाः राज्ञां पूर्वं आदावित्यर्थः चालुक्यस्य वंशस्ये एकोनाशति राजानो सुनीतितो राज्यं चक्रुः। एकोनाशीतिसंख्यानां राज्ञां पश्चाद् ह्यशीति संख्यायाः पूरको राजा कोल्हालोऽभवत्। कोल्हालवंशीया एव राजानः समागत्यायोध्यायामुत्तरभारते राज्यं चक्रुः।

अत्रैतद्ध्यानीयं यद्धि ये ह्येकोनषष्ठिराजानोऽभवन् ते चालुक्यान्वयभूभृतां महद्राज्यस्य शासका अभवन्। अतश्चालुक्यस्य समयो ह्येतेषां पूर्वमेवासीत्।

एकोनाशित संख्याः राजानो ह्येकोनषष्ठिसंख्यानां राज्ञां पूर्वमभवन्, ते च चालुक्यस्य वंशस्य भूत्वा सुनीतितः राज्यं चक्रुः। एकोनाशीति संख्याकाः राजानः सर्वएव चालुक्यकुलजाः, अतश्च चालुक्यो ह्येतेषां पूर्वमभवत्। अतश्च ह्युदयनाच्चालुक्यस्य सम्बन्धः कवेरभिप्राय एवमेवाभिलक्ष्यते। कोल्हालप्रभृतयो राजानो विजयपदित्यप्रभृतयो राजानश्च सोमवंशी यस्य राज्ञश्चालुक्यस्य परपुरुषाश्चालुक्यश्च तेषां पूर्वपुरुष आसीत्। सोमवंशस्यादिपुरुषोऽत्रिर्महर्षिः, स हि ब्रह्मणो मानसपुत्रः, महर्षेरत्रेः पुत्रश्चन्द्रमाः। चन्द्रस्य वंशोऽस्मिन् पुरुरवाः, ययातिः, पुरुः, कात्यायनः, दुष्यन्तः, भरतः, हस्ती, शान्तनुः, अर्जुनः, अभिमन्युः, परीक्षित् जनमेजयः, उदयन एवंभूताः गीतयशसः, विश्रुतकर्माणः, धर्मशीलधनाः प्रज्ञापरिगृहीताः, पराक्रमोत्साहसाहसबलविक्रमजिताः, दानशौण्डाः, विधानामुपासकाः, विदुषां सेवकाः, प्रजानामनुरन्जकाः सत्सज्जनसाधुसदाचरि-विप्रबलकवनिताधर्मधेनुभुक्ताः मीमांसाविधिविधातारः, मातृपितृदेवाः, आचार्यदेवाः, परमेश्वरपराक्रमदृढ़विश्वासाः, शस्त्रशास्त्रधारकाश्च राजानोऽभवन् श्रुतिमार्गानुयायिनः। अमुस्मिन् वंशे जातो राजा चालुक्यतस्तवंशो कोल्हालः, विजयादित्यः, विष्णुवर्धनः, जयसिंहः, बनराजः, रणरागः, पुलकेशी, विक्रमादित्यः, भीमः, तैलपो राजाप्यणश्च ये बलेन, वीर्येण पराक्रमेण, साहसेन, उत्साहेन, विद्याविनयाभ्यां, शीलसत्कर्मभ्यां शास्त्रशास्त्राभ्यां, दानमानधर्मः, पालयन्तोदेव हिजगोधर्मान्यपालयन्तः वदान्याः वीरा राष्ट्ररक्षाधुरीणा भारतभूमिं व्याप्य श्रुतिशास्त्रर्मा राजानोऽभवन्। एवंभूते सोमस्य वंशे राजा चालुक्योऽभवत्तथा च चालुक्यस्य वंशे राजय्यणोऽभवत्।

अय्यणो दशवर्मणः पुत्रोऽभवत्। स अय्यणो शीलेन स्वभावेन कर्मणा देवपुरुषः,

विद्याविनयशीलः, श्रुतिशास्त्रनिष्ठः, प्रजानां सेवकः कुलकल्याणव्रती, योगनिष्ठः, खगोलीयरहस्यवेत्ता राजासीत्। अस्याय्यणस्य वंशे देशरक्षैकव्रताः, धर्मसंतुरक्षकाः, गोब्रह्मणपूजकाः, देवानामुपासकाः, मातृपितृदेवाः, आचार्यकुलोपासकाः मातृभूमिभक्ताः, राजनीतिकझंझावातपरिवृताः चन्द्रदेवहरपालदेवगोविन्ददेवबं किदेवकामेश्वरवीर-भद्रेश्वरेनारायणदेवकोण्डिबादेवक्रतुकदेवमालोजीनरसोजीप्रभृतयोराजानोऽभवन्। एवं भूतः सोमस्य, चालुक्यस्य राज्ञो वंशस्त्वययूणस्य लोके वरीवर्तते स्म। कविस्तं लोकोत्तरपुरुषाणां चालुक्याय्यणवंशजातानां राज्ञामितिवृत्तमभिलक्ष्य तेषां देशजातिधर्मरक्षापरायणानां राजामितिवृत्तमभिलक्ष्य तेषां देशजातिधर्मरक्षापरायणानां राज्ञो चरितं स्यूतवान्नस्मिन् ''चालुक्यराजाय्यणवंशचरितकावैये'' महता गौरवेण राष्ट्रभक्त्या च पूरितः।

## चालुक्यराजाय्यणवंशचरितमहाकाव्ये चालुक्यवंशविवरणम्–

अत्रास्मिन् चालुक्यराजाय्यणवंशचरितकाव्ये काव्यग्रन्थस्य नाम्नैव ज्ञायते यदत्र वर्ण्यो विषयश्चालुक्यवंशास्य कीर्तनमेवास्ति, तत्रापि पुनर्हिकवेरीहा चैवं प्रतिभाति यत् स चालुक्यवंशे जातस्य अय्यणनामकस्य पुरूषविशेषस्यैव विशेषवयैवात्रोपाख्यानं कतुं समीहते। विश्रुतस्य चालुक्यवंशस्यादिपुरूषो हि नारायण एवास्ति। सोमवंशपरम्परां परिगृह्यैव प्रचलति चालुक्यवंशः। अत्र काव्ये गुरुः शिष्यान् चालुक्यवंशस्येतिवृत्तं समुपादिशति–

श्रूयतां सावधानेन चेतसेयं पुरातनम्।<br>
चालुक्यकुलजातानामितिहासं स्वराष्ट्रजम्॥<br>
विष्णोरंशात् समुद्भूतो वंशोऽयं वैष्णवो भुवि।<br>
तेषामत्र सुनामानि पुण्यानि निगदानि वः॥

विष्णोर्नाभिकमलाद् ब्रह्मणः समुत्पत्तिः। ब्रह्मणो मानसपुत्रोऽत्रिरभवत्। महर्षिरत्रेरपत्यं चन्द्रमाः। चन्द्रमसो बुधः पुत्रः। बुधात् पुरूरवाः जातः। पुरुरवसोहि आयुः। आयुषो नहुषः। नहुषाद्ययातिः। ययातेः पुरुः। पुरोः जाताः पौरवाः। पुरोः पुत्रस्तु जनमेजयः। जनमेजस्यापत्यं प्राचाशः। प्राचीनसाक्ष्य सतोऽभत् सैन्ययातिः। सैन्ययातेः पुत्रो हययातिः। हययातेः प्रतापवान् पुत्रोऽभवद् सार्वभौमः। सार्वभौमस्य प्रतापवान् सुतो जयसेनः। जयसेनस्य महाभौमः। महाभौमद्देशानकक्रौधाननौ। देशानकस्य पुत्रो देवकिः। देवकेः क्रमुकः। क्रमुक्य सुतोऽभद् दक्षकः। दक्षकस्य मतिमतां वरः पुत्रः कात्ययनोऽभवत्। कात्यायनस्य पुत्रो हि दुष्यन्तः। दुष्यन्ताद्धि भरतः। धर्मशीलाद्भरताद्धारा मन्युरभवत्। मन्योरपत्यं सुहोत्रः। सुहोत्रस्य हस्ती। येन हस्तिनापुरं राजधानी चक्रे। हस्तिनः पुत्रो विरोचनः। विरोचनादजामिलोऽभवत्। अजामिलाज्जातो हि संवरणः। संवरणस्य पुत्रोऽभवत् सुधुन्वा। सुधन्वनो मातुर्नाम तपतीत्यासीत्। तपती सूर्यस्य कन्यासीत्। सुधन्वनोऽभवत्परीक्षितः। परीक्षिताद्धि भीमसेन। प्रदीपनो हि भीमसेनस्य पुत्र आसीत्। भीमसेनात् महाप्रतापी शान्तनुरभवत्।

शान्तनोः पुत्रो विचित्रवीर्य आसीत्। विचित्रवीर्याद्विपाण्डुः। पाण्डोः पुत्रोऽजुनोऽभवत्। अर्नुनादभिमन्युः। अभिमन्योरपत्यं परीक्षित्। परीक्षिद्विविप्रशापदग्धः सप्ताहं गंगायामुपवेशानं कृत्वा तक्षकेण दष्टो मोक्षं गतः। परीक्षितः पुत्रो जनमेजयः। जनमेजयात् केमुकः। केमुकान्नरवाहनः। नरवाहनाद्भूतिमाम्। भूतिमतः सुतः शतानीकोऽभवत्। शतानीकस्य पुत्रो राजा उदयनोऽभवत्।

उदयनात् प्रचलितायां वंशपरम्परायां एकोनषष्ठिसंख्याकाः राजानोऽभवन्। एतेष्वेव राजसु चालुक्यो नाम राजा भवत्। चालुक्यावंशपरम्परायां जाताः राजानोनयनिपुणाः प्रतापिनश्च बभूवुः। अस्यां परम्परायावन्त्वग्रे राजानो हि एकोनाशीतिसंख्याका अभवन। अतः परमक्रे ह्यशीतिसंख्याकाः राजानोऽभवन्। अशीतिसंख्याका राजा महाप्रतापवान् कोल्हालोऽभवत् महाराष्ट्रस्थितं कोल्हापुरं नगरं स एव रचयामास।

एकोनषष्ठि राजानोऽभएवन्नुदयनात् परम्।
शशायुर्ये महद्राज्यं चालुक्यान्वयभूभृताम्॥
एतत्पूवं तु राज्यस्य चालुक्य च दक्षिणे।
एकोनाशीति राजानो राज्यं चक्रुः सुनीतितः॥
अशीति संख्यको राजा कोल्हालस्तु प्रतापवान्।
कोल्हापुरं सुनगरं रचयामास रागतः[38]॥

अतः परमस्मिन् वंशो जातो नृपः दक्षिणं भारतं विहायोत्तरं भारतमागत्यं अयोध्यायां स्वशासनं संस्थाप्य राजधानीमयोध्यां[37] चक्रे। अयो ध्यायां राज्यं कुर्वतः कस्यचिद् राज्ञः विजयादित्यश्चित्रकण्ठश्च द्वौ पुत्रावास्ताम्। ज्येष्ठेन भात्रा राज्ञा चित्रकण्ठेन भर्त्सितो विजयादियो जन्मभूमिमयोध्यां नमस्कृत्य दक्षिणं भारतमगच्छत्॑।

एतेषु विजयादित्यश्चित्रकण्ठेन भर्त्सितः।
स्वभ्रात्रा दक्षिणे तस्मात् पुनः स प्रस्थितोऽभवत्[40]॥

स विजयादित्यो हीन्दुदेवेशनेत्रे (341) शकवर्षे दाक्षिणे भारते माहेश्वरस्य सन्निधौ एकस्मिन् ग्रामे कश्चिद् दिवसान् निवासं चक्रे, ततोसौ काश्चिद् दिवसान् अजन्तायां वासं चकार। अत्रैवावं शक्तिसंचयं कृत्वा पल्लवानां राजन्याक्रमणमकरोत्।

अस्मिन्नाक्रमणेऽसौ विजयादित्यः पराजितो भूत्वा पलाय्य च मुडिवेडुग्रामे विष्णुभट्टस्य शरणमाययौ।

गृहीत्वा विजयादित्यः भार्यां गर्भवतीं तदा।
निष्क्रान्तस्ततस्तस्मात् पङ्कादिव गजेन्द्रकः॥
मुडिवेडुग्राममध्ये विष्णुभट्टं तपस्विनम्।
वेदवेदाङ्गतत्वज्ञं शरण्यं सोमयाजिनम्[41]॥

अत्रैव विदुषस्तपस्विनो विष्णुभट्टस्याश्रमे मुडिवेडुग्रामे विजयादित्याद्विष्णुवर्धनः प्रादुर्बभूव। असौ विद्ययाविनयभ्यां शक्तिपराक्रमाभ्यां बलशीलोत्साहैः सदाचारैस्तपसा च मण्डितक्रियाकलापो ह्याखण्डल इव विद्विषां विधीनां खण्डको दण्डकश्च

कुपथगामिनामभवत्। एष एव विष्णुवर्धनः अनेकेषां राज्ञां राज्यानि भूभागांश्च विजित्य दक्षिणे भारतें चालुक्यानां राज्यं संस्थापयामास।

राज्यं जित्वात्वनेकेषां राज्ञां राजाभिमानिनाम्।
ग्रामान् संस्थापयामास राज्यं स्वं दक्षिणापथे[12]॥

अस्य राज्ञो गुणैविद्यया विक्रमेण च प्रभावितः पल्लवानां महाप्रतापी राजा कान्चीश्वरो ह्यस्मै महता वैभवेन समं बलवीर्यपराक्रमोत्साहगुणोपासिकां स्वकन्यां प्रादात्, तस्यामसौ परमपराक्रमिणं विजयादित्यमिव विजयादित्यं लेभे। विजयादित्यस्यायं पौत्रो विजयादित्यः, अस्य महाकहमाशाली यशोधनन्च पुत्रः जयसिंहोऽभवत्। पृथ्वीवल्लभोऽयं राजा ह्यनेकान् राष्ट्रकूटादिकान् पार्थिवान् जित्वा—

अङ् कबाणेशनेत्राख्ये (359) शकवत्सरसन्निधौ।
जयसिंहमाराजस्याऽऽसीद्राज्यं सुविस्तरम्॥
यो राष्ट्रकूटकुलमिन्द्र इति प्रसिद्धं
कृष्णाह्वयस्य सुतमष्टशतेभसैन्यम्।
निर्जित्य दग्धनृपपन्चशतोबभार
भूयश्चुलुक्यकुलवल्लभराजलक्ष्मीम्[13]॥

अस्य विश्रुतस्य वीरवरस्य राज्ञो हि बालवर्मा बुद्धवर्मेति च द्वौ पुत्रौ विख्यातौ, तयो र्युवराजो बालवर्मा (383) शके वर्षे पितुः राज्यासनमलङ् कृत्य सुधिया राज्यं चक्रे[14]। बालवर्मणः पुत्रो विजयवर्मा, स हि

वेदाङ्कराम (394) प्रमिते शके पृथ्वीं शाशस सः[15]॥

अस्य पुत्रोऽभवद्रागराजा वनराजेति विश्रुतस्तस्य पुत्रोह्यूभूद्राजा पृथ्वीराजोऽभिधानकः। अस्य राज्ञश्चालुक्यकुलजस्य पुत्रो विजयवर्मा भवत्। विजयवर्मणः प्रपितामहोऽपि विजयवर्मा एवासीत्। अस्य राज्ञो विजयवर्मणो द्वितीयस्य पुत्रो हि जयसिंहोऽभवत्। अतः पूर्वं प्रथमो जसिंहो हि सप्तमः पूर्व-पुरुष आसीदवन्तु द्वितीयो जयसिंह[16]। अस्य द्वितीयस्य जससिंहस्य पुत्रो बालवर्माभवत्। अयं बालवर्मा प्रथमबालवर्मणः परं सप्तमः पुरुष आसीद् द्वितीयो बालवर्मा[17]। अस्य द्वितीयस्य बालवर्मणो भ्राता रणरागो हि नीतिनिपुणः पराक्रमीचासीत् स एव राजाऽभवत्।

जयसिंहस्यान्यपुत्रो महावीरोजितेन्द्रियः।
रणरागस्ततो पृथ्वीं शशास निजविक्रमैः॥
अतीवबलसंयुक्तः शिवभक्तः प्रतापवान्।
संग्रामरसिको वीरो निजं राज्यं व्यवर्धयत्[18]॥

अस्य रणरागस्य राज्यं रुद्रवेद (411) शके वर्षे राज्यं सुविस्तृतमासीत्[19]। राज्ञोरणरागस्य पुत्रोऽसौ प्रथमपुलकेशी महान् प्रतापी राजाभूत्। यस्य पराक्रमैश्चालुक्यराजकुलश्रियः परमासमृद्धिरभवत्। नानाविरुदविभूषितपुलकेशिना राज्यं कुर्वता वातापी नाम्नी राजधानी क्रे। या राजधानी वातापी कीर्तिवर्माणं यावत् स्वस्तां जगौ।

चन्द्रेषुवेदके (451) वर्षे शोभने भुवि भूपतेः।
राज्यमासीत् सुविस्तीर्णं राज्यश्रीः पुलकेशिनः[49]॥

तस्य पुलकेशिनो द्वौ पुत्रावास्तां कीर्तिवर्मा मङ्गलीशश्च। अयं कीर्तिवर्मा राजसु महान् राजाभवत्। अनेनानेके राजो विजित्य राज्यं विस्तार्य बहूनि प्रजाहितकराणि कार्याणि संपाद्य धर्मसंस्थापनाय बहवः प्रयत्नाः कृताः। पुलकेशी, विष्णुवर्धनः, जयसिंहो बुद्धवर्षकश्चेति चत्वारः पुत्राः कीर्तिवर्मणोऽभवन्। अस्य राज्ञः निधनकाले चत्वारोऽपि बालका एवासन्[50]। अतः कीर्तिवर्मणो भ्राता युवराजो मंगलीशो हि राज्यासनं समुपाविशत्। अनेन राज्ञा मङ्गलीशेन कीर्तिवर्मणो राज्यस्य सम्यग् विस्तारं चकार[51]। असौ मंगलीश एव वातापीगिरिमुत्कृत्य तस्मिन् विष्णुमन्दिरं कारयामास।

वर्षे पंचशते (500) तेन स्थापितं विष्णुमन्दिरम्।
वातापीगिरिमृत्यकृत्य गुहायां परमाद्भुतम्[52]॥

**राजासौ मंगलीशः–**

अङ्केभवेदवर्षाच्च नेत्ररामे षुवत्सरम्।
राज्ञा राज्यं कृतं तेन चालुक्यान्वयभूषकम[53]॥

एवमसौ राजा कीर्तिवर्मणः पश्चात् तस्य प्रतिनिधिरूपेण 487 शकवर्षात् 532 शकवर्षं यावद्राज्यं चकार। दिवंगते मङ्गलीशो अस्य पुत्र इन्द्रवर्मा स्वल्पं कालं शासनं धारयामास। असाविन्द्रवर्मैव धुवराज आसीत्।

सामन्तस्तत्सुतश्चेन्द्रवर्मा सत्याश्रयो नृपः।
ध्रुवराज इति ख्यातः स्वल्पकालं शशास[54] सः॥

533 शकवर्षे कीर्तिवर्मणो ज्येष्ठः सूनुः प्रथमपुलकेशिनः[55] प्रपौत्रः द्वितीय पुलकेशी राज्यासनमलन्चकार। अस्य द्वितीयस्तु पुलकेशिनो राज्यकाल एव कान्यकुब्जेश्वरः श्रीहर्षो हि दक्षिणापथै विजययात्रामकरोत्। परन्तु पुलोशिनः पराक्रमेण ततः परावर्तत।

कान्यकुब्जेश्वरो हर्ष आक्रमद् दक्षिणे तदा।
विजिगीषुश्च श्रीहर्षस्ततस्तेन न्यवर्तत॥
प्रबाध्य तच्चमूं वीरो महाबलसमन्वितः।
दूरीचकार हर्षस्य हर्षं सबलगर्वितः[56]॥

अनेन चालुक्यकुलभूषणेन राज्ञा द्वितलयपुलकेशिना गंग-अलूपमौर्यमालव-गुर्जर-महाराष्ट्र-कोशल-कलिङ्ग-पल्लव-पाण्ड्य-केरलचोल नृपाः स्ववशमानीता करदाश्च कृताः। अस्यैव राज्यकाले ईरानदेशस्य नृपस्य खुस्रोर्दूतो बहुभिरुपायनैः समागत्य मैत्रीसन्धिमकरोत् तथा चास्मिन्नेव काले चीनदेशीयः यात्री हुएन्त्साङ्गेति नामापि समागच्छदत्र भारते, येन स्वलिखिते यात्रावृत्ते राज्ञोऽस्य राज्यप्रशासनव्यवस्था सुवर्णिता।

वर्षे नु षोडशो राज्ये दूतश्चेरानदेशतः।
खुस्रोर्नृपस्य चायातो विशिष्टोपायनैः सह॥
प्रादादागत्य दूतोऽसौ पत्रं राजाङ्कमुद्रितम्।
समामाकार्यमानेन मैत्र्या मैत्रीं व्यवर्धयत्॥
चीनयात्री हुएन्त्साङ्गो राज्येतस्य समागमत्।
लिखितं तेन तद्वृत्तं स्वयात्रावृत्तवर्णने[57]॥

पूज्यपादैराद्यश्रीशङ्कराचार्यैर्यत्कार्यं भारतीयसंस्कृतिसंरक्षणाय कृतं तत्कार्यस्यारम्भो ह्यनेनैव महामहिमाशालिना राज्ञा द्वितीयेन पुलकेशिना कृतः।

वर्धमाने हि बौद्धानामत्याचारे स धर्मवित्।
सत्याश्रितस्य हिन्दूनां धर्मस्योन्नतिमातनोत्॥
धर्मार्थं शङ्कराचार्यो यत्कार्यं कृतवान् पुरा।
प्रारम्भस्तस्य कार्यस्य पुलकेशी समाचरत्[58]॥

गणनायां कनिष्ठिकायामारूढेषु राजसुनृपोऽसौ प्रथमः पुलकेशी द्वितीयो वर्तते। विश्रुतकीर्तिरयं चालुक्यकुलावतंसः पुलकेशी

रघोर्वंशे यथा रामः पाण्डवेषु यथार्जुनः।
तथा चालुक्यवंशेऽयं पुलकेक्षीति विश्रुतः[59]॥

कीर्तिवर्मणः पुत्र आसीत्। परं हि कालस्य गतिस्तु विचित्रा। अस्य राज्यस्यान्तिमः कालो वै पार्श्ववर्तिनां राज्ञां विप्लवैः परिव्याप्तोऽभवत् तेनासौ खिन्नः

नेत्राङ्कबाणवर्षे (592) तु शकेदुर्दैवघर्षितः।
स प्रतापी राजराजो भूमिं त्यक्त्वा दिवङ्गतः[60]॥

अस्य द्वितीयस्य पुलकेशिनश्चत्वारः पुत्रा आसन् तथा च कन्यैकासीत्ंचन्द्रादित्यः आदित्यवर्मा, विक्रमादित्यः, जयसिंहः कन्या अम्बेरा च। अतः परं राज्यासने पुलकेशिनस्तृतीयः पुत्रो विक्रमादित्यः शासनसूत्रं संगृहयोपाविशत्। अयं राजा महाप्रतापी द्विषां विमर्दकोऽभवत्।

अस्य पुत्रो विनयादित्यः सोऽपि नयनिपुणो महाबलशाली चाभवत्। विनयादित्यस्य पुत्रो विजयादित्योऽभवत्। अयं तृतीयो विजयादित्यः परमप्रतापीचालुक्यानां राजाभवत्। अस्य राज्ञी लोकमहादेवी परमगुणवैभवशालिन्यासीत्। असौ विजयादित्यः पितामहेन पित्रा च तुल्य आसीत्। स तयोः पुरत एव युद्धेषु विक्र मं प्रादर्शयत्।

पिताम हेन पित्रा च तुल्यो युद्धेषु वीर्यवान्।
गत्वा प्रादर्शयत् स्वीयमद्भतं बलपौरुषम्[61]॥

परमो राजनीतिचणो राजा विजयादित्यो राज्यस्य समुचितं सुविस्तारं कुर्वन् धर्मस्य, संस्कृते सभ्यतायाश्चोन्नतौ प्रचुरं प्रयत्नमकरोत्। अस्य शासने समेषां धर्माणां समादरः समान एवासीत्। सर्वे विद्वांसः धार्मिका, साधवः, सज्जनाश्च समादरस्य पात्रभूता अभवन् अयं हि राज्ये जैनधर्मस्य संरक्षणाय व्यवस्थाकरोत्—

जैनेषु ग्रामदानन्च विहितं तेन भूभृता[62]।

द्वितीय इन्द्र इव राजा विजयादित्यः 618-655 वर्षाणि यावत् राज्यं कृत्वा त्रिदशालयातिथ्यं स्वीचकार। तृतीयस्यास्य विजयादित्यस्यात्मजोऽभवद् द्वितीयो विक्रमादित्यः। प्रथमो विक्रमादित्यो ह्यस्य प्रपितामह आसीत्। अयं साहसोत्साहबलवीर्यविक्रमविद्यानयनिपुणो विक्रमादित्यः महागर्विष्ठं पल्लवानां राजानं नन्दिपोतवर्माणं विजित्य कान्चीं राजधानीं स्ववशमकरोत्। अत्र कान्चीनगरेऽस्य कीर्तिस्तु राजसिंहेश्वरमन्दिरस्य शिलापट्टे स्ववशमकरोत्। अत्र कान्चीनगरेऽस्य कीर्तिस्तु राजसिहेश्वरमन्दिरस्य शिलापट्टे सुस्थिराद्याप्यस्य गुणानुवादं करोतिंपाण्ड्यचोलकेरलादि-देशान् विजित्य विक्रमादित्योऽसौ राजा तेषु तेषु प्रदेशेषु जयस्तम्भान् संस्थाप्य वृत्तं लिखितमस्ति। अस्य राज्ञः द्वे पत्नयौ बभूवतु। तत्र लोकमहादेवी ज्येष्ठा त्रैलोक्यमहादेवी कन्ष्ठिा चासीत्। लोकमहादेवीत्रैलोक्यमहादेव्यौ हैहयान्वयराजस्य कन्ये ह्यास्ताम्। तयोर्मध्ये त्रैलोक्यमहादेव्याः कीर्तिवर्मा पुत्रोऽभवत्। अयं कीर्तिवर्मा प्रथमकीर्तिवर्मतः सप्तमः पुरुष आसीत्। पितरि विक्रमादित्ये 669 शके वर्षे दिवङ्गते राजा कीर्तिवर्माभवत्। द्वितीयोऽयं कीर्तिवर्मा चालुक्यकुलेऽभवत्। महामेधावी चालुक्यराजोऽसौ पाण्ड्यपल्लवकेरलयुद्धेषु क्षीणसैनिको राष्ट्रोढराजेन दन्तिदुर्गराजेन युद्धे पराजितो भूत्वा दुःखितो दक्षिणभागस्य राज्यं चक्रे। अतः परं प्रथमाद्विक्रमादित्याद् प्रचलिताः परम्परायाः राज्यवैभवोस्य नामशेषोऽभवत्।

पुलकेशिनो द्वितीयस्य चन्द्रादित्यः, आदित्यवर्मा, विक्रमादित्यः, जयसिंहश्च चत्वारः पुत्रा अभवन्। तेषु विक्रमादित्यस्य राज्यपरम्परा क्षीणाभवत्। पुलकेशिनः कनिष्ठः पुत्रश्चतुर्थो जयसिंह आसीत्। अस्य शिलादित्यः, मङ्गलेशः पुलकेशी चत्रयः पुत्रा अभवन्। एतेषु मङ्गलेशस्यैव सन्ततिसूत्रमग्रे प्रतनितम्। मङ्गलेशयस्य पुत्रो मणिक्यादित्यः, माणिक्यादित्यस्य नरसिंहः, नरसिंहस्य कतियारकः, कतियारकस्य विमलादित्यः, विमलादित्यस्य पुत्रो भीमोऽभवत्। भीमप्रतापवान् भीम एवासावादित्यनर्मेति नाम्ना विश्रुतोऽभवत्। अयमादित्यवर्मा द्वितीयः। अनेन प्रतापिना महिशूरेण स्वकं स्वल्पं राज्यं संस्थाप्य नयविनयसमन्वितया धिया स्वप्रभावेण राज्यविस्तारन्च चकार।

अपराजितशेखराजो हि कोंकणस्य राजा आसीत्। स एव कोंकण-प्रदेशः यो हि बलेन पराशुरामेण समुद्रादधिगत्य तत्रस्थान् जनान् विप्रान् विधाय तेभ्यो दत्त इति पौराणिकीख्यातिः। अस्यापराजितशेखरराजस्य पत्नी उज्जयिनीनृपस्य कर्मसेनराजस्य पत्न्याः शाशाङ्कपुरराड्नन्दिन्याः कन्यासीत्। कोंकणोज्जयिन्योः पारस्परिकः प्रगाढ़ः सम्बन्ध आसीत्। कदम्बवंशरियो राजा कोंकणमाक्रम्य अपराजितशेलरराजं पराजितं कृत्वा कोंकणं स्ववशमकरोत्। अयं भीम आदित्यवर्मापरनामा सिन्धुदेशस्य राज्ञः साहाय्यमधिगम्य कदम्बवशीयं राजानं विजित्यं कोंकणं शेलरराजे दत्वा तं तत्र पुनः स्थापयामास। अनेन पौरुषेण त्यागेन चास्य सिंधुदेशाधिपैः सह मैत्री प्रगाढाभवत्। एतत्सविधमेव सागरे निमज्जन्तं जलपोतं कदम्बवंशीयैर्विलुण्ठ्य सिन्धुदेशाधिपतेर्महती

क्षतिः कृता। तेन सिन्धुराजो हि तेषु रुष्टोऽभवत् तत्राप्यसौ भीमस्तान् पराजित्य सिन्धुदेशाधिपतेः सहायतामकरोत्। एवमसौ चालुक्यकुलभूषणः स्वराजनीतेः प्रौटिं संस्थाप्य चालुक्यराजस्य विस्तारमकरोत्।

अस्मिन्नवावसरे हस्त्यश्वादीनां पीडकं सामुद्रिकं विशालं जन्तु विशेषं हत्वा तस्मात्तैलं निष्कृत्य, तस्य तैलस्याग्नौ प्रयोगः कृतः, प्रयोगे कृते तत्तैलात् प्रज्जवालितोऽग्निरशमनीयोऽभवत्। असौ भीमस्तत्तैलप्रयोगेणानेकानि राज्यानि विजित्य स्वदशमनयत्। कीर्तिरिववर्म यस्यासौ भीमश्चालुक्यानां पुनः राज्यस्य संस्थापकोऽभवत्।

अस्य पुत्रस्त तैलपः, तैलपस्य पुत्रो हि तृतीयो विक्रमादित्यः विक्रमादित्यस्य पुत्रो द्वितीयो भीम आसीत। अयं भीमः प्रथमभीमस्यादित्यवर्मणो द्वितीयस्य पुत्रः, अस्य द्वितीयस्य भीमस्य पुत्रस्तु अय्यणोऽभवत् अस्याय्यणस्य पत्नी कृष्णराजस्य कन्यासीत्। अय्ययणस्य पुत्रो चतुर्थो विक्रमादित्योऽभवत्। चतुर्थस्य विक्रमादित्यस्य गुणवती, धर्मशीलाः पतिव्रता पत्नी बोन्तादेवीति नाम्न्यासीत्। तस्याः पुत्रस्तु द्वितीयस्तैलपोऽभवत्। विक्रमादित्योऽसौ 919 शके वर्षे राज्यं तैलपाय प्रदाय स्वर्गमगच्छत्[63]। अयं विद्वान् नीतिमान् शस्त्रविद्यायां पारङ्गतः समराङ्गणे निहत्यान्यान्च राज्ञो विजित्य प्राज्यं राज्यमकरोत्। राष्ट्रकूटस्य राज्ञः कर्कस्य कन्या जाकब्बा तथा च ममासाख्यस्य कन्या लक्ष्मीरिति द्वेऽस्य पत्न्यावास्ताम्। महालक्ष्म्याः सत्याश्रयदशवर्माणौ पुत्रावभवताम्। सत्याश्रयोहि 930 शक्वर्षे पितुः प्राप्य नयने राज्यं कुर्वन् नानाविरुदविभूषित्ः—

अबलाबालविप्राणां घातकं चोलराजकम्।
विजित्यसमरे वीरश्चक्रे शान्तिन्च दक्षिणे[64]॥
अस्य पत्नी राज्ञी अम्बिकादेवी आसीत्। या हि—
अम्बिकेवाऽम्बिका देवी राज्ञी तस्य पतिव्रता।
सावित्री सा सत्यवन्तं सिषेवे स्वपतिं तथा[65]॥

राज्ञः सत्याश्रयस्य सन्तत्यभावादस्य भ्रातुः पुत्रोविक्रमादित्यो राज्यासममगृहीत। अयं पंचमो विक्रमादित्यः। दशवर्मणः पन्त्याः नाम भाग्यवतीत्यासीत्। अयं पंचमो विक्रमादित्यः भाग्यवत्याः पुत्र आसीत्। 940[4] शकवर्षं यादाद् राज्यं कृत्वा दिवङ्गतेऽस्मिन् अस्य भ्राता द्वितीयोऽय्यणो राजाभवत्। दशवर्मणः भाग्यवत्यास्त्र्यो विक्रमादित्यः अय्यणो जयसिंहश्च पुत्रा एकांकन्या अक्कादेवी चासन्। अक्कादेवी नीतिनिपुणा विदुषी चासीत्। अक्कायाः सहयोगेनासौ अयूयसणः जिजीवाऽय्यणनाम्ना केषुचिन्मासेषु राज्यमकरोत्। अस्मिन्नेव कालेऽस्य सहोदरो पंचमो जयसिंहो विद्रोहमकरोत्। योगिस्वभावो विरक्तमना अय्यणः कुलक्षयभयाद्राज्यं भ्रात्रे दत्वा वनं जगाम।

भ्रात्रे श्रीजयसिंहाय राज्यधूः परिकल्पिता।
येन स्यान्नात्र कलहो मा भवेद्वंशसंक्षयः॥

महाप्रतापी राजा पंचमो जयसिंहः 964 शकवर्षं यावद्रा ज्यं चक्रे। पितुर्युपरते चालुक्यानां राजा सोमेश्चरोऽभवत्। स हि 990 शकवर्षं यावद्राज्यं चकार। महापराक्रमी

राजायं मालवेन्द्रं भोजं जित्वा धारां निराधारामकरोत्।

महाप्रतापिनं भोजं जित्वा समरकर्कशम्।
धारां कुर्वन् निराधारां कम्पयामास भूतलम्[68]॥

अयं सोमेश्वरो हि चोलराजं डाहलस्थं कर्णराजन्च जित्वा जयस्तम्भान्। कारयामास। एवमसावेनेकान् राज्ञो विजित्य नीतिनिपुणस्तान् तत्रैव पुनः संस्थाप्य तथा च तान् सामन्तान् विधाय—

एवं विधाय सकलान् सामन्तान् राज्यपालकान्।
पालयामास राज्यं स्वं धर्मेण च नयेन सः[69]॥

अस्य सोमेश्वरः जयसिंहो विक्रमादित्यश्च त्रयः पुत्रा अभवन्। सोमेश्वरो-विक्रमादित्यः षष्ठोभवत् सोमेश्वरस्य पुत्रः सोमेश्वर इति चिन्त्यम्।

सोमेश्वरश्च प्रथमो विक्रमादित्यसंज्ञकः।
द्वितीयो जयसिंहश्च तृतीयः शकराज्ञया॥
अस्य शोधनमेवं कृते संगतिर्भवितुमर्हति—
सोमेश्वरस्य प्रथमो विक्रमादित्यसंज्ञकः।
द्वितीयो जयसिंहश्च तृतीयः शङ्कराह्वयः॥

एवं कृते सोमेश्वरस्य विक्रमादित्यो जयसिंहः शङ्करश्च त्रयः पुत्राअभवन्। सोमेश्वरो हि 997 शकवर्षं यावद्राज्यं कृत्वा दिवंगतः। ततो बलवीर्यसमन्वितो विक्रमादित्यो राजाभवत्। अस्य भ्राता षष्ठो जयसिंहोऽस्य राज्ये सामन्तपदं लेभे। विक्रमादित्यस्य पुत्रो हि सोमेश्वरः 1060 वर्षं यावद्राज्यमकरोत्।

तृतीयस्य सोमेश्वरस्य पुत्रः कमल्लोऽभवत्। कमल्लस्य भ्राता तृतीयस्तैलप आसीत्। अनयोः स्थितिस्तु 1072 शकवर्षेष्वासीत् तृतीयस्य तैलपस्य पुत्रश्चतुर्थः सोमेश्वरोऽभवत्। 1111 शकवर्ष यावदस्य स्थितिरासीत्।

द्वितीयतैलपपुत्रो दशवर्मा तस्य अक्कादेवी कन्या तथाच विक्रमादित्यः अय्यणो जयसिंहश्चत्रयः पुत्रा अभवन्। पंचमाद् विक्रमादित्यात् परमय्यणो राज्यासनमध्यतिष्ठत्। स्वभ्रातुर्जयसिंहस्य राज्यलौल्यजनितविद्रोहाद् कुलक्ष्यमाकलय्य विरक्तस्वभावोऽय्यणो राज्यं भ्रात्रे दत्वा वनमगच्छत्। जयसिंहोराभाभवत्। जयसिंहस्य परम्परा तृतीयसोमेश्वरं यावत् प्राचलत्। अय्यणो हि शान्तस्वभावो विद्याव्यासङ्गरुचिर्योगनिष्ठ आसीत्। स वनं गत्वा तपन् खगोलीयस्थितेरध्ययनमकरोत्।

यतो गिरावपि वने किन्चित् कालं निविश्य च।
चन्द्रतारकगत्योश्चाकरोत्सूक्ष्माभिवीक्षणम्॥
गणितज्योतिषोज्ञानात् खगोले कृतनिश्चयः।
विरह-अभी-हरा यो शोधितस्तेन धीमता॥
संशोधनं नवं शोधमकरोद्ग्रहजस्थितौ।
अन्योपपत्तीर्भूयाऽसौ खगोलेसमदर्शयत्॥

ग्रन्थेऽय्यण-नशा-संज्ञे स सर्वं संगृहीतवान्।
संस्कृते चानुवादेन सूर्यसिद्धान्तसंज्ञया॥
प्रसिद्धोऽभूदयं ग्रन्थो विद्वद्गणकसंस्तुतः॥

अनेन ज्ञायते यदसावय्यण एव सूर्यसिद्धान्तग्रन्थस्य मूलभूता कर्ता यो हि मूल ग्रन्थं प्राकृतभाषायामकरोत्। अस्य प्रपौत्रो गोविन्दराजः तं प्राकृतग्रन्थं वीश्यां संस्कृतभाषायां रूपान्तररितं कारयित्वा–'सूर्य सिद्धान्त' इति प्रसिद्धमकरोत्[70]। अस्य चन्द्रदेवाइकदेवकतियारदेवनरसिंहेदेवाश्चत्वारः पुत्रा अभवन्। चन्द्रदेवादीनामेका भगिन्यसीद्यस्याः विवाहो हि कोंकणस्थेन कदम्बवंशीयेनेष्टदेवेन साकमभवत्। अय्ययणस्य भगिनी विदुषी नीतिनिपुणा अक्का कदम्बवंशीयस्य षष्ठदेवस्य राज्ञी आसीत्। अक्कादेव्याः पुत्र जयकेशी कदम्बवंशे प्रतापी पुरुषोऽभवत्। अनेनैव जयकेशीकदम्बेन गोवापट्टं राजधानी कृता। सोमेदेवा हि अक्कायाः सापत्नपुत्र आसीत्। सहि निजया मात्रादिष्टः स्वसुतां नाम्ना रूपमतीं कांकणस्थग्रामैः बहुधनवैभवैश्च सत्ता चालुक्याय चन्द्रदेवाय प्रादात्। अतः परमयं चन्द्रदेवो हि राज्ञां पङ्क्तौ समारूढः सन् स्वशासनकालेऽसावनेकानि लोकहितसाधकानि कार्याण्यमकरोत्। द्वितीयपुलकेशिनः पुत्रेण चन्द्रादित्येन कृतस्य चन्द्रदुर्गस्य (चांदवाडादुर्गस्य) चन्द्रदेवोऽयं जीर्णोद्धारं कारयित्वात्रैवात्मस्थितिं सुदृढामकरोत्।

चांदवाऽस्य दुर्गेऽपि स्वामित्वं तस्य कारितम्।
तेनाऽयं चन्द्रदेवोऽपि राजपुत्रसमोऽभवत्॥
पूर्वमासीद्धि दुर्गोऽयं चन्द्रादित्यस्य सन्निधौ।
ज्येष्ठपुत्रस्य धीरस्य राज्ञः श्री पुलकेशिनः॥
जीर्णोद्धारं चन्द्रदेवस्तस्य दुर्गस्य चाकरोत्।
तत्रैव न्यवसत् सार्धं दाराभिः प्रीतमानसः[71]॥

अय्यणद्वितीयस्य द्वितीयः पुत्रो हि आइकदेव आसीत्। सूवीप्रान्तो धारानगर्याः समीपे वर्तते। सूवीप्रान्तोऽयं गंगवंशस्यासीत्। तैलपद्वितीयेन प्रदेशोऽयं गंगवंशं जित्वा स्ववशे कृतः। आइकदेवोऽत्रैव दुधोगिरावुवास। अतः परमयं बंकीदेवकृते बंकापुरे वासमकरोत्। अय्यणस्य तृतीयः पुत्रः कतियारदेव आसीत्। अस्य मातुलः सेनानन्दकुलकीर्तिभूतः महामण्डलेश्वरः सन्दक आसीत्। सेंदको वीरपुरुषाय स्वभागिनेयाय कोंकणस्थौ साममदुर्गनेरुरादुर्गौ सप्ततिग्रामांश्च दत्वा सुस्थिरमकरोत्। 817 शके वर्षे भूदेवे स्वनाम्ना निर्मितं पश्चाच्च शेलरवंशीयेन भोजदेवेन पन्चदशदुर्गणामधिपेन 1115 वर्षे तस्य जीर्णोद्धारः कृतः, अनेन भोजदेवेन स्वकन्या कामदेवाय दत्ता, अस्मिन् कन्याविवाहेऽसौ भोजेदेवशेलरः यौतकरूपेण कामदेवाय बंकीदेवापरनाम्ने दत्तवान्। अतः प्रभृतौ शकसंवादष्टादशं यावद्धि अत्र चालुक्यानामधिपत्यमासीत्। चतुर्थो नपरसिंहदेवोऽय्यणस्य पुत्रः, यो हि नरसूदेव इति नाम्ना ख्यातोऽभवत्। अस्य नीतिनिपुणस्य मैत्री शिंदियाराजेनाभवत्। अयं हि शिंदियाराजस्यामात्यपदमलन्चकार।

द्वितीयस्याय्यणस्य ज्येष्ठः पुत्रश्चन्द्रदेव आसीत्। चन्द्रदेवाद्धि हर पालदेवोऽभवत्। असौ कोंकण एव वर्तिं चकार। हरपालदेवाद् गोविन्ददेवसोमदेवाभवताम्। सोमेदेवस्य पुत्रोऽभवद्रुद्रदेवः।

तृतीयस्य तैलपस्य पुत्रस्तृतीयः सोमेश्वरस्तथाहरपालस्य पुत्रः सोमदेवस्तत च अग्रे ये राजानोऽभवन् ते नयविहीनाः निर्बलाश्चाभवन्, तस्मात्तद्राज्यस्य विजल्लासंज्ञकेन सेनापतिना 1239 शके वर्षे चालुक्यराज्यं[72] स्वायत्तीकृत्य स राजा भूत्वा कल्याणीं स्वराजधानीमकरोत्। लिंगायतस्य बसवस्य भगिनी पद्मावती विजल्लेत्यस्य पत्न्यासीत्। बसवो हि भगिनीपतिं विजल्लानामकं विषप्रयोगेण जघान। स बसवो हि बल्लालेन हतः। चालुक्यानां कल्याणी राजधानी बल्लासेन गृहीता। अस्मिन् विपरीते काले तृतीयस्तैलपो हरपालदेवस्याश्रये कोंकणे न्यवत्। होसालवंशीयैयादववंशीयैश्च मिलित्वा बल्लालं विजित्य 1278[73] शके वर्षे कल्याणी स्वायत्तीकृता।

अय्यणस्य प्रपौत्रो वेटुंगी, असावेव गोविन्ददेवः, विद्वान्नसौज्योतिषे, प्रपितामहेनाय्यणेन कृतान् नाविष्कारान् प्रकाशमानीतवान्। दुष्टैर्घातितस्य गोविन्ददेवस्य पुत्रो बंकिदेव आसीत्। अयं हि बंकापुरमस्थापयत्। अस्य पुत्रश्चन्द्रदेवः, सोऽपि दुष्टैर्घातितः। चन्द्रदेवस्यपुत्रः कामदेवोऽभवत्। असौ कल्याणीमध्यतिष्ठत्। अस्य सूनुः सोमेश्वरः, अयं चतुर्थः सोमेश्वरः, असौ चतुर्थः सोमेश्वर एव कर्णदेव इति नाम्ना सुख्यातोऽभवत्। अस्य पत्नी शिंदेवंशजाता श्रीदेवी ह्यासीत्। यादवानां राजा महादेवो जि चालुक्यानामन्याषान्च चालुक्यसमर्थकानां प्रतिद्वन्द्वी कर्वदेवस्योपर्याक्रमणमकरोत्। तद्भयाद्भीतोऽसौ पोतमारुह्य सपरिवारं गोवाप्रान्तं प्रस्थित सागरस्य मध्ये निमग्नोऽभवत्। तस्य साहसेन तुष्टो महादेवोऽसावस्य साहाय्यं कृत्वा बंकापुरमानीय संरक्षणमकरोत्।

देवगिर्यां महादेवो नृपः कोंकणमण्डले।
यादवान्वयजातस्तु चर्कर्त्याक्रमणं भृशम्॥
राज्यत्रयस्य साहाय्याच्छ्रेष्ठभूमिभृतां बलात्।
रसवेदाग्निचन्द्राख्ये (1346) शके तुं समुपाद्रवत्॥

कर्णदेवस्यानुजो वीरभद्रेश्वर आसीत्। राजा गणपतिस्तस्य द्वेकन्यके एवास्ताम्। यादवराजमहादेवद्भीतः गणपतिर्वारङ्गले राजधानीमकरोत्। गणाम्बारुद्राम्बयोः रुद्राम्बां वारङ्गलस्य शासिका, स गणपतिस्तां चालुक्येन वीरभद्रेश्वरेण विवाह्य वारङ्गलस्य राज्यं ताभ्यामदत् महादेवस्य भीत्या वीरभद्रेश्वरोऽपि तामेव रुद्राम्बां शासिकामकरोत् 1182 शक सविधौ रुद्राम्बैव शासिकासीत्[75]। वीरभद्रेश्वरेण विवाहिता रुद्राम्बा रुद्रदेव इति नाम्ना वारङ्गलस्य शासनमकरोत्।

अतः स्त्री तस्य रुद्राम्बा रुद्रदेवेति संज्ञया।
चकार सकलं राज्यकार्यं भर्त्रानुमोदिता[76]॥

सिंहणभूपतेः द्वितीयस्य जयतुङ्गिनः कनिष्ठः पुत्रः शाङ्र्गपाणी ज्येष्ठस्तु कृष्ण आसीत्। पितृव्यस्य राज्यासनेऽधिष्ठितं कनिष्ठं भ्रातरं कृष्णः महादेवस्य दुरभिसन्धिना

राज्यच्युतमकरोत्। स शाङ्र्गपाणी वीरभद्रेवरस्य शरणमाय्यौ। वीरभद्रेश्वरस्य प्रभावात् शाङ्र्गपाणिने पानुङ्गलस्य राज्यं पुनः प्रादात्। कार्येणैतेनासन्तुष्ठो महादेवो वारङ्गलमाक्रम्य 1139 शके वर्षे रुद्राम्बामजयत।

देवगिर्या यादवस्य पश्चात् सिंहणभूपतेः।
जैतुङ्गिनो द्वितीयस्य राज्यमासीत् सुविस्तृतम्॥
कनिष्ठस्तस्य पुत्रोऽयं शाङ्र्गपाणीति विश्रुतः।
राज्यं चकार मतिमान् स्वपितृव्यस्य धर्मतः।
ज्येठभ्रात्रास्य कृष्णेन महादेवयुतेन च।
शाङ्र्गपाणी राज्याकार्याद् बलादेव पृथक्कृतः॥
शाङ्गपाणी राज्यहीनो वीरभद्रेश्वराश्रये।
प्राप्तवान् तत्प्रभावेण राज्यं पानुङ्गले तदा॥
तेन कद्धो महादेवो यादवो सन्तताक्रमैः।
नन्दरामाग्निचन्द्राख्ये रुद्राम्बामजयच्छके[77]॥

रुद्राम्बायाः कन्या मुम्मदाम्बासीत्। मुदाम्बायाः पुत्रः प्रतापरुद्रः, रुद्राम्बा चालुक्यस्य वीरभद्रेश्वरस्य पत्नी दौहित्रं प्रतापरुद्रं दत्तकविधानेन पुत्रं कृत्वा राज्यस्याधिकारिणमकरोत्। मार्कोपोलो इत्यस्यागमनकालेरुद्राम्बा शासिकासीत्। स स्वयात्रवृत्तवर्णनेऽस्याः बहुशः प्रशंसां कृतवान्।

कामदेवस्य सोमेश्वर (कर्णदेव) वीरभद्रेश्वरनरेन्द्रदेवास्त्रयः पुत्रा आसन् तेषु नरेन्द्रदेवो हि कनिष्ठ आसीत्। नरेन्द्रदेव एव व्याघ्र देव इति नाम्नापि प्रसिद्ध आसीत्। अस्य नरेन्द्रदेवस्य मङ्गुदेवकेशवदेवकामदेवास्त्रयः पुत्रा अभवन्। मङ्गुदेवकेशवदेवकामदेवाः अय्यणतोह्यष्टमाः पुरुषा आसन्।

पन्चमस्य सोमेश्वरस्य सूनुरभवत् कामदेवः। कामदेव एव द्वितीयो बंकिदेवः, स हि कामदेवोऽपि द्वितीय एवाभवत्। प्रथमस्य कामदेवस्य पुत्रेषु सोमेश्वरस्य पुत्रः कामदेवस्तथा च नरेन्द्र देवस्यापि पुत्रः कामदेव एव। एवमत्रेदानीं कामदेवस्य पौत्रौ कामदेवावेव[78]।

कदम्बवंशीयस्य पुरन्दररायस्य पुत्र्या पद्ममालया सार्धं द्वितीयस्य बंकिमदेवस्य विवाहेऽभवत्। कदम्बवंशे सैवाधिकारिण्यासीत्। वीरभद्रेश्वरस्य दत्तकः पुत्रः प्रतापरुद्रो हि महाप्रतापी राजासीत्। तेन प्रेम्णा स्ववंशीयाय बंकिदेवाय कल्याण्याः परितो ग्रामा उपभोगार्थं प्रदत्ताः। बंकिदेवस्य पुत्रो हरपालदेवः। यादवानां राजा रामदेवः, स हि स्वकन्यां हरपालदेवाय ददौ। यादवराज्स्य रामदेवस्य पुत्रः शङ्करदेवः, स हि हरपालदेवस्य श्यालक आसीत्। यादवेन रामदेवेन दिल्ली प्रशासनस्य करं रुद्यते स्म, तेन रुष्टः दिल्लीसुलतानो हि ससैन्यं मल्लिककफूरं करग्रहणार्थं प्रैषयत्। तयोर्मध्ये देवगढ़दुर्गे युद्धमभवत्, तस्मिन् यद्धे मल्लिककफूरो हि 1390 शके वर्षे शङ्करदेवमहन्। अस्मिन् विपरीते काले हरपालदेवः यादवराजस्य साहाय्यं कृत्वा राज्यादिकं ररक्ष। दिल्ली शासनाधिपतिर्मुबारको ह्येनमाक्रम्य युद्धे विजित्य च 1376 वर्षे तस्य शिरश्छित्वा

देवगिरिदुर्गस्य मुख्यद्वारे लम्बितं तदकरोत्।

अङ्कचन्द्राग्निचन्द्राख्ये शके दुष्टैस्तु तच्छिरः।
मुख्यद्वारे देवगिर्या दुर्गे लम्बितमन्ततः॥

अत्र हि अङ्कचन्द्राग्निचन्द्राख्ये (1319) इत्यस्य स्थाने रसाङ्करामचन्द्राख्ये (1396) इतीतिवृत्तेन सामंजस्यमावहति। नारायणदेवो वीरदेवः शक्तिदेवश्चेति त्रयो हरपालस्य पुत्राः, सर्वे वयसा लघीयांस, ते हि सौभाग्य देवेन पालिताः सौभाग्यदेवो हि कर्णदेवस्य भ्राता, कर्णदेवश्चालुक्यः गुर्जराणामीश्वर आसीत्। असौ हि हरपालपक्षेण रामदेवपक्षेण च शासकेन तुरूष्केणालाउद्दीनेन युद्धे पराजितः 1391 शर्के वर्षे प्राणदण्डेन दण्डितोऽभवत्[79]। हरपालस्य ज्येष्ठः पुत्रो नारायणदेव कल्याण्यामेव तथा च वीरदेवशक्तिदेवौ कर्नाटके स्वस्थितिमकुर्वन्।

कालोऽयमधुना भारते देशे हिन्दुराजानां पराभवस्यासीत्, अनेके तुरुषकाः देशमाक्रम्यात्र स्वस्वशासनस्य स्थापनाय कृतप्रयत्ना आसन्। दक्षिणभारतस्य स्थितिस्त्यतिविषमेदानीमासीत्।

समयेऽस्मिन् महानासीद्धाहाकारस्तुदक्षिणे।
स्थापनं प्रथमं तत्र जातं राज्यस्य पापिनाम्॥
भयाक्रान्तोऽभद्देशो स्वार्थान्धैः समुपस्थितौः॥
हिन्दूनां घातनं तेषां धर्मस्य परिवर्तनम्॥
होसालकाकतीयानां पाण्ड्ययादवभूभृताम्।
सुसमृद्धानि राज्यानि नष्टानि कलहान्मिथः[80]॥

अस्मिन्नेवं भूते विप्लवमये समये दक्षिणे ब्रह्मनशाहस्यालउद्दीनस्य महानुदयोऽभवत्, एवन्च दिल्लीशासकस्य खिलजीवंशस्य नाशादगयासुद्दीनतुगलकस्य दिल्लीराजधान्यां समुदयोऽभवत्। एवं भूतां स्थितिमवलोक्य नारायणदेवो हि हरपालदेवस्य ज्येष्ठःपुत्राऽसौ ब्रह्मशाहस्यालाउद्दीनस्य पक्षमगृहीत्[81]।

अयं नारायणदेवः नयबलेन स्वशासनस्थीरीकरणाय यावज्जीवनं प्रायतत्। 1434 शकसंवत्सरेऽयं नयुधुरीणो नारायणदेवो दिवङ्गतः। अस्य शक्तिदेवगोगीदेव-कोण्डिबादेवविशालदेवाश्चत्वारः पुत्रा आसन्। तेषु शक्तिदेवगोगीदेवौ 1440 शकवर्षे बहादुरखाननाम्ना सार्धं युद्धं कुर्वन्तौ वीरगतिं गतौ[82]। 1445 शकवत्सरे विजयनगराधिपबुक्कमुहम्मदतुगलकयोर्मध्ये यदभवद्युद्ध तस्मिन् बुक्कपक्षे[83] युद्धं संचालयन् नारायणदेवस्य भ्राता वीरदेवो वीरगतिं लेभे[84]। नारायणदेवस्य पुत्रेषु कोण्डिबादेवो वीरविक्रान्तनीतिविचक्षणः पुरुषोऽभवत् कोण्डिबादेवस्य पुत्रस्तु तुकदेव आसीत्। स्वकारस्यकन्यकां परथालामधिकृत्या बुक्कफिरोजशाहयोर्मध्ये युद्धे कोण्डिबादेवविशालदेवौ महतीं दुर्दशां समुपागतौ।

युद्धेऽस्मिन् कोण्डिबादेव भ्राता गोविन्ददेवकः।
तथा विशालदेवोऽपि दुर्दशां समुपागतौ॥

आसीद् गोविन्ददेवस्तु कोंकणे मण्डलेश्वरः।
ररक्ष कोण्डिबादेवपुत्रमापद्गतं तदा॥
नाम्ना स तुकदेवश्च सुखदेवं स्वपुत्रवत्।
पुत्रोहरणदेवस्य मानकश्चेति विश्रुतः[85]॥

विनयदेवः कटियारदेवश्च तुकदेवस्य सूनुरास्ताम्। एतावपि विजयानगरस्याधिपतेः बुक्कस्य पक्षपातिनतावेवाभवाताम्। 1495 शकवर्षे फिरोजशाहो हि पाङ्गुलराज्यमाक्रमत्। पाङ्गुलदुर्गोऽसौ वाराङ्गलस्य आयत्तमासीत्। वारङ्लस्य राज्ञा विजयदेव-विनयदेवकटियारदेवानां सम्मत्या फिरोजशाहेन योद्धुं सन्धिः कृता। नारायणदेवस्य भ्राता वीरदेवस्तस्य पुत्रः गोविन्ददेवः, यो हि कोंकणे मण्डलेश्वर आसीत्, तस्य पुत्रो हि सुखदेवः, सुखदेवतुकदेवौ समानवस्कौ, सुखदेवो हि रुद्रप्रतापनाम्ना यादवानां राजाभवत्। अयं फिरोजशाहं परास्तं कृत्वा स्ववंशीयान् चालुक्यान् पुनः संस्थायत्। 1500 शके गुलबर्गस्य युद्धे तुकदेवस्य पुत्रो विनयदेवः वीरगतिं सम्प्राप्य दिवंगतः। कोण्डिबादेवस्य प्रपौत्रः कोण्डिबादेवस्य पुत्रस्तुकदेवस्य पौत्रस्तवाजीदेव आसीत्। अहमदशाहः 1510 शके वर्षे दशवर्षीयं तवाजीदेवमानीय गुलबर्केऽधिकारमदात्।

खाब्जबाणशशीशाके कोण्डिबादेवबालकः।
आनीतो दशवर्षीयो गुलबर्गे क्रमात्ततः॥
नियाजितश्च प्रेम्णासौ पदे हि सरनोबते।
ततः परं तस्य नाम तवाजीत्यभवत् किल[86]॥

अहमदशाहो हि तेलङ्गानाप्रदेशं पुनराक्रम्य 1502 शकवर्षेऽगृहीत् अस्मिन् युद्धे सुखदेवः प्रतापरुद्रापरनामा स्वपुत्रेण केशवदेवेसहदेव दिवंगतः[87]। 1515 शकवर्षे अलाउद्दीनअहमदशाहस्यदेशाद् तत्सेनापतिर्दिलावरखानो हि दक्षिणं कोंकणादिप्रदेशं समाक्रमत्, तत्र मराठानां राजा सुखे इति नाम्ना विश्रुतस्यस्यावरोधं कृत्वा तस्य बहुक्षतिं चकार[88]। 1521 शके वर्षे विजयानगरस्य राजा देवरायः शंकुदेववीरदेवाभ्यां मंत्रणां कृत्वा रायचूरमुङ्गलप्रदेशग्रहणार्थं तुरुष्कान् रुरोध। परन्त्वत्र भारतीयाः पराजिता मुङगलन्तु अलाउद्दीन-अहमद शाहस्यदेशाद् तत्सेनापतिर्दिलावरखानो हि दक्षिणं कोंकणादिप्रदेशं समाक्रमत् तत्र मराठानां राजा सुखे इति नाम्ना विश्रुतस्तस्यावरोधं कृत्वा तस्य बहुक्षतिं चकार। 1521 शके वर्षे विजयानगरस्य राजा देवरायः शंकुदेववीरदेवाभ्यां मंत्रणां कृत्वा रायचूरमुङ्गलप्रदेशग्रहार्थं तुरुष्कान् रुरोध। परन्त्वत्र भारतीयाः पराजिताः मुङ्गलन्तु अलाउद्दीन-अहमदस्याधिकारे गतम्। अतः परं यद् बंकापुरे युद्धमभवत् तत्र कोण्डिबादेवकटियारदेवौ द्वावपि चालुक्यवीरो वीरगतिं गतौ। कोण्डिबादेवस्य तवाजीकमलोजीस्कन्ददेवमालोजीतिचत्वारः पुत्रा आसन्। कोंकण-काननस्य युद्धे कोण्डिबादेवस्य भ्रातरौ शङ्कुदेववीरदेवौ तु मुद्यैव कालकविलितावभवताम्। मालोजीकमलोजीतिचा लुक्यौ भ्रातरौ कोण्डिबादेवस्य पुत्रौतौ हि 1551 शके वर्षे गोवाप्रान्तस्य प्राप्त्यर्थं प्रयत्नं कुर्वन्तौ साफल्यं नैव लेभाते। कमलोजीत्यस्य पुत्रो

नरसोजी अभवत्। अयं द्वितीयो नरसोजी प्रथमस्तु अय्यणस्य पुत्रो नरसिंहदेवोऽपि नरसोजीति नाम्ना प्रसिद्ध आसीत्। अयं द्वितीयो नरसोजी नयविनयसम्पन्नो विचक्षणः पुरुष आसीत्। सो ह्युभाभ्यां पक्षाभ्यां सुसम्बन्ध विधाय स्वराज्यस्य प्राप्तौ प्रायतत्। अस्मिन्नुद्योगेऽप्यमांशिकमेव साफल्यं सम्प्राप्य पुनरसौ नरसोजी विजयनगराधिपतेः पोर्तगालिनां, स्ववंशीयानां सम्बन्धिनान्च साहाय्यं संग्रह्य गोवाप्रान्तं स्वायत्तमकरोत्। 1588 वर्षे गोलाप्रान्त कमलोजीत्यस्याद्यकारेसमागच्छत्। अतः परमादिलशाहो गोवाप्रान्ते समाक्रमणमकरोत्। मल्हाररावो हि कमलोजीत्यस्य पुत्रः, स हि युद्धेऽस्मिन् पुर्तगालिनां साहाय्यमकरोत्, तेन पुर्तगालदेशीयाः गोवाप्रान्तं जित्वा प्रान्तस्यायस्य चतुर्थांशं कम्मोजीत्यस्मै ह्यदुः। कम्मोजीत्यस्य सहोदरस्तु अप्पाजी, स विजयनरगस्य सेनायां मिलितोऽभवत्। अनया रीत्या बुर्हानशाहनिजामस्तु कल्याण्या अर्धं स्वत्वं कम्मोजी-अप्पाजी-इत्यनयोरिति स्वीकृतम्। साबाजी-तिम्मोजी-मल्हारराव-बंकोजी-ज्योतियाजी-येमतराव-माधोजी-तुकोजी-वेलप्पाराव-नानाजी-राजूजी-मङ्गूजी-खण्डोजीत्येते चालुक्यवंशजाः भारतीयराजनीतौ चलुक्यवंशसूर्यस्यास्ताचलगमनकाले सम्भूताः पुरुषा आसन्। चालुक्यवंशसूर्यो हि भारते प्रायेण द्विसहस्रवर्षाणि यावज्जीवनं प्रदाय स्वलीलापरिसमाप्तिमकरोत्। धन्यास्ते चालुक्याः यैर्लोका नामनुरन्जनाय राष्ट्रधर्मयोः संरक्षणाय सततं प्रयत्नशीलैर्नैकानि दुःखानि सोढ्वा सदाचारमार्गस्य सततमनुसरणं कृतम्।

## सन्दर्भ


1. काव्यप्रकाशः –1/4
2. काव्यालंकारः–1/16
3. काव्या. सू. 1/1
4. काव्यालङ्कारः–रुद्रट-2/1
5. हेमचन्द्रालङ्, काचू.
6. वाग्भटालंकारः–1/2
7. विधानायस्य प्रतापरुद्रयशोभूषणम्
8. विधायरस्यैकावली
9. दण्डिकाव्यादर्शः–1/9
10. राजशेखरकाव्यमीमांसा
11. साहित्यदर्पण6/313-317
12. जयदेवचन्द्रालोकः 1/7
13. पण्डितराजजगन्नाथरसगङ्गाधारः
14. सा. द. 6/1
15. तदेव 6/315
16. तदेव 6/320
17. चा. अ. वं. का. 8/1-6

18. चा. अ. वं. का 8/8'9
19. तदेव 8/11
20. तदेव8/12-13
21. तदेव8/13-22
22. सा. दा. 6/318
23. तदेव 6/318
24. सा. दा. 6/316
25. सा. दा. 3/32
26. तदेव3/31
27. अमरकोषे-2/7/5-6
28. चालुक्यराज-अव्यणवंशचरिते महाकाव्ये-7/27
29. चालुक्यराज. 1/9-14
30. तदेव 1/15
31. चालुक्यराज. 1/21-22
32. तदेव 1/24-25
33. चालुक्यराज. 2/3
34. चालुक्यराज. 15/17
35. तदेव 1/9
36. चालुक्यराज-1/12
37. तदेव 1/10
38. चालुक्यराज. 1/62-64
39. तदेव 1/65
40. चालुक्यराज. 1/66
41. तदेव 2/17-18
42. चालुक्यराज. 2/38
43. चालुक्यराज-2/45
44. तदेव 3/2
45. तदेव 3/3
46. तदेव 2/42, 3/5
47. तदेव 3/1, 3/5
48. चालुक्यराज. 3/6-7
49. तदेव 3/8
50. चालुक्यरा5. 3/15-17
51. तदेव 3/28
52. तदेव 4/7
53. तदेव 4/11
54. तदेव 4/12
55. चालुक्यराज. 3/9,3/27, 4/13
56. तदेव 4/16-17
57. चालुक्यराज. 4/34-36

58. तदेव 1/37-38
59. तदेव 4/44
60. चालुक्यराज. 4/49
61. तदेव 5/7-8
62. चालुक्यराज. 5/14
63. चालुक्यराज. 6/36
64. तदेव 7/12
65. तदेव 7/13
66. तदेव 7/20
67. चालुक्यराज. 7/27
68. तदेव 7/44
69. चालुक्यराज. 7/47
70. चालुक्यराज. 8/12-18
71. तदेव 9/4-6
72. चालुक्यराज. 9/22
73. तदेव 9/28
74. चालुक्यराज. 9/48-49
75. तदेव 9/60
76. तदेव 9/64
77. चालुक्यराज-9/60
78. चालुक्यराज. 10/32
79. चालुक्यराज. 10/24
80. चालुक्यराज. 10/39-41
81. तदेव 10/43
82. तदेव 11/11
83. चालुक्यराज. 11/11
84. तदेव 11/31-40
85. तदेव 12/20-22
86. चालुक्यराज. 12/70-71
87. तदेव 12/72-73
88. तदेव 13/1-3

# प्रथमोऽध्यायः

## चालुक्यराज-अय्यण-वंशचरितस्य महाकाव्यस्य वृत्तकथा

**तत्र मङ्गलाचारः**

आनानन्दसन्दोहदायकं गणनायकम्।
वन्दे वन्दारुमन्दारमिन्दुभूषणनन्दनम्॥ (1)

शरदा शारदाम्भोजवदना वदनाम्बुजे।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्। (2)

नमस्त्रिभुवनोत्पत्तिस्थितिसंहारहेतवे।
विष्णवेऽपारसंसारभारोत्तरणहेतवे॥ (3)

सदसत्वेन भावनां युक्ता याऽद्वितयी स्थितिः।
तामुल्लङ्घ्य तृतीयस्मै नमश्चित्राय शम्भवे॥ (4)

चन्द्रानार्धदेहाय चन्द्रांशुसितमूर्तये।
चन्द्रार्कानलनेत्राय चन्द्रार्धशिरसे नमः॥ (5)

ग्रन्थकर्ता ह्यात्मनोऽध्येतृणान्च ग्रन्थविनिर्माणे स्वाध्याये च समागमिष्यमाणानां विघ्नानां विच्छेदनाय मङ्गलविधायकान् देवान् संस्कृत्य चालुक्यराजाय्यणवंशचरितं नाम काव्यं चिकीर्षुः काव्यस्य कथावस्तु समारभते—

विश्वविख्याता विश्वेश्वरस्य नगरी काशीवरीवर्तते शिवस्य त्रिकण्टके। आनन्दकाननभूमौ स्थिता सा विद्यायाः भूमिः। अविद्याविषयपराङ्मुखाः विद्यामात्र विषयाः ऋषभो मुनयः मोक्षकामाः सततं सेवन्ते वृषभध्वजस्य भूमिमिमाम्।

पुराकालेऽत्रैव काश्यां कोऽपि विद्याया अमृतभूतं तत्वं बुभुक्षु-मोक्षकामनया विदुषः शिष्यान् पाठयन् मुनिरेको न्यवसत्। ध्यानस्थः स एकदा समाधावेव तारस्वरं

जहास। इममभूर्वं वृत्तं निर्धार्य चालुक्यकुलसम्भवः कश्चिच्छिष्यः विस्मितः सन् समाधितः गुरोः समुत्थानस्य बेला प्रतीक्षमाणः तस्थौ रहस्य ज्ञानाय। जाज्वल्यमानमुखण्डलो गुरुः चक्षुषी प्रोन्नमील्य भगवन्तं स्थितएव चालुक्यकुलभूषणः तस्य प्रियशिष्य तद्रहस्यं पपृच्छ। तस्य तद्वचनैः स्मयमानः स तपस्वी तमाह। तदाचारीविद्याविभूषिताः यूयं जगतो वृत्तमवगच्छन्त्येव। अस्मिन् जगति बहवो वंशा अभवन् ते हि कुलाचारभ्रष्टाः लयंगताः। अत्र हि परमसत्तायाः पाटवमकथनीयमेव। तस्याः सर्वा विधित्सा विचित्रा स्वतन्त्रा च वरीवर्तते। तस्य भगवत एव परानुकम्पा चालुक्यानां वंशः प्रचलति ययाद्यापि भारते। समाधौ तदेव वृत्तमहं दृष्ट्वा विस्मयगच्छम्। महाकालप्रवाहे प्रविलीनेषु तेषु तेषु वंशेषु सदाचारकुलाचारधर्माचारभूषणः सत्साधुद्विजदेवगवां सेवाव्रतव्रती चालुक्यवंशोऽद्यापि जीवतीति मे हर्षविस्मयोः रहस्यम्।

प्रियेण शिष्येणानुचरेण च भूयोभूयः प्रार्थितस्तपस्वी देशरक्षा व्रतैकनिष्ठः गुरुस्तं सर्वं चालुक्यवंशवृत्तं श्रावयामास पूतचरितं परमेश्वरपरायणं साधु पुराणेषु ख्यातम। विष्णोरंशभूतश्चालुक्यवंशो भुवि वैष्णवो वंशः, अत्र जातानामिमितिवृत्तं स्वराष्ट्रजं राष्ट्रप्राधान्यपरिपूतमित्यवगच्छन्ति बुधाः।

जगतः कारणं विष्णुरेव, तस्य नाभिकमलाज्जातो ब्रह्मा, ब्रह्मणो मानससूनुरभवदत्रिः, अत्रेः कुलोद्भवः सोमः, सोमस्य पुत्रो बुधः, तद्वंशः पुरुरवा, तत आयुः, तस्मान्नहुषः, नहुषाद्ययातिः, ततः पुरुषस्तत्रैव च जनमेजयः, जनमेजयात् प्राचीशः, प्राचीशात् सैन्ययातिस्तस्मद्धयपतिः, हयपतेः सार्वभौमः, सार्वभौमाज्जयसेनोऽभवत्। जयसेनाद् देशानकक्रोधननौ सुतौ जातौ, देशानकाद् देवकिस्तस्मात् क्रमुकः, क्रमुकादक्षकस्ततो मतिमतां वरः कात्यायनस्तस्मान्नीलदुष्यन्ताः क्रमतोऽभवन्। भरतस्य भूपमन्युः, भूपमन्योः सुहोत्रः सुहोत्रादधती तस्माद्विरोचनः, विरोचनादजामिलतस्मात् संवरणोऽभवत्। संवरणस्य सुतो सुधन्वासीत्। सुधन्वनो भीमसेनोऽभवत्। भीमसेनसुतः प्रदीपन आसीत्। प्रदीपनस्य पुत्र शान्तनुस्तस्माद् विचित्रवीर्यो विचित्रवीर्यात् पाण्डुः, पाण्डोः पुत्रोऽजुनोऽभवत्। अर्जुनस्याभिमन्युरभिमन्योः परीक्षित्, तस्माज्जनमेजयः, जनमेजयात् केमुकः, केमुकान्नरवाहनः, नरवाहनस्य सुतः शतानीकोऽभवत्। शतानीकादुदयनोऽभवत्, यस्य विद्यया, बलेन, पराक्रमेण, राजनीत्या समुज्जवलयशसा च भूषितं भारतं भुवि भारतमभवत्। महामहिमाशालिन उदयनादेकोनषष्ठिराजानोऽभवन्। एषु राजसु एव चालुक्य आसीत्।

अत्रावधारयन्तु विद्वांस एव यूयम्। एतत् पूर्वं हि दक्षिणे भारते एकोनाशीति नीतिनिपुणाः राजानस्ते राज्यं चक्रुः। तेषु दक्षिणभारतशासकेषु चालुक्यवंशीयेषु राजसु अशीतिसंख्याको राजा कोल्हालोऽभवत्। यः कोलहापुरं नगरं कारयामास। तस्य कीर्तिभूतं कोल्हापुरमद्यापि महाराष्ट्रं प्रान्तं भूषयति यत्र स्थिता जगदम्बा जनानां योगक्षेमं निर्वहति।

एवंभूतायां राजपरम्परायामेव जाताः कोल्हालवंशीयाः कालान्तरमयोध्यायां समागत्य तत्र राज्यं चक्रुः। अस्यामेव परम्परायामयोध्यायां चित्रकर्णविजयादित्यौ राजपुत्रौ जातौ,

तयोर्मध्याच्चित्रकण्ठेन भर्त्सितः विजया दित्यः देशस्य दक्षिणे भागे पुनरगच्छत्।

(2)

विजयादित्यो हि चित्रकण्ठस्य भ्राता, सदाचारपरायणः सत्कर्मधर्मनिष्ठः स्वभ्रात्रा चित्रकण्ठेन विमानितो नीतिमान् स कुलपरम्पराप्राप्तामयोध्याराजधानीं परित्यज्य दक्षिणमाययौ। ततः समागत्य स्वबान्धवैः इन्दुवेदेशनेत्राख्ये वर्षे (341) तत्र माहेश्वरमन्दिरस्य समीप एकस्मिन् ग्रामे वसतिं चकार। नर्मदायास्तटे अजन्तायाः भूभागे तदानीं पल्लवान्वयस्य राज्यमासीत्। स हि पल्लवानां राजा नीतिमान् धर्मपरायणश्च त्रिलोचन आसीत्।

विनाशकाले बुद्धिर्हि विपर्ययं गच्छति। तथाभूतं धर्मनिष्ठं, प्रजानुरन्जनलब्धयशसं पल्लवानां राजानं त्रिलोचनं स विजयादित्यः समाक्राम्यत्। अत्र तयोर्मध्ये घोरं युद्धमभवत्। ततस्तस्मिन् युद्धे विक्षतशरीरो गर्भभाराक्रान्तां भार्यां गृहीत्वा ततः पलायितो तपस्विनं वेदवेदाङ्गतत्वज्ञं शरण्यं सोमयाजिनं विष्णुभटटं मुडिवेडुनामके ग्रामे शरणमाययौ। स तपस्वी तथा भूतां तां दृष्ट्वा स्वाश्रये आश्रयं प्रदाय पुत्रीमिव ररक्ष। प्राप्ते शुभे काले सा राज्ञी पुत्रमजीजनत्। अयमेव चालुक्यवंशे विजयादित्यसूनुर्हि विष्णुवर्धननाम्ना प्रसिद्धोऽभवत्। विष्णवर्धनोऽयं कुशाग्रबुद्धि सम्प्राप्यसर्वाविद्याकलाश्च गुरोः गुरुणादिष्टस्त-पस्तप्तुम्प्रगच्छत्। चालुक्ये गिरौ तपस्तप्त्वासौ सकुटुम्बुमाशुतोषं शिवं नारायणन्च प्रसाद्य ततो वारनृ सम्प्राप्य कृतकृत्यो गुरोः सकाशमागत्य मातरं ददर्श। देवैः प्रदत्तानि राजाचिह्नानि संधार्य महता सैन्यबलेन युक्तो राजाधिराजो भूत्वा राज्यं चकार। कदम्ब बंगवंशीयाननेकान् राज्ञो विजित्य दक्षिणापथे राज्यं विस्ततार। अस्योत्कप्रतापेन प्रीतः पल्लववंशजः कान्चीश्वरो महाराजो गुणगणालङ्कृतां विदुषीं रमणीयतमां रमणीगुणविभूषितामात्मकन्यामस्मै प्रादात्। पल्लवानां दौहित्रः चालुक्यानां कुलभूषणो विजयादित्याज्जयसिंहोऽभवत्। अयं जयसिंहो राष्ट्रकूटान् राज्ञो विजित्य राववल्लभेन्द्रादिविरुदैर्विभूषितः सन् अङ्कबाणेशनेत्राख्ये शके (359) वर्षे दक्षिणापथे विपुलं राज्यं संस्थापयामा स।

अयं हि जयसिंहो विष्णुवर्धनापत्यं गुरोर्विष्णुभट्टस्य ये राज्यं संचालनयन् राष्ट्रकूटानां राजानं स सुतं साष्टशतगजसैन्यन्च सम्मर्द्य अन्यान् च पंचशतसंख्याकान् नृपान् विर्जित्य दग्धनृपपन्चशत इति विरुदं चालुक्यकुलवल्लभराजलक्ष्मीन्च बभार। समुपलब्धेषु शिलालेखादिलेखेषु चालुक्यकुलावतंसस्यास्य विजयादि त्यसूनोर्जयसिंहस्य विद्याप्रतापवैभवपराक्रमाणां महिम्नो भारतस्येतिवृत्तं गौरवामावति।

(3)

नीतिनिपुणस्य शीलबलप्रतापपराक्रममण्डितस्यानेकभूतालदण्डितस्याखण्डित-बुद्धिवस्य नयनिष्ठस्य गुरुणां, विप्राणां गवां पूजकस्य धर्माचारनिरतस्य प्रजानुरन्जनव्रतस्य

स्वेष्टदेवतालब्धबाल्स्य विष्णुवर्धनतनयस्य जयसिंहस्य राज्य विस्तारं लभे। तत्श्चालुक्यान्वये प्रतापवान् बालवर्मा बुद्धवर्मेति चा भूताम्। रामेभाग्निमिते (383) शके वर्षे बालवर्मा राजा भवत्। अस्य पुत्र विजयवर्म नाम्नाख्यातो वेदाङ्,करामप्रमिते (394) शकसंवत्सरे दक्षिणापथे शासनं चक्रे। ततो हि तस्य पुत्रो वनराजोऽभवत्, स वनराजो वनराज एवासीत्। प्रजापलकस्य दानशौण्डस्य तस्य वनराजस्यापत्यं द्वितीयो विजयवर्माऽभवत्। प्रतापिनः द्वितीयस्य विजयवर्मणः सूनुरभवत् पृथ्वीराजः, पृथिव्याः राज्यं कुर्वतस्तस्य तृतीयो विजयवर्मा सुतोऽभवत्। विजयवर्मणः पुत्रो द्वितीयो बालवर्मा सीत्। एतयोरन्यो भ्राता रणराग इति नाम्नाख्यात आसीत्। अयं रणरागवर्मा शीलसम्पनः विनयान्विः, हितेन्द्रियः। पराक्रमी भूत्वा भगवत आशुतोषस्य शिवस्य नामस्मरणपूर्वकं पृथ्वीं शशास।

महापराक्रमशालिनानेन रणरागेन नैकाः युद्धभूमयो विजित्य रुद्रबाणशके (511) वर्षे स्वराज्यं बहुव्यवर्धयत्।

अतः परमस्यैव पुत्रः पुलकेशी दक्षिणापथमलन्चक्रे। अयं महाप्रतापी परमपराक्रमशाली राजा चालुक्यानां श्रियं दिक्षु संवर्द्धय सत्याश्रयमहाराजरण-विक्रमवल्लभश्रीवल्लभादिविरुदैः समलङ्कृतो वातापीनाम्नीं राजधानीं निर्माय-निष्कलङ्कयशसा राज्यं चक्रे।

एषा राजधानी वातापी नगरी कीर्तिवर्माणं यावचचालुक्यानां राजधानी आसीत्। नयनिपुणो पुलकेशी विद्यानामुपासकः, विदुषां पूजकः देवताराधनतत्परः, गुणिनां गुणानां गुणज्ञः, कलानामाश्रयभूतः, धर्मनिष्ठः सम्माननिष्ठः वेदप्रमाणकः प्रजानुरन्जनैकव्रती राजासीत्। चन्द्रेषुवेद (451) वर्षेयु अस्य राज्ञः राज्यं सुविस्तृतमासीत्। अस्य द्वौ पुत्रावभवताम्। द्वावपि मंगलीशौवर्माणौ बलशालिनौ पराक्रमिणौ चास्ताम्। अतः परस्मिन् कुले कीर्तिवर्मा राजा भवत्।

अवदातया कीर्त्या ख्यातः कीर्तिवर्मा रणरङ्गधी महावीरो विद्यापराक्रमप्रतापनय-विनयशीलगुणकलाकौशलवीरोचितवैभवविभूषितोऽकेषु सगरेषु नलमौर्यकदम्बवंशीयान् राज्ञो विजित्य नलवाडीकोंकणकानडप्रदेशान् गृहीत्वाश्वमेधादियज्ञविधायकस्य वितुरिव गुणैरन्वितः भूत्वा लोके प्राज्यान् भूरिसुवर्णकान्नग्निष्टोमादिकान् यज्ञान् कृत्वा ब्राह्मणेभ्यो बहुदक्षिणाभिः प्रपूज्य, आशीर्वादान् संग्रहय वंगकलिंगबहूरमगधमद्रककेरलभूषकाङ्ग-पाण्ड्यद्रामिलचोलचालुकभूमिमाक्रम्य तद्राजान् वशगान् विधाय महार्होपायनैर्विभूषितो महाराजपृथ्वीवल्लविरुदालङ्कृतो धर्मेण नीत्या भमिं शशास। सोमानन्दस्य भगिनीं स राज्ञीमकरोत्। सा राज्ञी पतिव्रता, वीराङ्गना सौन्दर्ये च लक्ष्मीरासीत्। स राजा कीर्तिवर्मा विजितान् राज्ञः ससम्मानं समान्तान् सविधाय नानाविधानि प्रजाहितकराणि कर्माणि कुर्वन् सरः सरोवरवापीकूपतडागोद्यानारामान् सहस्रशः कृत्वा वातापीं राजधानीं स्थित्वा प्राज्यं राज्यं चक्रे। गजे भवेदशके (498) वर्षे कीर्तिवर्मणो राज्यं सुविपुलमासीत्।

अस्य देवलोकप्रयाणकाले पुलकेशी विष्णुवर्धनजयसिंहबुद्धवर्षकाः सर्वेऽपि चत्वारः

पुत्राअनाप्तयौवना आसन्। अतः युवराजो मंगलीशो राज्यभारमोढुं प्रार्थितः स तथा चक्रे। राज्यभारमोढ़ं समापन्नं वयसि कुमारे पुलकेशिनि द्वितये राज्यभारं न्यक्षिपत् युवराजो मङ्गलीशः।

(4)

चालुक्यकुलभूषणस्य राज्ञः पुलकेशिनः द्वौ पुत्रौ कीर्तिवर्ममंगलीशौ, तत्र कीर्तिवर्मणि पुलकेशिनः सर्वे गुणाः प्रत्यावर्तन्त इव, मंगलीशोऽपि स्वभ्रातुः कीर्तिवर्मणः पदचिह्नानुसारी जातः। कीर्तिवर्मणि दिवङ्गते स एव राज्यभारं बभार। स स्वप्रशासनकाले कलचुरीवंशं विजित्य तद्राजानं करदीकृत्य राज्यस्याधिकारक्षेत्रं समवर्धयति स्म। दक्षिणापथस्य समस्तं प्रशासनं सुदृढं कृत्वा रेवतीद्वीपं लाटदेशन्चस्वशमानयत्। स एव वातापिगिरिमुत्कृत्य तस्मिन् पन्चशते शके (500) वर्ष विष्णोर्भाव्यं मन्दिरमकारयत्। तस्य मन्दिरस्य प्रबन्धार्थं स तन्जीश्वरं ग्रामं तत्र न्ययोजयत्।

अस्य विष्णुमन्दिरस्य पूर्तौ मंगलीशः महद्महोत्सवमकरोत्। मन्दिरव्यवस्थायां षोडशसंख्याकाः विप्रास्तत्राधिकृताः, मन्दिरे बहूनां परिव्राजकानां ब्राह्मणानां च भोजनादिकस्यापि प्रबन्धोऽनेनः कृतः।

एवं राज्यं संवर्द्धय, कीर्तिं विस्तार्य जितेन्द्रियः यत्यवादी प्रजापालकव्रती सह्योरुरणविक्रान्तरणविक्रान्तपृथ्वीवल्लभादिविरुदैर्विभूषितोऽङ्केभवेदवर्षाच्च नेत्ररामेषुवत्सरं (489-533) राज्यं कृत्वा दिवङ्गत। सत्यनिष्ठे मङ्गलीशो दिवङ्गते तस्य सामन्तस्य पुत्रः सत्याश्रयश्चन्द्रवर्मा, स एव ध्रुवराजः, स स्वल्पकालं कतिचिन्मामावधिकं राज्यं चक्रे।

नेत्ररामेषुसविधे (533) वत्सरे शाकभूपतेः कीर्तिवर्मणो ज्येष्ठस सूनुः द्वितीयः पुलकेशी तपतीराजधान्याः राज्यासनं जग्राह। अयं प्रथमपुलकेशिनः पौत्रः कीर्तिवर्मणः पुत्रः द्वितीयः पुलकेशी पितृपितामहनिष्ठगुणानुपालकः कुलपरम्परायत्तं राज्यं नयने, दुद्धया, बलेन विक्रमेण च दधार। अस्मिन्नेवावसरे कान्यकुब्जेश्वरः श्रीहर्षःदक्षिणापथमाक्रमत। स तत्र दक्षिणापथे चालुक्यान्नायत्तीकर्तुं विजिगीषया वृत्या प्रायतत, अस्मिन्नवेवावसरे कान्यकुब्जेश्वरः श्रीहर्षःदक्षिणापथमाक्रमत। स तत्र दक्षिणापथे चालुक्यान्नायत्तीकर्तुं विजिगीषया वृत्या प्रायतत, परमस्य पुलकेशिनः पौत्रस्य द्वितीयस्य पुलकेशिनः पुरतः सर्वं तूलमभवत्, तेन विवशाऽयं ततस्तथैव परावर्तत।

श्रीहर्षस्य हर्षं विहर्षं कृत्वा पुलकेशी सत्याश्रयपृथिवीवल्लभभट्टारकपरमेश्वर-रणरङ्गप्रियादिविरुदविभूषितः दक्षिणापथे स्वशासनप्रौढिं संस्थापयामास।

अयमेव भीमरथ्यास्तटे गजसैन्यसमिन्वतम् आप्यायिकेन सहितं गोविन्दं बाहुभ्यां प्रमथ्य भ्रशां प्रतीडितौ, तत्र ह्याप्यापिकः पलयितो गोविन्दस्तु पुलकेशिना सह मैत्रीं चकार। कीर्तिवर्मणः कीर्तिभूतः सूनुः पुलकेशी तत्र ततो वनवासीनामकं दृढं दुर्गं गृहीत्वा तत एव गंगवंशीयमलूपवंशीयं च राजानौ विजित्य करदीकृत्य च कोंकणस्थं

मौर्यवंशीयं राजानं स्ववशमानयत्। अतः परमेवासौ नौकाभिः पश्चिमाब्धिं समाक्रम्य महावैभवशालिनीं तस्य पुरीमात्मसादकरोत्।

महाबलशाली महान् नीतिनिपुणोऽसौ चालुक्यकुलावतंसः महतासैन्यबलेन समायुक्तः, विधिज्ञैः कूनीतिनिपुणैः विक्रान्तैर्बलशालिभिः सहायैः समुचितः ध्वजिनीसमेतो विजयाय मनश्चक्रे।

मालवेन्द्रगुर्जराधिपौ तस्य विशालां शुत्रुमर्दिनी पृतनां दृष्ट्वैव शरणं ववृजुस्ततो हि नर्मदायास्तटं वृजन्तीं विशालां हस्त्वश्वपदातिपरिवृढां हेलया महाराष्ट्रं प्रावेयत्, तत्र सर्वान् नवरोशान्नविगणय्य नवनवतिसहस्रग्रामान्वितं समस्तं महाराष्ट्रं बलेन स्वायत्तीकृत्यं ततः कोशलं कलिङ्गन्च जगाम। भीतौ तो शरणागतौ संगृह्य पल्लवराजं, पाण्ड्यदेशं, केरलं, चोलराजं च वशमानीय चालुक्यः पुलकेशी स्वपुरं वातापीमाययौ।

शत्रुदलानां दलनः, शरणागतानां शरण्यः, प्रजानामनुरन्जकः, धर्माणां परिपापलकः, साधुसत्पुरुषाणं सेवकः, सज्जानां मित्रं, नानागुणगणानां विदुषान्चाश्रयः, अखण्डभू मण्डलस्य शास्ता दानशौण्डो भूपः पुलकेशी भारते वर्षे आखण्डल इव राज्यं चकार। अस्यैव द्वितीयस्य पुलकेशिनो राज्ये ईरान देशप्रशासकस्य राज्ञः खुसरोः दूतः सोपायनैरेनं समागत्य राजमद्राङ्कितं पत्रं ददौ राज्ञो मैत्रीभावसम्बन्धं चाकथयत चीनदेशीयो हुएन्त्साङ्गनामा यात्री अस्य राज्यकाले भारतमागत्य सर्वां राज्यव्यवस्थां समवलोक्य स्वयात्रावर्णनवृत्ते तद्वृत्तं तेन लिखितम्।

देशोऽयं भारतं विद्यते पुराकालाद्धर्माणां प्रसवभूमिः। बौद्ध धर्मस्य प्रादुर्भावो ह्यत्रैवाभवत्, तथा च स धर्मोत्रैव वृद्धिङ्गतोऽपि कालान्तरे बौद्धधर्मेनेकेविकाशः समागच्छन्। कालोऽयं बौद्धधर्मस्य विकाराणामेवासीत्। अस्मिन् धर्मे समागताः विकृतयः समाजे नैकानामत्याचाराणां प्रसविन्योऽभवन्। धर्मस्यास्य सनातनपरम्पराविरोधपरा सदाचार विरोधसमूलिका भवत्। अतोऽसौ हिन्दूनां धर्मोन्नति विधित्सुरनेकप्रकारकाणि सुसङ्गतानिसमामाजिकानि कार्याणि समारेभे। अस्य पूर्णं क्रार्यजातं शङकराचार्यः समपादयत्। पुरा भारते हिन्दुराजानामस्य चरितमद्वितीयैरदात्तैरेव कर्मभिर्गीर्वाणवन्दितं वरीवर्तते। अतो हि–

> रघोर्वंशे यथा रामः पाण्डवेषु यथार्जुनः।
> तथा चालुक्यवंशेऽयं पुलकेशीति विश्रुतः[1]॥

कालस्य विचित्रागतिः, नीतिधर्मसदाचारादिसमस्तमुखोन्वितगुण-गणसमलङ्कृतस्य राज्ञः पुलकेशिनः राजस्यान्तिमे भागे तद्राज्यपार्श्ववर्तिनो राजानो सन्चित्य पुलकेशिनं समाक्रमन्। अस्य पार्श्ववर्ती पल्लववंशीयामहाप्रतापी राजा नरसिंहवर्मा पाण्डयकेरलचोलानां राज्ञां बलैः समन्वितः आक्रम्य दक्षिणापथे पुलकेशिनः प्रौढ़िं समकम्पयत्। यशसो विपर्ययमिव दृष्ट्वा भृशं दुःखितः नेत्राङ्कवाणवर्षे (593) शके सर्वमत्रैव विहायः दिवं प्रतस्थे।

चालुक्यान्वयामौलिमणेः पुलकेशिनः सत्याश्रयस्य राजराजेश्वरस्य चत्वारः पुत्राः

कन्यकैका चासीत्। राजपुत्रेषु चन्द्रादित्य-आदित्यवर्म्म-विक्रमादित्यजयसिंहेषु द्वितीयः आदित्यवर्मा एवं राज्याधिकारी आसीत्। परन्तु विक्रान्तो विक्रमादित्यः क्रूरविक्रमः राज्यासनं स्वयमेव जग्राह। अयं हि नाम्नपो गुणैरलङ्कृतः शत्रूणां प्रतापानलपरिशामकः, तेजसां तेजस्सु सूर्यः, परमपराक्रमी, धीरधुरीणः, महद्बलशाली पुरुषसिंह भूत्वा स महद्बलशालिना गत्या उच्चैःश्रवसेव प्रियेणाश्वेन चित्रकण्ठेन सङ्गता। महतीं त्रिबलयुक्तां चमूमादाय देशस्य चतुर्दिक् स्थितान् पाण्डकेरलचोलादीन् देशान् विजित्य पल्लवान्वयं भूपालं करदीकृत्य स्वपितुः वैरशोधनं चकार।

पल्लवानां राजधानी कान्चीं नगरीं गृहीत्वा नरसिंहवर्म्मणोऽपर्वं गर्वं तूलवत्कृत्वा चमूचलनसन्जातधूलिधूत्कारेषु धूलिसादकरोत्। अस्य नयनिपुणस्य राज्ञो विनयादित्यः पुत्रः वियादित्यश्च पौत्रोऽभवत्। पाण्डकेरलचोलयुद्धेषु विनयादित्यविजयादित्यौ राज्ञो विक्रमादितस्य भुजावास्ताम्। असौ विक्रमादित्यः पुत्रपौत्रबलान्वितः काबेरं, पारसीकं सिंहलन्च देशान् आक्रम्य तत्तद्देशाधिपतीन् जित्वा तान् करदीकृत्य पुनः ससमनं तेषां राज्यानि प्रदाय तानुनकम्पयत्। एवंभूतः महामहिमाशाली, नयपरायणः कूटनीतिविचक्षणश्च राजा विक्रमादित्य'' नेत्राङ्कवाणात् रामाकाशरसान्तकम् (593-603) राज्यं कृत्वा राज्यभारं विनयादित्याय दत्वा जिष्णुना आहूत इव स्वर्गवातः।

शकान्नेत्राङ्कबाणाश्चरामाकाशरसन्तं (593-603) वर्षं यादव् विक्रमादित्य-श्चालुक्यः नयेन राज्यं कृत्वा पुत्रे विनयादित्ये भारं समर्थ्य दिवंगतः। रणकाननकेसरी विनयादित्यः स्वपितुः प्राज्यं राज्यं नयेन धर्मतश्च पालयन्—

चोलकेरलकालभविलहैहयपल्लवान्।
पाण्ड्य मालववंश्यांश्च स्वसामन्तान् चकार[2] सः॥

चोलकेरलकाराभ्रान्, विलहैहय पल्वान्, पाण्ड्यवंशीयं, भालववंशीयं राजसमुदायं स्वसामन्तस्थानेषु नियोज्य प्रजानां पालनमकरोत् शिवनेखाभ्ररसतः गजचन्द्रसान्तं (603-616) राज्यमुपभुज्य[3] अन्ते राज्याधिकारं पुत्रायं वियादित्याय दत्वा स्वर्ग गतः।

स्वर्गं याते पितरि द्वितीयो विजयादित्यः पितुः प्राप्तं राज्यं नीत्या सम्पालयन् विद्यायाः विदुषान्च पूजां संपालनन्चाकरोत्। अस्य राज्ञी लोकमहादेवीति नाम्ना ख्याता विदुषी पतिपरायणा चासीत्। अयं प्रतापी नृवरो राजा विजयादित्यः बाणेषुशास्त्रसंख्यान्तेषु (655) वर्षेषु राज्यं चकार।

बाल्येऽभ्यस्तविद्यस्तरुण्ये कृतास्त्र प्रयोगः युद्धेषु रणकेसरि पितुः पितामहस्य च ह्यादेशानां प्रतीक्षकः, नयविनयशीलसम्पनः, गुणरत्नानामाकरः प्रजानुरन्जनश्रमी स्वीये शासने बहूनि मंगलमयानि मार्याण्यकरोत् एषो हि चालुक्यकुलावतंसो राजा विजयादित्यः स्वराज्ये ब्रह्मविष्णुशिवादीनां देवानां मन्दिराणि कारयित्वा राजधान्यां पट्टलकडे भागे विजयेश्वरस्य स्वेष्टदेवस्य भव्यंमन्दिरमकारयत्।

अत्रास्मिन् मन्दिरे, अस्य सुव्यवस्थार्थं प्रचरं द्रव्यं भूमिन्च मन्दिरस्य देवलेभ्यः प्रायच्छत् धर्मेषूदारमनाः विजयादित्यः स्वराज्ये जैनधर्मानुपालवेभ्योऽनेकानि दानानि

ग्रामाणां दानन्चाकरोत्। प्रजानां प्रियो राजा तासां योगक्षेमं कुर्वन् गजचन्द्ररसाद् वर्षाद् बाधबाणरसान्तकं[4] (618-655) आखण्डलोपमो राज्यं कृत्वा—

तस्मिन्नेव शके राजा स श्रीचालुक्यनन्दनः।
पुरुहूतपुरातिथ्यं स्वीचकार निजैर्गुणैः[5]॥

विजयादित्येदिवङ्गते तस्य प्रतापवान् सूनुः द्वितीयो विक्रमादित्यश्चालुक्यानां भूषयौमास। पितरि दिवङ्गते पार्श्ववर्तिपल्लवराज्यस्य राजा नन्दिपोतवर्मा पुनरौद्धत्येन स्वातन्त्र्यमघोषयत्। तस्य तदौद्वव्यसहमानो विक्रान्तो विरो विजयादित्यस्य सूनुर्विक्रमादित्यस्तस्य राजधानीं संरुद्य, युद्धे तं पल्लवानां राजानं निर्जित्य करदं कृत्वा, तत्रस्थान् विदुषो ब्राह्मणान् साधुजनान् सत्कर्मनिष्ठान् जमान् संपूज्य दानमानैरुपायनीकृत्य परमवैभवशालिनीं शोभनीयां राजधानीं काञ्चीनगरीं पुनस्तस्मै नन्दिपोतवर्मणे दत्वा पल्लवराज्यस्य प्रशासनं सुदृढमकरोत्।

तत्र पल्लवराजधान्या कान्चीनगर्या सुख्याते राजसिंहेश्वरे शिवमन्दिरे स्थिरं शिलापट्टम्द्यापि विरुदैस्तं स्तौति। महता गुणगौरवगरिम्णा गौरवशाली, विनयेन शीलेन च विभूषितः, विद्याव्यासंगवन्दनीयाः, धर्माचारपरम्परानुपालकः, भक्तिमान्, श्रद्धावान्, विरो विक्रान्त यशोधनश्च स्वशासनकाले बहूनि सुभव्यानि देवानां मंदिराणि प्रकल्प्य तेषां व्यवस्थाश्चाप्यकरोत्। अस्य राज्ञः प्रतापप्रसरमसहिष्णवो ये राजानः पाण्ड्यकेरल-चोलास्तान् निर्जित्य तत्र विजयस्तम्भान् संस्थापायामास[6]।

महाप्रतापी हैहयानां राजा, तस्य द्वे लोकोत्तरसौन्दर्यशालिन्यौ लोकमहादेवीत्रैलोक्य-महादेव्यौ कन्ये ह्यास्ताम्। स तमनुकम्प्य तयोः पणिं जग्राह। याभ्यां लोकमहादेव्या त्रैलोक्यमहादेव्या व स्थापिते लोकेश्वरत्रैलोक्यश्वरयोर्देवालयौशैवीं श्रद्धां प्रकटयन्तौ तयो धर्मनिष्ठां व्यनक्तोऽद्यापि चालुक्यकुललक्ष्म्योः कीर्तिं कीर्तयतः।

पाणिं लोकमहादेव्याः गृहीत्वासौ समाकरोत्।
स अन्यां त्रैलौक्यमहादेवीं द्युतिमतीं मदा।
जग्राह ते च त्रैलोक्यश्वरलोकेश्वरस्य च॥
स्थापिते मन्दिरे तत्र विप्राः द्रव्यैः सुपूजिताः[7]॥

तयोमर्धर्मनिष्ठयोस्त्रैलोक्यदेवी त्रैलोक्यसुयशोधनं महाप्रतापितन कीर्तिवर्माणं पुत्रं सुषुवे।

सुषवे सा सुतं देवीं त्रैलौक्यसुयशोधनम्।
कीर्त्तिवर्माभिधं बालं बालातूप्रसमप्रभम्[8]॥

विद्यासु, कलासु, शस्त्रविद्यायां निपुणः, धर्मेषु निष्ठः, नीतौ कुशलः, गुरुजनेषु भक्तः, र्वोलिषु विक्रान्तोऽयं वीरो बुद्धिवल्लभः कीर्तिवर्मा पित्रा यौवराज्येऽधिकृतः नयेन विनयेन च शीलसदाचाराभ्यां बलबुद्धिविक्रमैः राज्यकार्याणि कुर्वन् पितरं विक्रमादित्यं प्रीणातिस्म। असौ वीरेषु विक्रान्तपराक्रमः राज्यकर्मणि सुसमर्थे कीर्तिवर्मणि राज्यभारं निक्षिप्य अङ्कषड्रसे[9] (669) वर्षे राजा विक्रमादित्यः परमं पदं जगाम।

दिवङ्गते पितरि यशोधन्रे वीरे विक्रमादित्ये राज्यासने समारूढे कीर्तिवल्लभं पल्लवपाण्ड्यकेरलैः सम्भूयैषः समाक्रान्तः दुर्दैवभिहतः राष्ट्रोढदन्तिदुर्गेण स्वबलेन शत्रुभिर्जितस्द्राराज्यस्योत्तरं भागं हि पल्लवपाण्ड्यकेरलराजभिः स्वायत्तीकृतम्[10]।

शेषे दक्षिणे भागे दुःखितः कीर्तिवर्मा शशास। दानशीलोऽयं राजा कीर्तिवर्मा ह्येवंभूतायामपि स्थितौ ब्राह्मणोत्तमाय माधवाय पातुङ्गलप्रदेशं दत्वा स्ववितगं राज्यं पुनः प्राप्तु बहुवारं ह्यनेन प्रायतत, परं क्षीणशक्तिरयमेतेषु यत्नेषु यदवशिष्टं तदपि ततो गतम्। अतः–

अरक्षितं दैववशात् पुनर्यत् सुरक्षितं तद्भवतीति निश्चितम्।
दैवप्रकोपाद्बहुशोऽपि रक्षितं विनश्यतीति प्रमुखाः वदन्ति[10]॥

(6)

प्रथमपुलकेशर चालुक्यानां धोधूयमानायाः कीर्तिपताकायाः अधः निखिलं भारतं देशमानीय चालुक्यराजप्रशासनं व्यापकं विपुलं सुदृढन्चाकरोत्। अस्य पुत्रः कीर्तिवर्मा प्रथमस्तौवाभवत् अस्य प्रथमपुलकेशिपुत्रात् प्रथमकीर्तिवर्मणः परं पुरुषपरम्परायां द्वितीयः। कीर्तिवर्मा सप्तमः पुरुष आसीत्। पल्लवैश्चालुक्यानां सदैवविरोधः कृतः, परं कीर्तिवर्मणि द्वितीय शास्तरि सति पल्लवपाण्ड्यकरलैः सम्भूय साफल्यमधिगत्य द्विशतवर्षकालं यावद्धि चालुक्यानां राज्याधिकारान् अन्धन्तमसि निपात्य न सुखिनस्तेऽपि बभूवुः।

एतस्मिन् चालुक्यवंशे द्वितीयस्य पुलकेशिनः पुत्रो हि जयसिंहश्चतुर्थ आसीत्। चतुर्थस्य जयसिंहस्य त्रयः पुत्रा आसन्, तेषु द्वितीयस्य मङ्गलेशस्य वंशो वृद्धिमगमत्। मङ्गलेशस्य माहिक्यादित्यः, माणिक्यादित्यस्य नरसिंह, नरसिंहस्य कतिहारकः कतियारकस्य विमलादित्यः, विमलादित्यस्य भीमापरनामाद्वितीय आदित्यवर्मा, आदित्यवर्मणस्तृतीयः कीर्तिवर्मा पुत्रोऽभवत्। अयमेवकीर्तिवर्मा तैलपो राजेति ख्यातिं गतः[12]।

राजायं भीमो भीमपराक्रमः कूटनीतिज्ञश्चासीत्। विद्याविनय सम्पन्नः वीरो धुरीणः स्वपराक्रमेण प्रतिभया च चालुक्यानां राज्याधकारान् पुनप्राणयत्। कर्नाटकस्य महिशूरे भूभागे चालुक्यराज्यस्य न्यासमिव स आदित्यवर्मा भीमोऽकरोत्।

तस्मिन् काले परशुरामसमुत्पादिते कोंकणे प्रदेशो राज्ञोऽपराजितेशेलरस्य प्रशासनमासीत्। अस्य ह्यपराजितशेलराजस्य पत्नी उज्जयिन्या अधिपतेः राज्ञः कर्मसेनराजस्य पत्न्याः शशाङ्कपुरारार्जेनन्दियाः कन्यासीत्।

एवंभूतं राज्यं कदम्बवंशीयेन राज्ञाक्रम्य कोंकणं स्ववशमानीतम्। वृत्तान्तमेनमधिगत्य किन्नः बुद्धोऽपि नयेन सिन्धुदेशस्याधिपं संप्राथर्य ततः सैन्यसाहाय्यं समुपलभ्य कदम्बवंशराज्यं विजित्य, उज्जयिन्या जामातारं अपराजितशेलरराजं कोंकणं प्रत्यावर्तत। अस्य चालुक्यकुलजातस्य भीमस्य नयने प्रभावितः सिन्धुराज आदित्यवर्मणा सार्धं प्रगाढां मैत्रीमकरोत्। एतत्सर्वेण सुवृत्तेन चालुक्यानां प्रतिष्ठापुनः प्रतिष्ठत्।

अस्मिन्नेव कलिक वृत्ते दक्षिण पश्चिमोदधौ सिन्धुराजस्य जलपोतं जले मज्जन् वर्तते स्म। अवसरवादिभिः कदम्बकुलगैस्तस्मात् सर्वं विलुण्ठ्यनीतम्। क्रुद्धः सिन्धुदेशीयो राजा मित्रेण चालुक्येनादित्यवर्मणा सन्धिं विधायस्वीयेन प्रचुरसैन्यसाहाय्येन चालुक्यैः कदम्बवंशीयराज्यमाक्रमय्य विजितः कदम्बराजस्तेन चालुक्यानां जयोऽभवत्[13]।

अस्मिन्नेव काले जले स्थले च निवासी कश्चित् जलीयो जन्तुः सामुद्रिकः यस्या कृतिस्तु मकराकृतिरिवा भवत्, स अश्वान् गजांश्च समाकृष्य सागरं नीत्वा सैन्यबाधामकरोत्। स भीमो भीमपराक्रमस्तं हत्वा तस्मात् तैलं निष्काष्य तत्तैलस्याग्निमुखेन प्रयागोऽकरोत्।

अस्मिन् प्रयोगे प्राप्तमनेन यत्तस्मात्तैलात् प्रज्ज्वालितोऽनलः केनाप्युपायेन न शाम्यति। अस्य तैलस्य प्रयोगं कृत्वा स आदित्यवर्मा स्वपितृणां सर्वं राज्यं पुनर्विजित्य स्वायत्तीकृतवान्। परमत्र पत्नीवियोग इव संवृत्तः[14]।

विजयायात्रायां गते राजनि भीमे अस्य पत्नी दुःखिता सर्वं विहाय गृहान्निर्गता। विक्षिप्तेन सा इतस्ततः भ्रमन्ती पृथ्वीराजस्याश्रमं प्राप्ता, तस्यास्तामवस्थामवलोक्य दुःखितो गुरुस्तां चालुक्यवंशवृद्ध्यर्थं बालेश्वरमहादेवस्य समाराधनाय निर्दिष्टस्तया च महत्या निष्ठया देवस्याराधने आत्मानं नियोज्याभिलषितं प्राप्तम्। विजययात्रातः प्रत्यागते च गुरोरभिवादनाय गरोः पृथ्वीराजस्याश्रमे, तत्र हि स सर्वं वृत्तं विज्ञाय गुरोरादेशान् शिरोधार्य राज्ये परावर्तत।

अस्य पुत्रस्तैलपोऽभवत्। तैलपो हि परमनीतिमान् राजाभवत्। राज्ञस्तैलपस्य पुत्रस्तृतीयो विक्रमादित्योऽभवत्। विक्रमादित्याद् भीमः, भीमादय्यणोऽभवत्। अय्यणस्यपत्नी कृष्णराज दुहितासीत्। अय्यणाच्चतुर्थो विक्रमादित्य आसीद्यस्य पत्नी बोन्तादेवी आसीद्, परमर्धपरायणायां यस्या द्वितीयस्वैलपोऽभवत्। नन्दाब्जाङ्कशके (919) वर्षेऽसौ विक्रमादित्यश्चतुर्थो दिवमगच्छत्[15]। तैलपोऽयं राज्यासन समासह्य साक्षाद्विष्णुरिव प्रजानां पालनमकरोत्। सर्वाः प्रजाः एवं पितरमिव मे निरे। परमशान्तदान्त-विनयशीलशौचसदाचारधर्मनिष्ठस्वभावो नयनिपुणोऽयं राजा तैलपः राष्ट्र-कूटानां षड्यन्त्रं विखण्ड्य यशसा रेजं चालुक्यकुलभूषणो विविधविरुदमण्डितः।

(7)

विक्रमादित्यस्य चतुर्थस्य पुत्रोऽय्यणस्य पौत्रः द्वितीयस्य भीमस्य प्रपौत्रः महाबलशाली विद्वान् धार्मिकशीलवान् नीतिज्ञः तैलपो राजा समुद्वान् सर्वान् राष्ट्रकूटान् समराङ्गणे निहत्यतेषां राज्याणि स्वराज्यविस्तारे प्रशासने चानयत्। परमाधिपं मुन्जं, मालवार्नेमधिपं, पान्चालार्नेमधिपं गाङ्गवंशीयं राजानन्च रणाङ्गणेऽसौजघान[16]। महाप्रतापिनस्तैलपात् पराहिताः चोलहूणवचेदिमालववंशीयाः राजानस्तेन करदीकृत्य स्वछत्रे समानीताः।

एवमयं भूपालश्चालुक्यकुले पुरुषसिंहो भूत्वा राजसु सर्वोच्चस्थानं गृहीत्वा,

उद्धताननुद्वतान् कुर्वन् प्रजानुरन्जनपरायण नयेन राज्यमकरोत्। अस्य राज्ञो महाराज्ञी देवी राकब्बासीत्, ऐषैव महाराज्ञी जबकलदेवीति नाम्ना ख्यातासीत्। अस्य राज्ञः द्वितीया पत्नी महाराज्ञी लक्ष्मीदेवी, सा हि राष्ट्रकूटस्य राज्ञः कर्कस्य ममासा देव्याः कन्यासीत्। अस्यां द्वौ पुत्रौ सत्याश्रदशवर्माणाभवन्। आकाशशिवनेत्राङ्के (930) शके वर्षे पितुः प्राज्यस्य राज्यस्य सिंहासनं सत्याश्रयो नृपो भूत्वालन्चकार[17]। शासनसूत्रग्रहणानन्तरमयं राजानेकाः युद्धभूमयो विजित्य अबलाबालविप्राणां घातिनं महाक्रूरं चोलराजं निहत्य दक्षिणे भारते शान्तिसंस्थापनमकरोत्[18]। अस्य राज्ञो महाराज्ञी अम्बिकेवाम्बिकादेवी पतिव्रता सावित्रीव पतिपरायणा चासीत्।

अम्बिकेवाम्बिका देवी राज्ञी तस्य पतिव्रता।
सावित्री सा सत्यवन्तं सिषेवे स्वपतिं तथा[19]॥

अस्मिन् राज्ञि दिवंगतेऽस्य पुत्रः विक्रमादित्यः पंचमः राज्यासनमलन्चकार। अस्य हि सत्याश्रयस्य सहोदरः दशवर्मा पिता भाग्यवती देवी माता वासीत्। एषैव देवी भाग्यवती भग्लदेवीति नाम्नापि विश्रुतासीत्। अस्य पंचमस्य चालुक्यवंशीयस्य विक्रमादित्यस्य नभार्णावाङ्क्मिते वर्षे निधनं जातम्[20]।

दशवर्मणस्त्रयः पुत्राः विक्रमादित्याय्ययणजयसिंहा आसन् एका कन्यासीद् यस्या नाम अक्कादेवीत्यासीत्। अब्धिरामाङ्के (973) शके 21 वर्षे अय्यणः शासनसूत्रं जग्राह। अयमेव जिजाबा-अय्यणेति नाम्ना विश्रुतः शास्त्राब्ध्यङ्कान्तं (973) चालुक्यानामधिप आसीत्[22]। अयं कल्याणी नगरीं रणदेवीति नाम्नीं कृत्वा रणदेवीं नगरीं राजधानीमकरोत्[23]। द्वितीयस्य जिजाबा-अय्यणस्य द्वे भार्ये, तत्र द्वितीया राष्ट्रोढान्वयसम्भवा कृष्णनन्दिनी या च चन्द्रिका देवीतिनाम्ना ख्याता ह्यास्ताम्। अस्यामस्य चत्वारः पुत्रा द्वे कन्यो चाभवन्।

अत्रावधेयमितिवृत्तं विशेषरूपेण विद्यते यद् दर्शवर्मणस्त्रयो पुत्राकन्या चासन्। चतुःसु कन्या अक्कैवप्रतिभाशालिनी नीतिज्ञा चासीत्। सा हि सत्याश्रयस्य प्रियकन्यकासीत्। तनैव सुशिक्षिता अक्का नीतौ निपुणाभवत्। सा हि राज्यकार्ये सत्याश्रयस्य साहायमकरोत्। सत्याश्रये दिवंगते विक्रमादित्यस्तस्याः सहोदरो राज्यासने तस्थै, स हि कतिचिद्वर्षाणि राज्यं कृत्वा दिवंगतः। अत्रास्यापि राज्ये अक्कासहयोग आसीदेव। विक्रमादित्ये दिवंगते राज्यधूर्धारणस्याधिकारी अय्यणोऽभवत्। परं स तपस्वी राजनीतेः कूटनीत्यात्मको यो व्यवहारस्तेन स विज्ञो नासीत्। 'जिजाबा' इति हि अक्कायाः उपाध्यन्तरम्। दर्शवर्मणः सन्ततिषु ज्येष्ठा राज्यकर्मणि अय्यणस्य साहाय्यं कुर्वन्तीं 'जिजाबा-अय्यण' इतिज संयुक्तेन नाम्ना अय्यणमग्रे कृत्वा राज्यं चकार। अय्यणस्य द्वितीया पत्नी यस्याश्चत्वारः पुत्रा अभवन् सा खबाणाङ्कसविधे24 दिवंगता, तेन वैराग्याभिभूतस्तदा तु अक्कैव संचायतिस्म। ततो जयसिंहोऽस्य भ्राता विद्रोहमकरोत्। विरक्तोऽय्यणस्तस्मै राज्यं प्रदाय कुलक्षयाच्चालुक्यवंशं ररक्ष। जयसिंहो हि योग्यः साहसी शौर्यगुणसमलंकृतन्चासीत। अयं मालवचेलचोलभोजान् दण्डयित्वा

राज्यं सुस्थिरं चकार। अस्य राज्ञः जयसिंहस्य महाराजधिराजपरमेश्वरकमल्लविरुदै-र्विभूषितमभवत् परम्। अयं हि आब्धिरसाङ्के वर्षे शत्रून् विजित्योक्ता उपाधयो बभार।

अस्य महिषी संग्गलदेवी आसीत्। यस्यां महावीरवरः सोमेश्वरः जन्मलेभे। पितुर्युपरते योगेश्वरश्चालुक्यानामधिपोऽभवत्। महाप्रतापी बलविक्रमोत्साहप्रोतः शासनारूढ़ एव पल्लवानां राजधानीमाक्रम्य तस्याः प्रचुरं कौबेरमिवैश्वर्यमलुण्ठत् शत्रुर्भितं मालवानां राज्यं तेभ्योऽदायत्।

अनेन विक्रान्तेन वीरेण कामरूपं गौडं च विमर्द्य, सिंहलं करदं कृत्वा, केरलदेशस्य नृपो नाशयित्वा चक्रकोटकूटवेंगी वल्हालगङ्कोशलकर्नाटक चौल सौराष्ट्र दशार्ण तुरुष्क मातृवकलिङ्गकरासृपतयः—सगरे विजित्य तेभ्यः स करं जग्राह। अस्य शासनकालः युद्धमय एवासीते। चालुक्यकुलनन्दनोऽयं सोमेश्वरः उद्धृतान् मगधान्ध्रान्तिवंगकुरु द्राविडरवसलाटाभीरपान्चालराजयाधिपतीन् विजित्य वशमानयत्। एतेषु युद्धेषु तत्तद्देशीयान् राज्ञां मानमुन्मध्य करदानसैन्यदानादिकं सन्धिव्रतं विधाय ससम्मानं तान् तत्रैव संस्थाप्य स्वीराज्यसीमाविस्तारं विधाय स्वराज्ये समागत्य राजधानीं कल्याणीं रणदेवीं नानानिधिभिर्भूषयामास।

एवं कृतकृत्य इवासौ नानाविरुदैरलङ्कृतः त्रैलोक्यमाला-अहम्मालाभ्यां पतिव्रताभ्या पत्नीभ्यां समलङ्कृतो राज्यं कुर्वन् रराज। गोत्रसूत्राभावे पितरो हि दत्तं जलं कवोष्णं पिबन्ति, तेन दुःखितः सो भगवत आशुतोषस्य प्रीतये तपश्चक्रे। तत् तपसः प्रभावात्त्रयोऽभवन् पुत्राः। तेषु सोमेश्वरः सोमेश्वरस्य ज्येष्ठः, असौ विक्रमादित्य इति नाम्नाख्यातोऽभवत्। अस्य जयिसिंह द्वितीयः पुत्र आसीत्। तृतीयस्तु नाम्ना विक्रिमादित्योऽभवत्। असौ सोमेश्वरो ह्याकाशनन्दङ्क (990) वर्षे पुनर्विजययात्रां कृत्वा धारां डाहलन्च विजित्य पारावारतटे विजयस्तम्भान् संस्थाप्य राज्यमकरोत्।

पालयामास राज्यं स्वं धर्म्रेण च नयेन[26] च॥

एवं ह्यसावब्धिनन्दाङ्कपर्यन्तं (997) राज्यं चकार।

पितर्युपरते सोमेश्वरे द्वितीयः सोमेश्वरो राजा भवत् असौ द्वितीयसोमेश्वरो विक्रमादित्य इत्युपाधिं धारयामास। अयं विक्रमादित्य इत्युपाधिधारकः सोमेश्वरो विजयवाहिनीं प्रबलां स्वसेनामादाय विजययात्रायां गौडबर्बरसौराष्ट्रान्ध्रतुरुष्कम-रुवङ्गकलिङ्गचेदिगुर्जरनेपालवराटलाटकहाटसिन्धुकाश्मीरमगधमालवद्रविडादीनां राज्ञो विजित्य सम्राट! पदेनालङ्कृतो भूत्वा महायगमश्वमेधं चकार। अयमेव महाप्रतापी विक्रमादित्योऽनलनामके वैक्रमीये वर्षे 998 शके चैत्रमासस्य शुक्लपक्षे प्रतिपत्तिथौ वत्सरं प्रावर्तयत्।

अनलाख्ये शुभे वर्षेहस्त्यश्वाङ्कशेके वीरोविक्रमवत्सरम्।
चैत्रेशुक्ले च प्रतिपत्तिथौ
चालयामास चालुक्यविक्रेमापरनायकम्॥

शालिवाहनभूपस्याऽनन्मरं राजशेखरः।
प्रवर्तको वत्सरस्याऽयमेवाभून्नुदक्षिणे[27]॥

अस्य विक्रमादित्यस्य राज्यं हस्तिवेदाभ्रचन्द्रान्तं (1049) सुविस्तृतं जातम्।[28] अस्य भ्राता जयसिंहसामन्त आसीत्। महाबलशाली च खर्वबलान्वितः वनवासीं राजधानीं स शशास। विक्रमादित्यस्य पुत्रः, सोमेश्वर आकाशरसखेन्द्वन्तं (1060) राज्य चकार। अस्य द्वौ भ्रातरो जयकर्णो विजयादित्यः भगिनी चे मेल्यादेवीति नाम्ना विश्रुतासीत्। कदम्बवंशोयेन गोवाप्रान्तस्य राज्ञा सहास्याः विवाहोऽभवत्। अस्य सोमेश्वरस्य पुत्रः कामल्लोऽभवत्। स कामल्लः नेत्राब्ध्यभ्रचन्द्रान्तं (1073) राज्यं चकार, ततस्तद्भ्राता तैलपो वेदेभाभ्रेन्पुर्यन्तं (1084) राज्यं चक्रे। तैलपस्य पुत्रोहि सोमेश्वरोऽभवत् स च चन्द्रभूरुद्रशके (1111) यावद्राज्यं शशास।

(8)

चालुक्यकुलशिखामणिरय्यणः दशवर्मणः पुत्र आसीत्। पंचमो विक्रमादित्याश्चतुर्थो-जयसिंहश्चास्य सम्पुटको भ्रातारावभवताम्। आक्का हि ज्येष्ठा भगिनी विदुषी निविनिपुणा चासीत्। द्वितीयस्तैलपोऽस्याय्यणस्य पितामहश्चतुर्थो विक्रमादित्योऽप्रतितामह आस्ताम्। प्रथमोऽय्यणः योहि द्वितीयस्य भीमस्य पुत्रः स अस्य चुतर्थः पूर्वपुरुष आसीत्।

अयं हि द्वितीयोय्यणः धर्मनिष्ठौ नयेन प्रजानां पालको विवेकशीलो विरक्तस्वभावस्यराजा आसीत्। शिवोपासकः, महावाक्यानां परिशीनकं, श्रुतिस्मृति-पुराणतत्ववित् वदान्यश्रेष्ठो नलविद्योत्साहपराक्रमविनयशीलसदाचारादिसद्गुणानामाकर-स्तेजस्वी स्वल्पकालमेव राज्यं कृत्वा स्वभ्रातुर्जयसिंहस्य विरोधविचारणया कुलस्य हितं निर्धार्य राज्यं भ्रात्रे दत्वा शास्त्रमुन्नङ्गे (976) शके वर्षे तपसे वनं जगाम। तत्र वने निवसन्—

चन्द्रतारकगत्योश्चऽकरोत् सूक्ष्माभिवीक्षणम्।
गणितज्योतिषो ज्ञानात् खगोले कृतनिश्चयः।
विरह-अभ-हरा यो शोधितस्तेन धीमता॥
संशोधनं नवं शोधमकरोद् ग्र हजस्थितौ।
अनयोपपत्तिभयोऽसौ खगोले समदर्शयत्॥
ग्रन्थेय्यणनरशा संज्ञे स सर्वं सगृहीतवान्।
संस्कृते चानुवादेन सूर्यसिद्धान्तसंज्ञया॥
प्रसिद्धोऽभदयङ्ग्रन्थो विदवद्गणकसंस्तुः[29]।

एवमयं विविक्ते वने ब्रह्मचिन्तनपरायणोऽय्यणो राजा ज्योतिःशास्त्रे महद्योगदानमकरोत्। अनेन विदुषा तपस्विना प्रतिपादिताः खगोलविषयकसिद्धान्ता अस्य प्रपौत्रेण गोविन्दराजेन काशीस्थविद्वद्भिः संस्कृते संस्कारयित्वा ग्रन्थः सुस्थिरः कृतः—

तत्पौत्रेण गोविन्दनामकेनेति कथ्यते
काशीस्थसपण्डितैस्तस्याऽनुवादोऽकारि संस्कृते॥
ग्रन्थेऽप्यस्ति सपुल्लेखस्तस्यभूपतेः।
अय्यणस्य सुवृत्तान्तः कीर्तिस्तत्रानुवर्णिता[30]॥

धर्मधुरीणोऽयं द्वितीयोय्यणश्चालुक्यकुलावतंसः धर्मावतार इत्युपाधिविभूषितो गणकोत्तमोऽभवत्।

धर्मावतारनाम्नासौ प्रम्द्धिौ गणकोत्तमः।
योगविद्योगिनां श्रेष्ठः स आसीदय्यणाः सुधीः[31]॥

कृष्णराज्यस्य कन्या अस्य पत्नी आसीत्, यस्यामयं द्वे कन्ये चन्द्रदेवः-आइकदेव कत्तीयारदेव-नरसिंहदेवाश्चत्वारः पुत्रा अभवन्। अस्य भगिनी अक्कदेव कदम्बवंशे षष्ठदेवेन विवाहितासीत्। तस्मिन्न् कदम्बवंशे जातेन इष्टदेवेन अस्य राज्ञः कन्या वेदवेदाङ्के[32] शके विवाहिताभवत्। अक्कादेव्या विषये पूर्वं यथा निर्धारितं तथात्र पुनः दृढयन् कविस्तस्य वैशिष्ट्यदर्शन् प्रतिपादयति यत् सा–

अक्कादेवीति नामासादय्यणस्याऽनुजा तथा।
कदम्बवंश सामन्तषष्ठदेवविवहिता॥
युद्धक्षेत्रे भैरवी सा सद् गुणा नीतिकोविदा।
जैन बौद्धादिधर्मेषु शैववैष्णवयोरपि॥
समदृष्टिमती साध्वी किसुकाऽस्य सप्ततिम्।
शशास शासनारूढा नीत्या धर्मेण च स्वयम्[33]॥

अक्कादेवी दर्शवर्मणः पुत्री आसीत्। अयं हि विदुषी, नीतिविचक्षणा, धर्मसहिष्णुः प्रजानुरन्जनपटुः प्रशासिकाभवत्। अस्य पुत्रो हि जयोशिदेव आसीत्। अयं विक्रमाशाली राज्येन्द्रविक्रमनामानौ राजानौ निहत्य गोयागपट्टनतः (गोवातः) विक्रमपुरं राजधानीमकरोत्[34]। तपस्वी स अय्यणो ऽस्य जयकेशिदेवस्य मातुलः कन्चित् कालमत्रैव न्यवसत्। अयं जयकेशिदेवः स्वमातुलीय निर्वाहार्थं सप्ततिग्रामान् प्रायच्छत्। तेषां व्यवस्था साक्कन्देव्येवाकरोत्[35]। वीतरागोऽय्यणः कान्चन् कालयं तत्रोषित्वा कल्याणीवने स्वकुलगुरोराश्रममगचछत्। तत्र गुरोराश्रमेऽयं बहुसुखी साधुभिसार्धं ब्रह्मविचारे कालमनयत्–

तत्राध्यात्मिकचर्चायां धार्मिकैः सज्जनैः सह।
साधुना सह कालो हि तपसो मोददायकः[36]॥

अत्रैवाय्यणः साधुसभायां ब्रह्मचिन्तने प्रवृत्त एव गुरुणा सार्धमेव, उभावेव ब्रह्मणि नीलौ जातौ[37]। त्रिपुरान्तसरस्तटे अकण्यागाचिकायां गुहायां चालुक्यान्वयसद्गुरो परहितराजस्य प्रधानशिष्यभूतस्यायूणगुरोः साधुशम्भेरय्यणस्य च समाधी वर्तेते। जयसिंहस्य पुत्रो सामेश्वरो हि समाचारमधिगत्य तत्र गत्वा सर्वं सामयिकं कार्यं सम्पाद्य पात्रेषु दानविश्राणनमकरोत्। त्रिपुरान्तं यत् सरस्तस्य निर्माणं राजा तैलपः पुराकारयत्।

इदं सरस्तैलपेन पुत्रकामनया कृतम्[38]।

अत्रैव राजा अय्यणो शिवलिंगं संस्थाप्य भव्यं शिवं मन्दिरमकारयत[39]। अम्य वैमातृकस्य भ्रातुर्जयसिंहस्य पुत्रः सोमेश्वरः इरट्टपाडीं निर्जित्य महाराष्ट्रस्य भूभागे कोल्हापुरे विजयस्तम्भमस्थापयत्[40]। एवमेवाय्यणवंशस्यात्र चित्रिता दृश्यते विचित्रा स्थितिरिति।

(9)

अय्यणो द्वितीयः दशवर्मणः पुत्रस्तस्य पुत्रश्चद्रदेव आसीत्। स चन्द्रदेवः शरीरसम्पत्सम्पन्नो गुणवान् पराक्रमी चाभवत्। स स्वगुणैः स्वपितुः स्वसारमकूलामकरोत्। सोमदेवो हि अक्कादेव्याः पुत्र आसीत्। वनराजस्य भानुङ्गलस्य च राजा स्वामात्रदिष्टः सन्नात्मनस्तनया रूपवत्या सार्धं चन्द्रदेवस्य विवाहोऽकरोत्। स रूपगुणैरलङ्कृतां रूपवतीं चन्द्रदेवाय दत्वा कोंकणस्थान् ग्रामान् चांदवाद्रादुर्गमपि प्रादात्।

अतः परमसौ अय्ययणस्य पुत्रश्चन्द्रदेवो राजपुत्रोऽभवत्। चान्दवाऽदुर्गोऽयं पुरा द्वितीयस्य पुलेशिनो ज्येष्ठ पुत्रस्य चन्द्रादित्यस्यासीत्। दुर्गमिमगधिगम्य चन्द्रदेवोऽस्य जीर्णोद्वारं कारयित्वात्रैव राज्यस्थानमकरोत्।

धारवाडसमीपे सूबीप्रान्तमासीत्। तैलपो राजा गंगवंशजराष्ट्रौढसामन्ताद् विजित्यासीत् स्तायत्तीकृतम्। अय्यणस्य द्वितीयः पुत्रोऽत्रैव दुधोवियाँ सूबीदुर्गेन्यवसदाइकदेवः। तृतीयः पुत्र आसीत् कतिवारदेवो हि कोंकणस्थात् महामण्डलेश्वरविरुदविभूषितात् सेनान्दकुलवात् सेंदकमातुलात् साममगढदुर्ग, नेरूरदुर्गं सप्ततिग्रामान् च समधिगम्य तत्रैव न्यवसत्।

भूदेवेन अब्धिचन्द्रे भे (817) शके स्वनाम्नः भूदरगढदुर्गमकारयत्। सेलरवंशभोजदेवेन तस्य जीर्णोद्वारो हीषुशशिचन्द्रभूमिशके वर्षे (1115) अकारयत्। भोजदेवस्य कन्यायाः विवाहः कामदेवेन साकमभवत्। तस्मिन् विवाहे स तं दुर्गं कामदेवाय दत्तवान् असौ भोजः पंचदशसंख्यानां दुर्गाणां स्वामी आसीत्। कामदेवस्यापरं नाम बंकिमदेव आसीत्। ततः प्रभृतिरष्टादश शकशताब्धन्तं दुर्गोऽसौ चालुक्यानामाधिपत्ये ह्यतिष्ठत्।

चतुर्थोनरसूदेवः शिंदियानरपतेरमात्योऽभवत्। स स्वकार्यकौशलने सिंदियानरपतेः प्रीतिभाजनमभवत्। स स्वकार्यकौशलने सिंदियानरपतेः प्रीतिभाजनमभवत्। चन्द्रदेवस्य पुत्रो हरपालदेव आसीत्। हरपालदेवः कोंकणे स्वां वसतिं चक्रे। तृतीयात् सोमेश्वराद न्तरं शासनाधिकारसूत्रधारिणस्त्रयोऽपि शासकाः निर्बला अभवन्। तृतीयस्य चालुक्यवंशीयस्य शासकस्य शासने विजल्लानामकः सेनापतिरासीत्। सहि कलचुरीवंशीयने राजपवतेन राज्ञा सन्धिंकृत्वा नन्दरामाक्षिचन्द्राख्ये (1239) शके वर्ष चालुक्यानां कल्याण्यां स्वस्य शासनतन्त्रमस्थापयत्। लिङ्गायतानां शासको बसवा सहि स्वभगिनीं विजल्लाख्याय कल्याणीशासकाय ददौ। स बसवा कालेन स्वाऽऽवुत्तं

भगिनीपतिं विषप्रयोगेण जघान। दुष्कर्मणो दुर्गति र्ध्रुवेति शाश्वतं सत्यम्।

अस्मिन्नेव काले यादवो बल्लालस्तमाक्रम्य निर्जित्य च प्राणदण्डेन तममदण्डयत्, तस्य कालचुरीराज्यं चाग्रहीत्। कालचुरीराज्यं स्वबुद्धयाधिगम्य तैलपस्य पुत्रः सोमेश्वरः कल्याण्यां राज्यमस्थापयत् परन्तु बाणाब्ध्यक्षिचन्द्रके (1275) शके वर्षे होसालैर्यादवैश्च मिलित्वा स्ववशे कृतम्। हरपालस्य पुत्रो गोविन्दः सोमदेवश्चास्ताम्। एषा राज्यहानिस्तयोः समयेऽभवत्। अनया चालुक्यस्तेषां सम्बन्धिनश्चातिपीडिता अभवन्।

हरपालस्य द्वितीयः पुत्रः सोमदेवस्तस्य पुत्रो रुद्रदेवः सहि सेलरकदम्ब वंशयोः सम्बन्धात् कोंकणे स्वस्थितिमस्थापयत्। परन्त्वग्रे विपक्षिणो नाना विधमिषैरस्य महतीं हानिं विधायानेके चालुक्यवंशीयाः घातितास्तैरेव।

गोविन्दो ह्यय्यणस्य प्रपौत्रः, चन्द्रदेवस्य पौत्रः, हरपालस्य पुत्र आसीत्। अस्यापरं नाम वेंदुगीत्यासीत्। अयं हि अय्यणकृतान् ज्योतिषशास्त्रीयसिद्धान्तान् काशीस्थैर्विद्वद्वरैरनुवाद्य प्रसिद्धानकरोत्। परमसावपि दुष्टैर्घातितः। अस्य वंश्यो बंकिदेव आसीत्, तस्य पुत्रश्चन्द्रदेवः, सोऽपि दुष्टैर्घातितः, अस्य पुत्रः कामदेव आसीत्। अयं हि कामदेवो बलवुद्धिविद्यासम्भृतोवीरो विक्रान्तः नयनिपुणश्चासीत्। अयं चालुक्यकुलस्य पुनः कीर्तिं संवर्धयामास।

अस्य कामदेवस्य पुत्रः सोमेश्वरोऽभवत्। असौ नीतिनिपुणः शासको मण्डलेश्वरोपाधिविभूषितोऽभवत्। अस्य पत्नीं शिंदेवशस्य नरपतेः कन्यासीत्। देवभिर्नृपो महादेवः पौनःपुन्येन कोंकणस्योपर्याक्रमणं कृत्वा तं प्रदेशामपीडयत्। असौ सोमेश्वरो राज्यत्रयस्य साहाय्यमधिगम्य रसवेदाग्निचन्द्राख्ये (1346) शके वषे तमुपाद्रवत्। परन्तु तस्यापरिमिता शक्तिमवलोक्य सं सर्वैः सार्धंततः पलाय्य गोवाप्रान्तं गच्छन् पोतभंगात् सर्वैः सार्धं जलेन्यमज्जत्।

वीरभद्रेश्वरो हि सोमेश्वरस्यानुज आसीत्। यादवेन्द्रमहादेवस्योपर्याक्रमणकरेण सोमेश्वरगणतिमालवराजसमाहारः शक्तित्रयमासीत्। गणपतिस्तु यादवेन्द्रमहादेवाद्भीतो वारंगलस्थाने स्वराजधानीमकरोत्। अस्य गणपते कन्याद्वयं सन्ततिरासीत। ज्येष्ठा कन्या गणाम्बा कनिष्ठा रुद्राम्बा चासीत्। गिर्यग्निसमाब्जशके (1337) वर्षे रुद्राम्बा वारंगलस्य शासिकाभवत्। तस्या विवाहो वीरभद्रेश्वरेण सममभवत्। वारंगलस्य राजापुत्रसन्ततिराहित्यनैनं राज्यासनस्वीकारस्य पार्थितवान् परमयं तस्य तां प्रार्थना न स्वचकार तस्य दत्तकपुत्रकरणप्रार्थनाम्। अतः वारंगलस्य प्रशासिका सैव रुद्राम्बैव राज्यं चकार।

देवगिरेस्तु राज्यं यादवानामासीत्। तस्य राजा सिंहण आसीत्। ततस्तस्य द्वितीयः पुत्रः द्वितीयो जयतुंगी राज्यासने समुपाविशत्। स जयतुंगी नीतिमान धार्मिकश्चासीत्। अस्य कनिष्ठो भ्राता शाङ्र्ग्रपाणी महादेवेनाभिसन्धिं कृत्वा शाङ्र्गपणिनं बलाद् राज्यशासनात् पृथगकरोत्। स शाङ्र्गपाणी वीरभद्रेश्वरस्य शरणमाययौ। वीरभद्रेश्वरस्तस्य साहाय्यं कृत्वा तं पानुंगलस्य राजाकरोत्। तेन यादवानां राजा

महादेवः कुत्रोनन्दरामाग्निचन्द्राङ्के (1339) शके वर्षे वारंगलमाक्रम्य रुद्राम्बामजयत्। वीरभद्रेश्वरस्य कन्या मुम्मदाम्बासीत्। सा देवगिरेः राज्ञः पत्नी आसीत्। रुद्राम्बा पुत्राभावात्तस्याः पुत्रं स्वदौहित्रं प्रतापरुद्रं दत्तकविधिना पुत्रं चकार। रुद्राम्बायाः राज्यकाले तस्याः राज्येनेकानि धार्मिकाणि प्रजाहितमयानि कार्याणि समपद्यन्त।

सोमेश्वरवीरभद्रेश्वरयोः कनिष्ठो भ्राता बाघदेवान्यर्नामको नरेन्द्रदेव आसीत्। अयं बाघदेवो हि नामगुणानुसारिपराक्रमोत्साहपरिवृद्ध आसीत्। मुंगुदेवः, केशवदेवः कामदेवश्चेति त्रयः पुत्राः नरेन्द्रदेवस्याभवन्। तेषु कामदेवः कामदेवस्य पौत्र आसीत्। कामदेवस्य पत्नी कदम्बवंशीयस्य पुरन्दररायस्य कन्या पद्ममालासीत्। चालुक्यानां कालोऽयं क्लेशकर आसीत्।

(10)

कामदेवस्य सोमेश्वरस्यवीरभद्रेश्वरनरेन्द्रदेवास्त्रयः पुत्राभवन्। मंगुदेवकेशवदेवकामदेवास्तु नरेन्द्रदेवस्य बाघदेवापरनामकस्य पुत्रा आसन्। वीरभद्रद्रेवरस्यैका कन्या मुम्मदाम्बैवासीत्। सा देवगिरेः राज्ञो राज्ञी सुतमेकं प्रतापरुद्रमजीजनत्। स हि वीरभद्रेश्वरस्य दौहित्र आसीत्। वीरभद्रेश्वरो हि स्वदौहित्रं प्रतापरुद्रं दत्तकविधानेन पुत्रमकरोत्। सोमेश्वरः कर्णदेवापरनामकः नरेन्द्रदेवस्यकनिष्ठं पुत्रं कामदेवं धर्मशास्त्रविधिना पुत्रमकरोत्। असावेव कामदेवो हि बंकिदेवापरनाम्नापि प्रसिद्धोऽभवत्। कदम्बवंशीयस्य पुरन्दररायस्य सन्ततिस्त्वैका पुत्री पद्ममाला यया सार्धं बंकिदेवस्य विवाहोऽभवत्। कदम्बवंशस्य सेवैकाधिकारिण्यासीत्।

एवं स सोमेश्वरस्य पुत्रो बंकिदेवः पितुर्नयेन राजा भूत्वा महा मण्डलेश्वरविरुदभागभवत्। अस्य सोमेश्वरसुतस्य द्वितीया पत्नी कमलादेवी आसीत्। कमलादेवी ह्यस्य ज्येष्ठा पत्नी कदम्बुकुलजा तस्य गोवानृपस्य त्रिभुवनमल्लस्य कन्या परमधार्मिकस्य द्वितीयस्य षष्ठदेवस्य भगिनी चासीत्। षष्ठदेवोहि निःसन्तन एवाभवत्। अतो हि गोवा प्रान्तस्याधिकारः बंकिदेवस्य ज्येष्ठायां राज्यां कमलादेव्यामेव समागतः। तद्गोवाराजयं कालान्तरेण यादवैर्विजित्य स्ववशे कृतम्। परमस्यान्योविवाहः सह्याद्रिराजस्य सेलावरवंशजस्य भोजस्य कन्यया भवत्, अस्मिन् विवाहे भोजोऽस्मै पंचग्रामैः सहितं भूदरगढं दत्वा, एनं पुनः राजासनेन सनाथमकरोत्। वीरभद्रेश्वरस्य पुत्रः प्रतापरुद्रोऽप्येनं स्वकुलमिति मत्वा महत्या प्रीत्या कल्याण्याः परितः ग्रामात् प्रदाय, अस्यापि कारक्षेत्रस्य संवर्धनमकरोत्।

अयं महाप्रभावशाली प्रतापरुद्रदेवः कोंकणे कर्नाटके च महिमाशाली अभवत्। अस्य पुत्रो हि हरिपालदेवोऽभवत्। यादवानां राजा रामदेवः स्वसुन्दरीं कन्यां हरिपालदेवाय चालुक्याय प्रादात्। शंकरदेवो हि रामदेवस्य वीरो धुरीणः पुत्र आसीत्, स हि हरिपालदेवस्य श्यालक आसीत्। यादवेभ्यः करमनधिगम्य दिल्ली प्रशासनसेनानायकः मलिककफूर इति नामकः शङ्करमाक्रम्य तद्वधमकरोत्। अस्य राज्यस्यैवं भूतायां स्थितौ यादवेन्द्रस्य

रामदेवस्य जामात्रा हरिपालदेवेन सर्वप्रकारेण संरक्षणाक्रियत। इदमल्लिककफूरस्याक्रमणं अभ्राङ्करामचन्द्राख्ये (1390) शकेऽवर्षेऽभवत्। गुर्जरदेशः कर्णदेवो हि चालुक्य एवासीत्। स हि अल्लाउद्दीनेन इष्वद्रिरामचश्रद्रख्ये (1375) शके वर्षे पराजितः, ततः पलायूय यादवानां राजधान्यां देवगिरौ रामदेवस्याश्रयमागत्य जीवनं लेभे।

रामदेवकर्णदेवयोः सम्बन्धेन सम्बद्धो हरिपालदेवः इत्याकलयूय दिल्ली शाहो हि अल्लाउद्दीनस्तस्योपरि कदाप्रदानारोपं कृत्वा तस्य पत्नीं कमलादेवी दिल्लीमनयत्। मिषेणानेन इन्द्वङ्करामचन्द्राख्ये (1391) शके वर्षे तेषु जन्यमभवत्।

अस्मिन् जन्ये चालुक्यकुलभूषणः गुर्जरेशः कर्णदेवः दिविगतः। अस्य कालस्य सविध एव मुबारको दिल्ली सुल्तानो हि दक्षिणं देशमुपाद्रवत्। तत्र समरे बहवो वीरवराः राजानः सेनानायकश्च तेन निर्घृणेन हत्वा हरपालस्य महतीं दुर्दशां विधाय तस्य शिरश्छित्वा देवगिरेः दुर्गस्य द्वारदेशे लम्बयित्वा स्वक्रौर्येण लोकान्मातङ्कयत्। नारायणदेवो वीरदेवःशक्तिदेवश्चेति त्रयः पुत्राः हरपालस्यासन् ते तु गुर्जरेशस्य कर्णदेवस्य भ्रात्रा सौभाग्यदेवेन संगृह्य कथंकथयति कोंकणे नीत्वा नरेन्द्र देवस्य व्याघ्रदेव इत्यपरनामकस्य पुत्रयोर्मङ्गुदेवकेशवदेवयोः संरक्षणे कृत्वा तावरक्ष्येताम्। एते त्रयोपि कुशलाः समर्थाः भूत्वा कल्याण्याः निकटस्थनां ग्रामाणां नारायणदेवो व्यवस्थामकरोत्। वीरदेवो हि स्वभ्रात्रा शक्तिदेवेन स कोंकणस्थान् कर्नाटकस्थान् ग्रामान् ररक्ष।

समयोऽयं तुरुष्काणां प्राबल्यस्यसीत्। एते शिखानष्टाः सर्वे स्ववर्चस्वसंस्थापने निरताः, दक्षिणं भारतं स्वोपद्रवैरुपद्रुतमकुर्वन्। एतेषां नवागन्तुकानामाततायिनां इसलामधर्मपराणां भारते स्वराज्यसंस्थापनं भारतीयधर्मसंस्कृत्याचारपरम्पराणाविनाशनं तथा च भारतीयानां हिन्दुपदवीच्यानां जनानां इसलामीकरणमेवोद्देश्यमासीत् तेन प्रेरितैस्तैस्तथैवावतूर्यत।

हिन्दूनां घातनं तेषां धर्मस्य परिवर्तनम्[11]।

हिन्दुपदवाच्यावयं भारतीयाः प्रायेणातिस्वार्थिनो भवामः। संस्कृतिसदाचार-जातिधर्मराष्ट्रादिविषयेषु चर्चा महती गरीयसी कुर्मः, परं तद्रक्षार्थं त्यागं कर्तुं न जानीमः। तदापि तथा भूतैव स्थितिरासीत्।

होतालकाकतीयानां पाण्ड्ययादवभूभृताम्।
सुसमृद्धानि राज्यानि नष्टानि कलहान्मिथः॥
हिन्दूनां नाशनैस्तेषां धनधान्यादिलुण्ठलनैः।
व्यवस्थारहितैर्रक्तापातैर्दक्षिणमाङ्कितम्[12]॥

चालुक्यानां सूनुर्नाराथणे देवस्तेनचिन्तितः सन् नयनिपुणः ब्रह्मनीराज्यस्य प्रशासकेन अलाउद्दीनबम्हनशाहेन मैत्रीं कृत्वा तस्य पक्षेऽगच्छत्। दिल्लीराजधान्यां खिल्जीवंशस्य नाशात् ग्यासुद्दीनतुगलकस्तत्रस्थो शाहोऽभवत्। स गयासुद्दीनतुगलकोऽपि दक्षिणे भारते स्वराज्यप्रस्तारमैच्छत्।

अस्मिन्नेव काले काकतीयानां नायकेन तैलङ्गराजेन कन्हैयानामकेन अलाउद्दीनब्रम्हनशााहस्य शासनमस्वीकृतम्, तथैव वीरवल्लालेनापि तस्य शासनमुललङ्घ्य द्वारावत्यां स्वराज्यं संस्थापितम्। अस्मिन्नेवावसरे ब्रम्हनशाहस्यालाद्दीनस्य शासनमपरिगणय्य अलाउद्दीनहसननामा दक्षिणे स्वीयं स्वतन्त्रं राज्यं समाघोषयत्। एतत् सर्वं वृत्तं गजाक्षिवेदाब्शकवर्षाणां समीप एव घटितम्।

दभाक्षिवेदाब्जेषु शकवर्षेषु अलाउद्दीनहसनः कम्बरखनने स्वसेनापतिना कन्हैयानायकेन च सार्धं दक्षिणं देशमाक्रम्यानेके विप्लवाः कृता। अत्रास्मिन् युत्रे चालुक्यवंशीयाः हरिपालदेवस्य नारायणदेववीरदेवशक्तिदेववास्त्रयोऽपि पुत्राः पंचाशद्दिवसान् यावद्घोरं युद्धं कृत्वा तैरतस्यावरोधः कृतः। परन्तु अन्ते चालुक्यानां कल्याणीदुर्ग कम्बरखानेन विजित्य स्ववशमानीतम्। अलाउद्दीनहासनस्य पक्षपाती चालुक्यानान्च विरोधी तैलाङ्गानामन्तरं कम्बरखानेन जितो दुगतिन्चगतः।

कल्याणीदुर्गस्य निर्गमनाद्दुःखितो येन केन प्रकारेणात्मानं सुस्थिरीकृत्य कृष्णाद्यप्रमानद्योर्मग्धस्थैः स्वबान्धवैः परामर्शं विधाय महीनुद्दीननवाबं स्वदलेऽकरोत्।

अत्र नयस्य नयनं विपरीतमिव जातम्। यतो हि तेन महीनुद्दीननवाबेन प्रचारितं यन्नारायण देवोऽसौ अलाउद्दीनब्रम्हनशाहाद् विद्रोहं कृतवान्। अतस्तेन ब्रह्मनशाहेन ख्वाजाजहानमिरजामुन्दारः कुतुबुल्मुल्कश्च विद्रोहद्रावणाय प्रेषितौ स्वयन्च महतीं सेनामादाय विद्रोहिणां दण्डविधानार्थभागत्य विद्रोहस्य प्रशमनमकरोत्। दक्षिणे भारते सर्वत्र विद्रोहा इति श्रुत्वातिदुःखितस्य तुगलकस्य हृदयगतिरवरुद्राभवत्तेन च स कालकविलतोऽभवत्। अस्मिन् युत्रे स ब्रह्मन् शाहो हि कलाबगूरस्य, मूघोलस्य कायवासिनः दुर्गाणि विजित्य स्ववशगानि कृतवान्।

अलाउद्दीनब्रम्हनशाहो नीतिमान् वीरवरचासीत्। तेनायं नीत्या भाविविद्रोहदमनाय नारायणदेवाय, वीरदेवा शक्तिदेवा तथा चैतेषां पक्षपातिभ्य कल्याण्या अधिकारं ग्रामादिकं च शासनाधिकारं दत्वा नारायणदेवस्य भ्रातरौ वीरदेवशशिक्तदेवौ स्वसेनायां मान्यस्थाने नियोजितौ—

नारायणात् प्रसन्नोऽसौ वीरदेवं बलान्विम्।<br>
शक्तिदेवं स्वसैन्ये तु भ्रातरावस्य चानयत्[13]॥

पुनरलाउद्दीनब्रम्हनशाहो हि नारायणदेव नेतृत्वे कल्याण्याः कोहीरस्याधिकारार्थं सेनां प्रैषयत्, अस्मिन्नवसरे ह्यवसरमुपलभ्य नारायणदेवो हि वातापिदुर्गमधिकृत्य तत्र स्थितं मुहम्मदनामानं शासकं हत्वा तद्दुर्गं स्वस्याधिकारे समानीय तस्य जीर्णोद्धारादिक विधाय पितृणां कीर्तिं सन्जीवयामास।

तदा नारायणोदेवः कूटनीतिविशारदः।<br>
स्वस्य वातीपिदुर्गस्थ जहौ तं च मुहम्मदम्॥<br>
जीर्णोद्धारेण सुदृढः कृतोऽसौ दूरदर्शिना।<br>
विपरीते हि समायाते सम्भवेदात्मरक्षणम्[14]॥

पुनर्हि ब्रम्हनशाहस्याधिपत्ये स्थिते त्रिचनापल्लिराज्ये वीरवल्लालेनाक्रान्ते सति ओडिवाहरिहरेणाक्रामकं वीरवल्लालं हत्वा तद्रास्य रक्षणं विहितम्। एवमसौ त्रिचनापल्लिं तस्मादुन्मुच्य अलाउद्दीनब्रम्हशाहस्याधिकं प्रीतिपत्रमभवत्। तुष्टो ब्रम्हनशाहोऽस्मै विशालौ गोवाबंकिपुरप्रान्तौ चादात्।

अत्रास्माद्वीरदेवशक्तिदेवौ समस्याग्रस्तौ जातौ। राज्यस्य संरक्षणाय राज्य चतुःपु भागेपु विभत्य प्रत्येकस्य कृते चत्वारो ह्यधिकारिणस्तेन नियोजिताः। तत्र गुलबर्गप्रान्तस्य प्रबन्धकः सैफुद्दीनघुरीं, दौलताबादस्य बहरामखानं, बरारप्रदेशस्य सफदरखानं वीदरप्रान्तस्य रक्षायै स्वसुतं हुमायूंअजमीनामानन्च नियोज्य स प्रतापी अलाउद्दीनब्रम्हनशाहो विद्रोहविहीनं राज्यं चकार।

एवं सुव्यवस्थितं राज्यं विधाय नयनिपुणो ब्रम्हनशाहोऽसावलाउद्दीनः स्वराज्यविस्त रं चिकीर्पुर्हि महतीं सेनामादाय गोवाप्रान्तं कोंकणन्च स्वीये राज्ये ससेनो निरीक्ष्य तयोरुत्तरस्थं दाभोलभूभागं तथा च सामुद्रिकं मार्गमिति सर्वं स्ववशमानय समाग्रामत्। अस्मिन्नाक्रमणे चालुक्यवंशसंबद्धानि दक्षिणभूर्भोगस्य सर्वाणि राज्यानि ब्रम्हनीयशासने कृत्वा स शैफुद्दीनप्रशासितं गुलबर्गमाययौ।

अस्मादलाउद्दीनब्रम्हनशाहस्याक्रमणाद्विजयाच्च चालुक्यवंशजाः बहुकष्टं गतास्तेन नारायणो देवस्तु अतिखिन्नोऽभवत्।

तेन चालुक्यवंशस्य ग्रामाः कोंकणसंस्थिताः।
बङ्कापुरश्चादम्बाडो गोवा च निर्गताः क्रमात्॥
योगिभुजबलौ यौ च देवौ पूर्वं शशासतुः।
चालुक्यकुलजौ वीरौ चिराय स्वबलेन च॥
एतौनारायणस्यास्तां पितृव्यस्य वीरपुत्रकौ।
तेन नारायणस्याभूद् महद्दुःखं विलोक्यतत्[15]॥

श्रुत्यग्निवेदाब्जे 1434 शे वर्षेऽत्रैव पुनर्युद्धमभूत्। अस्मिन् युद्धे योगिदेवो भुजबलदेवश्चोभौ मृतौ वार्तयानयातिदुःखितो गुर्जराधिपस्य कर्णदेवस्य पुत्रो हरणदेवः सहायतार्थमगमत्। अत परं सर्वे चालुक्यवंशीयाः सम्बन्धिनश्च सम्यक् संघीभूय अलाउद्दीनब्रम्हनशाहं कोंकणाद्रावसासु।

कोंकणे परास्तोऽलाउद्दीनशाहोऽसौ बगलानाधिपतेः मानसिंहस्य प्रेरणया नारायणदेवकर्णदेवाभ्यां चालुक्याभ्यां सन्धिमकरोत्। अस्या सन्धौ स नवसरीभूभागं दत्वा स्वप्रशासनेऽप्यधिकारपदं ददौ ब्रम्हनशाहः। प्राप्तवया नारायणदेवौ हि श्रान्तः क्लान्तश्च रुग्णोभूत्वा इभशेक्षवेदाब्जे (1338) शके वर्षे स्वपावनीं कीर्तिं लोके विस्तार्य चालुक्यकुलावतंसः स्वर्गमगच्छत्।

(11)

पुराकालाद्दिल्ली भारतस्य राजधानी वरीवर्तते। मुहम्मदतुगलको हि राजधानीं

दिल्लीतः दौलताबादे समस्थापयत्। दौलताबादस्याधिपतिमुहम्मदतुगलकः मुहम्मदतुगलकीयानां मुद्राणां प्रसारमकरोत्। आसामुद्राणां प्रसारसमये बुक्को नृपो विरधमकरोत् तथा च कौलाशाधिपतिं रायचूराधिपतिन्चादिष्टवान् यत्तौ यदि ह्यासां मुद्राणां प्रसाराय सह।यकौ भवतस्तदा तौ तस्य कोपपात्रतां गमिष्यत्। तौ बुक्कस्यादेशं शिरोणार्य तुगलकाय सन्देशं प्रैषयताम्। महान् धूर्तो मुहम्मदतुगलको हि दूतमष्टदशमासं यावदातिथ्यमिषेण बन्दीकृत्यावश्यक सैन्यव्यवस्थासुदृढीकरेणे संलग्नोऽभूत्। दूतस्यानागमेनेन रुष्टौ सत्तावाक्रमणाय कृतमती बुक्कस्यायुतद्वयसंख्याकाश्वाहिन्यासार्धं स्वसेनया सार्धं कन्हैयानायकस्यपुत्र विनायकदेवो हि युद्धाय सन्नद्धोऽभवत्। खावेदवेचिन्द्राख्ये (1440) शके वर्षे घोरं युत्रं तत्राभवत्।[46]

अस्मिन् युद्धे विजयानगरस्याधिपतेः कन्हैयानायकस्य महती क्षतिरभवत्। अत्रास्मिन्नेव संगरे चालुक्यकुलश्रेष्ठस्य नारायण देवस्य पुत्रौ शक्तिदेवो गोगीदेवश्च वीरगतिं गतौ।

कन्हैयानायकस्यासीत्तत्र हा महती क्षतिः।
चालुक्यः शक्तिदेवश्च गोगीदेवश्च भ्रातरौ॥
नारायणस्य देवस्य मृतौ तत्संगरे तदा।
तेन हिन्दुनृपाणान्तु सम्बन्धः श्लथतां गतः[47]॥

अतः परं पुनर्हि हिन्दुनृपाणां संघटनात्मकः सम्बन्धः प्रश्लथितोऽभूत्। अस्मिन्नेव वर्षे मुहम्मदतुगलकेन समानीतान् आरबान् अश्वान् बलाद् स्वसेनायामग्रहीत्, तेन रुष्टस्तुगलकः पुनस्तदुपरि आक्रमणकरोत्। स तं विनायकदेवं बन्दीकृत्य तस्य जिह्वामुत्पाटय दुर्गादधोऽग्नि कुण्डेऽपतायत्। ततः परावर्तनकाले मार्गे हिन्दुराजैर्महती क्षतिः कृता। पुत्रशोकसन्प्तो हि कन्हैयानायकः दौलताबाददुर्गपालेन बहरामखानेन विद्रोहमकारयत्। तदा स दिल्लीशं फिरोजतुगलकं साहाय्यमयाचत। स साहाय्यमप्राप्याधि तैलङ्गानां प्रदेशमाक्रम्य वर्षद्वयं यावत् कन्हैयानायकमपीडयत्। बहुमूल्यसिंहासनं गोकुण्डस्य राज्यं च दत्वा स तेन सन्धिमकरोत्। मुहम्मदस्तत्र विजयेन मत्त इव पुनः समाक्रामत्।

अत्रास्मिन्नेव युद्धे इषुवेदयुगे बाणे (1440) वर्षे भारते सर्वप्रथमं गोलाबारुदसम्पन्नै तुरुष्कैः सार्धं भारतीया अयुध्यन्त। अस्मिन् युद्धे तुरुष्कैरसंख्यबालबनिताः घातिताः। अत्रस्मिन् युद्धप्रसङ्गे चतुर्लक्षसंख्याकाः हिन्दवः येषु दशसहस्रसंख्यास्तु वेदशास्त्रपारगाः विद्वांषः पण्डिता आसन्। 1445 इ वर्षीये युद्धे नारायणदेवस्य भ्राता वीरो वीरदेवोऽपि वीरगतिं लेभे। अतो बुक्को नृपोऽपरिमितं तदिच्छाप्रमाणं विजयानगरकोषस्य धनं प्रदाय तेन सन्धिमकरोत्।

अस्मिन्नेवावसरे कोण्डिवादेवादिप्रचोदितः दौलताबादस्य शासकः बहरामखानो विद्रोहमकरोत्, अस्मिन् विद्रोहे 1445 वर्षे जगलानाधिपतिकोण्डिबादेवो तथान्ये तयोः सहायकाः बहरामखानस्य साहाय्यमुकुर्वन्। स मुहम्मदः महतीसेनासम्पन्नः

मुहम्मदखाननामकेन सेनापतिना सार्धं स्वयमेवास्य विद्रोहस्य दमनार्थमागत्य विद्रोहिणां सेनां निपीडयामास। अत्र ह्यतो भीतो बहरामामखानः गुर्ज रं गत्वा शरणं लेभे।

(12)

विजयानगरस्याधिपतिर्जि हरिहरोऽभवत्। हरिहरस्य पुत्रो बुक्क आसीत्। अयं हि राज्यचिन्तां विहाय स्वोपभोगविलासानां कृते कृत संकल्प इवासीत्। दक्षिणे भारते कालेऽस्नि् हिन्दूनां महती दुरवस्थासीत्। इस्लामधर्मध्वजिनस्तुरुष्कास्तु स्वशक्तिसंवर्धने स्वराज्यविस्तार स्वधर्मविस्तारे च दृढसंकल्पा आक्रमणोपर्याक्रमणं कुर्वन्तः निर्दोषान् बालकान्, स्त्रियः, वृद्धान् विदुषश्च घातयन्तः लुण्टाका इव धनं लुण्ठन्तः, सुरूपाः कुमारिकाः स्त्रियो वा बलादपहरन्तः, बलेन, प्रवाऽनेन, प्रलोभरेन हिन्दूनां धर्मपरिवर्तनं कुर्वन्तस्तुरुकाः भारतं भारतीयतारहितं विदधन्तः स्वशासनं दृढ़यितु दृढ़संकल्पा आसन्। समयोऽयं तत्र विजयानगरस्य बुक्कः शक्त्युपासनां विहाय सौन्दर्यापासनायां कृतमना आसीत्। विजयानगराधिपतेः वीरस्य विरोधिनां विद्रावकस्य हरिहरस्य वेदेभवेदचन्द्राख्ये (1484) वर्षे त्वितः स्वर्गाय प्रस्थानमभूत्। राजस्यापिकारो बुक्कमगच्छत्। प्राप्ताधिकारः स दुराचारीवाचरणमाचरन्नेकदाश्रुणोत्– कापि परथाला विद्यते। सा कुमारिकास्ति। कुमारिका परथाला स्वर्णकारस्य कन्यकास्ति। सा रमणीया, सा सुन्दरी, सा गुणगरिम्ण भूषिता, तस्याः सौन्दर्यमप्रतिमन्चेति। परं स स्वर्णकारो मुङ्गलग्रामे वसति। मुङ्गलग्रामो ब्रह्मनीराज्ये वर्तते। तत्रस्थो हि शासकस्त ताज्जुदीनफिरोज एवत सुलतानोस्तीति सर्वं श्रुत्वा मौढ्यात् सेनाधिकारणमाहूयाज्ञपयतामानेतुम्। स सेनामादाय तामानेतुं मुङ्गलमगच्छत्, तद्वार्ताविज्ञास्तत्रस्थाः स्वर्णकारास्तामादाय ततः पलायितास्ततस्ततस्तस्य सेनानायकस्य परावर्तनकाले तस्य सेनया ब्रह्मनीराज्यस्य ग्रामाः लुण्ठितास्तेन क्रुद्धो हि ताज्जुद्दीन फिरोजस्तं परमाविचारणिं वेदेभवेदचद्राख्ये (1448) वर्षे समाक्रमत्।

अत्र युद्धे विक्षतैः ताज्जुद्दीनफिरोजस्तु पराजितोऽभवत्, परं स पुनस्तत्राक्रमणकरोत्, अस्मिन्नाक्रमेण अहमदखानेन उभयोः राज्ययोर्मध्ये तुङ्गभद्रानदीसीमा निर्धारितस्तेन षष्ठिसहस्रसंख्याकाः हिन्दुजनास्तस्य दासा अभवन्। खानहमदभीतो बुक्कः महता यौतकेन सार्धं स्वकन्यां फिरोजाय प्रादात्। सा कन्या बुक्काद् वेश्यायांजासीत्।

यतो नाऽसीत् कन्यका सा निजा बुक्कस्य भूभृतः।<br>
साऽऽसीद् वेश्यासुता तस्य बुक्कस्य कुनृपस्य च[18]॥

बंकापुरात् परथालां स्वर्णकारकन्यकां समानीय फिरोजः स्वुपत्रेण हसनेन विवाहमकरोत् तथा तान् सर्वान् स्वर्णकारांस्तु स्वराज्ये मुद्राकार्ये न्ययोजयत्।

अस्मिन् युद्धे चालुक्यानां महती क्षतिरभवत्। नारायणदेवस्य शक्ति देवगोगीदेवकोण्डिबादेवविशालदेवाः पुत्रास्तेषु तुकदेवः कोण्डिबादेवस्य पुत्र आसीत्

हरपालदेवस्य पुत्रो वीरदेवः, वीरदेवस्य गोविन्ददेवः, अयं हि कोंकणमण्डलेश्वर आसीत्। अस्य पुत्र सुखदेवः, तुकदेवो हि कोण्डिबादेवस्य पुत्रस्तं स स्वपुत्रं सुखदेवमिव संवर्द्धयति स्म। गुर्जरदेशस्य कर्णदेवस्य पुत्रो हरणदेवस्तस्य पुत्रो मात्रकदेवः, सोपि युद्धे प्रपीडितः सन् गोविन्ददेवस्य शरणं कोंकणमाययौ।

चन्द्राङ्कवेदशशिके (1491) वर्षे दिल्लीशासनस्याधिकारिणौ हसेनस्तथा जमालुद्दीनसाबुः दिल्लीतो गुलबर्के निवासार्थमागतौ तेन ताज्जुदीन-फिरोजसुतस्य शाहपरमाहङ्काराधिरूढस्याहमदस्य मदः क्षीणोऽभवत्। ब्रम्हनीवंशीयः अलाउद्दीनब्रम्हनीशाहस्य पुत्रः फिरोजशाहो हि करप्रदानाय वारंगलस्य राजानमादिशत्। स तस्याज्ञां प्रालयितुं न सेहे।

अतः फिरोजशाहोऽपि इष्वङ्कवेदचन्द्राख्ये (1495) शके वर्षे तस्योपर्याकमणमकरोत्। फिरोजशाहनीक्रान्तं पांगुलदुर्गं, तदा विजयानगरस्याधिपतिः विजयदेवविनयदेवकटियारदेवैः सह वार्तां कृत्वा पांगुलराजेन सन्धिं विधाय, चालुक्याः तदाक्रमणरोधार्थं स्वसैन्यं तत्र प्रेषयामायुः। चालुक्यानां साहाय्येन बली कन्हैयानायको वर्षद्वयं यावद् युद्धं कृत्वा फिरोजशाहस्य सेना ततो निष्काषयति स्म। तेन रुष्टः हिमनीशाहः प्रतीक्ष्य शीघ्रदेव कन्हैयानायकस्य पुत्र विनायकदेवं जघान।

पुत्रशोकतप्तः कन्हैयानायको गोविन्ददेवस्य पुत्रं सुखदेवं दत्तकविधानेन पुत्रं कृत्वा राज्याधिकाराधिकारिणमकरोत्। असौ सुखदेव एव प्रतापरुद्र-नाम्नाख्यातोऽभवत्। अयं प्रतापरुद्रः स्वबन्धुहन्तारं फिजुल्ला-इंजुनामानं फिरोजशाहस्यप्रधानं हत्वा वैरशोधनं कृत्वा शत्रुभ्यो गतं सर्वं स्वीयं राज्यं परावर्त्य स्वपक्षीयान् चालुक्यवंशीयान् महता सम्भनेन पुनः संस्थाप्यात्मसुखं प्राप।

पुनः पितृभीत्या पलायितं अलाउद्दीनमोहम्मदं साहाय्यं दत्वा गुलबर्गराज्यमाक्रमयित्वा तत्राहमदं राज्ये संस्थाप्य फिरोजशाहपुत्रौ हसनखानमुबारक खानौ बन्दीकृत्य स्ववीरवैभवं प्रादर्शयन्।

अस्मिन् युद्धे फिरोजशाहो हतः, परमस्मिन्नेव युद्धे तुकदेवस्य सूनूर्वीरधुरीधो विनदेवो व्रणव्याप्तशरीरो भूत्वा स्वर्गं गतः। अहमदशाहो हि जमालुद्दीनस्य नययुक्तपरामर्शेण कल्याण्याः सर्वमधिकारं करियारदेवाय ससम्मानं प्रादात्। दशवर्षीयं काण्डिवादेवस्य पुत्रं गुलवबर्गे खाब्जबाणेन्दु (1510) वर्षे समानीय तस्य सम्यक् संवर्धनं कृत्वा शरनोबतपदे तं न्ययोजयत्। असावेव तवाजीदेव इति नाम्ना प्रसिद्धोऽभवत् चालुक्यानां बलेन युक्त अहमदशाहः पुनः तेलङ्गानं समाक्रम्य वारङ्गलमग्रहीत्। अस्मिन् युद्धे खुखदेवस्तस्य क निष्ठः पुत्रः केशवश्चोभौ वीराणां गतिं गतौ। अहमदो ब्रम्हनशाहश्चालुक्यानां साहाय्यमपि यशस्वीभूत्वा छलेन महोरस्य राजानं हत्वाहमदो हि शुभ्रां स्वकीर्तिं तमसा व्यलिम्पत्।

इष्वब्जबाणचन्द्राख्ये (1515) शके वर्षे तुरुष्को दिलावरखान इति नामा भारतभूमिं जेतुं प्रेषितः सन्नद्धोऽभवत्।

इष्वब्जवाणचन्द्राख्ये शके वर्षे दिलीवरः।
खांयुक्तः प्रेषितो जेतुं सर्वान् हिन्दूनृपान् तदा[49]॥

अस्य प्रथममभियानं कोंकणप्रदेशेऽभवत्, तत्र मराठानां राजा संगमेश्वरः सुखे इति नाम्ना प्रसिद्धस्तं रुरोध। अस्मिन्नवरोधे दिलावरखानस्य महती क्षतिरभवत्।

अस्मिन्नेव समये चन्द्रनेत्रेष्वब्जशके (1522) वर्षे विजयानगराधीश्वरस्यापि रायचूरमुडगलप्रान्तयोर्ग्रहणार्थं शङ्कुदेववीरदेवाभ्यां परामर्शं विधाय म्लेच्छसैनिकैरपि युतं महत्सैन्यं सज्जीकृत्य विजययात्रामकरोत्।

अस्मिन्नवसरे प्रहरणमिदं मासत्रयं यावत् प्राचलत्। तत्र संग्रामे हिन्दुनां राज्ञां पूर्वं जयोऽभवत् परं पश्चात्ते पराजिता अभवन्। अत्र अल्लाउद्दीनअहमदो हि मुडगलं प्रान्तं जेतु समर्थोऽभवत्। अत्रस्मिन् युद्धे विजयानगरस्य नृपतेः देवरायस्य पुत्रो वीरगतिं लेभे। ततः परं बंकापुरप्रान्ते युद्धमभवत्, तत्र तस्मिन् युद्धे वीरवरो चालुक्यकुलभूषणौ कटियारदेवकोण्डिलादेवौ दिवङ्गतौ।

शिखानष्टैः कृतामय मानस्थितिं विचिन्त्यस महाराष्ट्रकर्नाटकादिभागस्य हिन्दुभिर्नृपैः सङ्गठितरूपेण तुरूष्काणां प्रतिरोधं कर्तुं निश्चयं कृत्वा कार्यस्यास्य समारम्भः कोंकणभूभागस्योत्तरभागतः क्रियते स्म।

तुरुषकास्तु कोंकणे प्रविश्यशिरकेनरेशं जित्वा बन्दिनं कृत्वा तं हीसलामधर्मस्वीकरणार्थं प्राचोदयन्। स नीतिनिपुणस्तान् न्यवेदद्यावत् सङ्गमेश्वरो मुस्लिमधर्मदीक्षां न गृहीष्यति तावदहमपि न गृहीष्यामि।[50] वृत्तमेतच्छलात्मकं स सङ्कमेश्वरं नृपं प्रैषयत्। ततो ह्युभाभ्यां मिलित्वा कोंकणकानने तुरुषकाणां सेना नाशिता। परमस्मिन् युद्धे कोण्डिबादेवस्य भ्रातरौ चालुक्यवीरौ शङ्कुदेववीरवरदेवै हतौ।

1547 शके वर्षे मुहम्मदगवां सङ्गमेश्वरभूपालं खलनाभूपालन्चाक्रामत्। ताभ्यां रुद्धोऽसौ कूटनीत्या पंचमासान् यावत् युद्धं कृत्वा षष्ठे मासे कोल्हापुरमाक्रमत्[51]। अत्र भोसलेवंशीयेन राज्ञा शतघ्नीभिः परिवेष्टिते सुदृढं दुर्गे गोधानां प्रयोगं कृत्वा तस्याभ्यन्तरे सैनिकान् प्रावेशयत्। प्रविष्टै सैनिकैः दुर्गस्योद्धाटिते द्वारे तस्य सैनिकाः प्रविश्य तुरुष्कान् निहत्य दुर्गं स्वाधीनमकुर्वन्।

मुहम्मदगवां पुनः अङ्कवेदेषुचन्द्रके (1549) वर्षे गोवानगरमाक्रम्य तं विजित्य पोतविश्रान्तिस्थानं स्ववशमकरोत्, तेनहजयात्रायां सौविध्यं वैदेशिकव्यापारस्य च लाभोऽभवत्तस्मै। ततासौ खबाणेष्वब्जके (1550) वर्षे कर्नाटकं कोंकणन्चाक्रम्य सप्तसंख्याकान् खोलना-सोनगीर-कराट-सङ्गमेश्वर-कोल्हापुरबेलगांव-बंकापुरस्थान् हिन्दुनृपालान् विजित्य गोवाराजपुरौ च जित्वा परावर्तत।

कर्नाटके कोंकणे च सप्तसंख्याभूभृतः
जित्वा मुहम्मदगवां स्वायत्तीकृत्य खोलनाम्॥
सोनगीरं कराटन्च सङ्गमेश्वरमेव हि।
कोल्हापुरं बेलगावं बंकापुरमथापरम्।
पोतविश्रान्तिकस्थानगोवाराजपुरौ तथा॥

युद्धं विजित्य स वीदरमागच्छत्, यत्र तृतीयो मुहम्मदशाहो हि महम्मदगवां इत्याख्यस्य भव्यं स्वागतमकरोत्। तृतीय मुहम्मदो महम्मदगवां इत्यनेन सार्धं मीरजराज्यमाक्रम्य वेलगांवभूभागं जित्वा विक्रमदेवं बन्दिनमकरोत्। जितान् बेलगांग्रामान् स महम्मदगवां इत्यस्मै प्रादात्।

कमलोजीत्यस्य पुत्रो नरसोजी विजयानगरस्य भूभृतः साहाय्यं प्राप्य पुनः पंचभागेषु विभक्तं ब्रह्मनिराज्यमाक्रम्यांशिकं साफल्यं लेभे। स पुनः वजियानगराधीशं बहुप्रार्थ्य सहायतां लब्ध्वा गोवाप्रान्तस्य जार्थमुद्योगमकरोत्। तदानीं कोंकणस्य होनावरे साबाजीत्यस्य प्रशासनमासीत्। तिम्मोजी साबाजीत्यस्य दासयाः पुत्र आसीत्, तस्य पिता साबाजी आसीत्। कामोजी साबाजीत्यस्य भ्रातुः पुत्र आसीत्। एवं तौ कामोजी तिम्मोजी च परस्परं भ्रातरावास्ताम्। होनावरे तिम्मोजी उच्चपोताधिकारी आसीत्। साबाजीकामोजीतिम्मोजीति सर्वे ह्येकमतयो भूत्वा पुर्तकालीयानां सहायतां च गृहीत्वा तुरुषकेभ्यो गोवाप्रान्तं स्वतन्त्रं कृत्वा गजेभेष्विन्दुवर्षे 1588 शके कामोजी स्ववशमकरोत्।

अस्मिन् युद्धे शान्तः साबाजीरुग्णो भूत्वा प्रयणमकरोत्। गोवाप्रान्तस्य प्रभुत्वं तिमूजी समीहतेस्म, परं प्रभुत्वं कामोजी लेभे, तेन रुष्टस्तिम्मोजी आदिलशाहस्याक्रमणे जाते तिम्मोजी तटस्थोऽभवत्। परमस्मिन् विप्लवे कामोजीकथनात् साबाजीसूर्नोर्मल्लार-रावस्य साहाय्यं पोर्तुगीजैः संप्राप्य आदिलशाहः परास्तः।

अतः मल्हाररावः पोर्तुगीजेभ्य लक्षमुद्रात्मकं करं जग्राह, तस्माच्चतुर्थांशं स कामोजी-आप्पाजीति आभ्यामदात्। अतः परं कामोजीप्यनेन तिम्मोजी उच्चपोताधिकारि पदात्पृथक्कृतः।

(14)

कल्याणीदुर्गं राज्यं च चालुक्यानामासीत्। परन्तु कालक्रमानुसारेण तस्योरि समये-समयेऽन्यानां स्वत्वमप्यभवत्। चनद्रनेत्ररसाब्जे (1621) वर्षे कल्याणीराज्यं अहमदशाहस्याधिकारे आसीत्। अधुनैव अली-आदिलशाहेन तथा अली-अमिलेन सार्धं कामोजीनरसोजीत्येतयोः कलह आसीत्, तेन प्रभावितः अहमदः कल्याणाः रक्षाकरणेऽसमर्थ इवाभवत्।

अस्मिन्नेव समये बर्हानशाहः सदाशिवेन साकं कल्याणीमाक्रमत् तथा च कन्चित् कालार्थ स सूवोद्यमे सफलोऽप्यभूत्। परं विजयानगरस्य से नायां सेनापतिरासीत्, तत्प्रभावेण शाङ्कितो हि बुर्हानशाहस्तस्मै कल्याण्या अर्धं स्वत्वं समर्थ्य निर्द्वन्द्वोऽभवत्।

इष्वक्षिरसचन्द्राख्ये (1625) शके वर्षे बुर्हाननिजातशाहः पुनः सदाशिवस्य सार्धं वीदरराण्यस्योपर्याक्रमणमकरोत्। नेत्रारामरसाब्जे (1632) शके वर्षे मांगसावंतो हि विद्रोहं कृत्वा स कमलोजीतः चादंवाडादिदुर्गकान् ग्रामाश्चागृहीत्। परनतु बंकोजीचालुक्यः कल्याण्याः स्वत्वं पूर्ववत् पुनः प्राप्त वान्। परं ह्यस्मिन्नेव षड्रामरसचन्द्राब्दे (1636) शके अली-आदिलशाहो हि जिमशाहतः साहाय्यं लब्ध्वा शोलापुरं कल्याणीन्च स्ववशमानयत्।

अस्मिन्नेव वर्षेअली-आदिलशाहस्तु सदाशिवरामर्शेण शाहुसेनेनमैत्रीबुद्धया सन्धिमकरोत् 1636 वर्षे सन्धौ त्रयो नियमाः निर्धारिताः, अली-आदिलशाहो हि जहांगीरखारं घातयिष्यति पुनश्च कल्याणीं दास्यति तथा च प्रतिवर्षे शाहहुसेनाय उपायनानि च दास्यति। एवंभूतः सन्धिविधिरपि शाहहुसेनेन सदाशिवे पूज्यबुद्धया कष्टेन स्वीकृतः।

अतः परं हुसेनशाहेनसदाशिवरायस्य वैमनस्यमभवत्। अस्मिन् वैमनस्ये कमलोजीत्यस्य चातुर्येण कल्याणीदुर्गस्य कुन्जिका स्वाधिकारे समापयता। कमलोजीत्यस्य परया बुद्धया प्रीतो विजयानगराधिपः नायकानां नायकी कल्याण्या अर्धो भागश्च कमलोजीत्यस्मै प्रायच्छत तथा चानया चातुर्यरीत्या ब्रह्मनीवंशी-यास्त्रयोऽपि सुलतानास्तस्मै प्रसन्ना अभवन्।

शाहहुसेनस्य कन्या जमीलासीत्। सा विवाहयोग्या संवृत्तासीत् शाहहुसेनो हि निजामशाह-इब्राहीम-कुतुबशाहेन परामर्शं विधाय स्वीयां कन्या जमीलां द्वितीयाय वरीदशाह-इब्राहीमनाम्ने ब्रह्मनीवंशजाय शासकय प्रादात्। एवं सम्बन्धं विधाय हुसेनशाहो हि कल्याणीमाप्तुमक्रमणमकरोत्। अस्मिन्नाक्रमणे सदाशिवरायात् साहायय्यं लब्ध्वा बीजापुरस्य अली-आदिलशाहो हि हुसेनस्य शतघ्नीसम्पन्नां सेनां निर्जित्य स्ववशमानयत्। चन्द्रवेदरसाब्जे (1601) शकवर्षस्यास्मिन् विजये बंकोजीतिम्मोजीजीत्येतयोर्मतीक्षतिरभवत्, यतो ह्येतयोः पितृव्यपुत्रः ज्योतियाजी कालकवलितोऽभवत्।

विजयानगरस्य विजयाय परीप्सवश्चत्वारः सुलतानाः पारस्परिकं द्वेषभावं विहाय सौमनस्य विधित्सया विवाहसम्बन्धान् रचयामासुः। सुलतानालेः भगिन्याः विवाह हुसेनसुल्ताजस्य सूनुनाभवत्, हुसेनस्य कन्यायाः चांदबीबीति नाम्न्याः अली सुलतानेना भवत्। हुसेनमुल्ताजोहि विवाहेऽस्मिन् अलीसुलतानाय शोलापुरस्य दुर्गं यौतके ददौ, तस्य दुर्गस्य शासिका चाँदबीबी एवाभवत्। ततः सर्वेमिलित्वा जांगीरशाहखानबशर-स्योपर्याक्रमणं कृत्वा तस्य वधं कृत्वा निश्चिन्ताः बभूवुः। अलीवरीदशाहः अली-आदिलशाहश्च स्वयमेव पृथगभूतौ, अतः तुरुष्काणां सौमनस्यं नैवाभवत्। नेत्रवेदरसाब्जे (1642) शके वर्षे विजयानगरस्य विरोधाय ते चत्वारोऽपिसंभूय शोलापुरे वार्तां कृतवन्तस्ततः परमाग्रहेण कमलोजाति चालुक्यं स्वपक्षे कृत्वा तालीशकोहं प्रस्थिताः। दुर्दैवग्रस्तः कमलोजी **अस्मिन्** युद्धे मृतः तथा चास्यायुद्धाद्विजयानगरमपि दुर्दैवग्रसतं जातमिव भूत्वा विनष्टम्। अहमदनगरस्य शास्ता बरारं संगृहीतवान्

कर्नाटककोंकणौ प्रदेशौ तु बीजापुरस्य शासको गृहीतवान्। चालुक्यास्त्वस्माद्युद्धरपि-पीडिताःसन्तः परां दुरवस्थां जग्मुः। दक्षिणापथं तुसप्कैर्भूरि पाददलितं चक्रुः। एवं दक्षिणं समस्तं भारतं तत्रस्थानां तुरुष्काणां वशमाभवत्। हिन्दुभिः सार्धं दुराचारस्य पराकाष्ठा मुस्लिमशासकैरानीता हिन्दुधर्मस्य महती क्षतिरप्यभवत्।

ततश्च दक्षिणे जातो तुरुष्काणां समन्ततः।
सद्यश्चाभ्युदयो देशे हिन्दूनां हानिकारकः[53]॥

खानदेशस्य राज्ञा व्यामरामरसाब्जे (1630) शकवर्षे दिल्ली शासकस्य अकबरस्य भृत्वता स्वीकृता[54], तेन कारणेन तस्य साहाय्यं कृत्वा नीतिज्ञेन फारूकी नाम्ना प्रसिद्धेन दक्षिणे भारते खानदेशस्य रक्षाभवत्। दक्षिणं भारतं प्रविश्याकबरो भेदनीतिमाश्रित्य स्वशासनस्य विस्तरबुद्धिमकरोत्। आदिलशाहो हि पुनः बंकापुरधारवाडप्रदेशयोरुपर्या-क्रमणकरोत्।

अत्र युद्धे नरसोजीवेलप्पा च अली-आदिलशाहतः पराजितौ तथा च वेलप्पायुद्धे दिवङ्गतश्च। अली-आदिलशाहो हि बंकापुरे धारवाडे च यथेच्छं ह्याचारान् कुर्वन् अनेकान् देवालयान् भङक्त्वा तेषु मस्जिदाभवनानि कृत्वा बेलनेस्लामीकरणमकरोत्।

अली-आदिलशाहस्तु तत्र देवालयान् समान्।
बभन्ज तरसा तत्र मस्जिदाश्च चकार सः[55]॥

चालुक्यस्य नरसूजीत्यस्य पुत्रौ नानाजी राजूजी चोभौ तथा च वेलप्पारावस्य भ्रातृव्यो मङ्गली बंकापुरं परित्यज्य य मतरावस्य निकटे तुर्गलस्थां वदाम्यामाजग्मुः। तेभ्यो बंकापुरस्यवस्थां परिज्ञाय येमतरावो माधोजी चातिदुः खितौ जातौ। कालोऽयं स्वधर्मनिरतानां चालुक्यवंशजानां कृतेऽति क्लेशकरोऽभवत्।

(15)

अली-आदिलशाहो लि मराठाशासकैः सार्धमनल्पमत्याचारान्नकरोत्। तस्यात्याचारैः पीडिताः मराठाशासकाः ह्यात्मरक्षार्थ गोलकुण्डाराज्यस्य शरणं ययुस्तेन तस्य अली-आदिलशाहस्य मराठानां दण्डनस्य नीतिर्हि खण्डिताभवत् ततोऽसौ नयेन तान् बीजापुरे समानेतुं प्रायतत्, तस्य प्रार्थनां स्वीकृत्य कमलोजीसुनोः तुकोजीत्यस्य नेतृत्वे मराठावीरपुरुषाः बीजापुरमाययुः। अत्र हि बीजापुरस्य राज्ञः कन्यां हिन्दुधर्मवा कृत्वा साकं तुकोजी विवाहमकरोत्।

ततः स बीजापूरस्य राजकन्यां विधानतः।
हिन्दुधर्मवतीं कृत्वा तुको जी समुवाह ताम्[56]॥

तस्मादुष्टः अली-आदिलशाहो हि तुकोजीत्येनं वन्दिनं कृत्वास्य नेत्रें निष्काषयति स्म। एवं वीरपुरुषस्य चालुक्यजातस्य महतीदुरवस्थाभूत्। हिन्दुदेवायतानां भन्जकः, हिन्दुधर्मस्य द्वेष्टा, हिन्दूनां घातकः अली-आदिलशाह इभेषुरसचन्द्राब्दे (1658) वर्षे कालेन ग्रसितोऽभवत्[57]।

अस्मिन्नेव 1658 शके वर्षे इब्राहीमकुतुबशाहोऽपि मृत्योर्हस्ते गतः[58]। त्रयाणां सुलतानानां मृत्युस्तु पूर्वमेवाभवत्, तेनाधुना दक्षिणभारते महत्यराजकता संव्यापिताभवत्। रामाब्धिरसचन्द्राब्दे शके वर्षे मुगलानां बादशाहो ह्यकबरो विजयानगरस्यान्येषान्च विजयाय महतीं सेनां प्रैषयत्। एवं 1673 वर्षे ससैन्यं विजयानगरं विजित्य अकबरो दक्षिणभारते सुदृढोऽभवत्। मुगलसाम्राज्याद्भीता बीजापुरस्य शासिका चांदबीबी 1678 शके वर्षे उपहारे बरारं राज्यमकबराय प्रदात्।

अनया नीत्या आदिलशाहोहि शोलापुरं कल्याणीं च स्ववशंमानयत्। स्वविरोधिनामहमदपुरसुलतानं बन्दिनं कृत्वा ग्वालियरप्रान्ते महता यत्नेन स्थानान्तरितं स्थापयामास। कल्याणींदुर्गं शशिवह्न्यब्धिचन्द्राद् वेदरामाब्धि चन्द्राद् वेदरामाब्धिचन्द्रान्तं (1731-1734) तस्य शासन आसीत्। अस्यामेवावधौ आदिलशाहो हि खण्डोजीत्यस्यै तथा च स्यान्येभ्यश्चालुक्य कुलजेभ्यो भ्रातृभ्यः कर्नाटके बंकापुरे वदाम्यां कल्याण्यामपि च केचिदधिकारान् प्रादात्।

## सन्दर्भ


1. चालुक्य अय्यणवंशचरितकव्ये 4/44
2. चालुक्य अय्यणवंशचरितकव्ये—5/2
3. तदेव- 5/5
4. चा. अ. वं. च. का. 5/15
5. तदेव 5/16
6. चा. अ. वं. च. का. 5/23
7. चा. अ. वं. च. का. 5/24-26
8. तदेव 5/26-27
9. तदेव 5/27
10. चा. अ. वं. च. का. 5/39
11. तदेव 6/1-23
12. चा. अ. वं. च. का. 6/1-23
13. चा. अ. वं. च. का. 6/17-18
14. चालुक्यराज-अ. वं. च. का 6/19-25
15. तदेव 6/37
16. चा. अ. वं. च. का. 7/2
17. तदेव 7/8
18. चा. अ. वं. च. का. 7/12
19. तदेव 7/13
20. तदेव 7/18
21. तदेव 7/20
22. तदेव 7/20
23. चा. अ. वं. च. का. 7/21-22

24. तदेव 7/24
24. चा. अ. वं. च. का. 7/22
25. चा. अ. वं. च. का. 7/38
26. चा. अ. वं. च. का. 7/38
27. चा. अ. वं. च. का. 7/68-70
28. तदेव 7/55
29. चा. अ. वं. च. का—8/12-15
30. तदेव 8/17-18
31. तदेव 8/22
32. चा. अ. वं. च. का.—8/25
33. तदेव 8/28-30
34. तदेव 8/31
35. चा. अ. वं. च. का. 8/33
36. तदेव 8/38
37. तदेव 8/46
38. तदेव 8/47
39. चा. अ. वं. च. का.—8/48
40. तदेव-8/49-50
41. चा. अ. वं. च. का. 10/40
42. पूर्ववत्—10/41-42
43. चा. अ. वं. च. का. 10/67
44. तदेव 10/70-71
45. चा. अ. वं. का 10/83-85
46. चा. अ. वं. का 11/11
47. तदेव 11/12-13
48. चालु. अ. वं. का. 12/16ब
49. चा. अ. वं. का 13/1
50. चा. लु. अ. वं. का. 13/1 8-22
51. तदेव 13/24-29
52. तदेव 13/34
53. चा. अ. वं. का. 14/62
54. तदैव 14/63
55. चा. अ. वं. का. 14/69
56. चा. अ. वं. का. 15/7
57. तदेव 15/29
58. तदेव 15/12

# अथ चालुक्यराज अय्यण वंश चरित महाकाव्यम्

## ॥अथ प्रथमसर्गः॥

॥श्री गणेशाय नमः॥

अमन्दानन्दसन्दोहदायकं गणनायकम्।
वन्देवन्दारुमन्दारमिन्दु भूषणनन्दनम्॥1॥
शारदाशारदाम्भोज वदनावदनाम्बुजे।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्॥2॥
नमस्त्रिभुवनोत्पत्तिस्थितिसंहारहेतवे
विष्णवेऽपारसंसारमारोत्तरणहेतवे॥3॥
सदसत्वेनभावानां युक्तयाद्वितयी स्थितिः।
तामुल्लङ्घ्य तृतीयस्मै नमश्चित्राय शम्भवे॥4॥
चन्द्राननार्धदेहाय चन्द्रांशुसितमूर्तये।
चन्द्रार्कनलनेत्राय चन्द्रार्धशिरसे नमः॥5॥
भारद्वाजमुनिर्यस्य[1] स्तोत्रे नित्यं समुत्सुकः।
स रक्षतु भवानीशो विश्वनाथो जगत्त्रयम्॥6॥
अहिभूषणोऽप्य भयदः सुकलित हालाहलोऽपि यो नित्यः।
दिग्वसनोऽप्यखिलेशस्तं शशधरशेखरं वन्दे॥7॥
एकं ब्रह्मैवाऽद्वितीयं समस्तं, सत्यं सत्यं नेह नानास्ति किन्चित्।
एको रुद्रो न द्वितीयोऽवतस्थे, तस्मादेकं त्वां प्रपद्ये महेशम्॥8॥
आनन्दकाननेकश्चित् त्रिकण्टकविराजिते।
न्यवसज्जान्हवीतीरे वाराणस्यां महामुनिः॥9॥
योगाभ्यासरतो धीमान् दान्तः शान्तः शुचिव्रतः।
निगमागमसर्वज्ञः सत्यवाक् शंकरोपमः॥10॥
शिष्यैश्च वटुभिर्युक्तो देशदेशान्तरागतैः।
ब्रह्मक्षत्रियविड्वश्यैर्गुरुशुश्रूषणे रतैः॥11॥

सेव्यमानस्तु तैः सर्वैः कामक्रोध विवर्जितैः।
पारे ब्रह्मणि लग्नोऽपि देशचिन्तायुतः सदा॥12॥
कदाचिन्मुनिशार्दूलो ध्यानावस्थित चेतनः।
निमीलिताक्षि पद्मोऽपि मध्यतः प्रजहास च॥13॥
तद्दृष्ट्वा शिष्य वर्गस्तु गुरुसेवापरायणः।
अभूतपूर्व वृत्तेन विस्मयं परमं ययौ॥14॥
तेषु कश्चित्प्रियः शिष्यश्चालुक्यकुलसम्भवः।
धर्मात्मादानशौण्डश्च गुरु भक्ति परायणः॥15॥
ध्यानेऽप्यहो कथं हास्यं सम्भवेत्तकारणम्।
ज्ञातव्यं तद्गुरोः सम्यग्विचार्यैवं विचक्षणः॥16॥
बद्धवान्जलिपुटः प्राह जिज्ञासैकास्ति भो गुरो।
यद्याज्ञापयति श्रीमान् पृच्छामि मुनिपुङ्गवः॥17॥
आज्ञप्तस्तेन निपुणो विनयान्नतमस्तकः।
जगादवचनं चेदं शिष्यवर्गानुमोदितः॥18॥
गुरो! वयं सर्वशिष्या ध्यानेऽपिस्मितकारिणम्।
भवन्तं वीक्ष्य सहसा महाश्चर्येण संगताः॥19॥
जिज्ञासमाना ध्यानेऽपि किमिदं हास्कारणम्।
यदि गोप्यं न चेत्तत्तद्वद संशय भंजन॥20॥
वत्स! साधू त्वयापृष्टं न गोप्यमिह वर्तते।
सहस्य वादिनोयस्माद्गुरवः शिष्य वत्सलाः॥21॥
तस्मात्सर्वं विस्तरेणवक्तुमीहे हि साम्प्रतम्[2]॥
श्रुण्वतु यूयं[3] मच्छिष्या ध्यान युक्तेन चेतसा॥22॥
संसारे बहवो राज्ञां[4] वंशा जाता लयं गताः।
कुलजानां महापापैर्रत्याचारादिकर्मभिः॥23॥
ये कुलाचारमाश्रित्य सदाचारं समाश्रिताः[5]।
अकार्यं नैव कुर्वन्ति तेषां वंशः प्रमोदते[6]॥24॥
बहवोख्यापितावंशाः चिरकालागताश्च ये।
तेषु चालुक्य[7] जातानामितिहासं सनातनम्[8]॥25॥
स्मरतो मे विधेर्लीला पाटवं सम्प्रकाशितम्।
अत्यद्भुतं हर्ष शोक करमज्ञविमोहनम्॥26॥
अणोः पर्वतरूपत्वमणु त्वमचलस्य च।
राज्ञां रङ्कत्वमन्यत्राऽकिंचिनस्याधि राजता[9]॥27॥
धर्मात्मनान्च पतनमुन्नतिः पापकारिणाम्।
अपूज्यानान्वपूज्यत्वं पूज्यानां दुर्गतिस्तक्षा॥28॥

निगमागमशास्त्रेषु लोकानामरुचिस्तथा।
वर्णाश्रमादिधर्मेषु संदिहाना विमोहिताः॥29॥
पतन्तोदुःखगर्तेषु मोहितामिश्रसंगताः।
द्रविणैकपरानित्यं रागद्वेषेषु लम्पटाः॥30॥
असत्ये सत्यताभासः सत्येऽनिष्ठागुणेऽस्पृहा।
शिवेऽश्रद्धागविग्लानिरिति सर्वं विलोक्य तत्॥31॥
सहसाऽपारशक्तेश्च विधेर्मायाविनो बलम्।
अहार्यमिति निश्चित्य हास्यान्वितमुखोऽभवम्॥32॥
अहो मद्वंशजातानामितिहासं पुरातनम्।
स्मरन् स्थितो भवानत्र तेन मे महतीस्पृहा॥33॥
यदि तात[10] कृपा मह्यं चेदहं पात्रतां वहे[11]।
पूर्वजानां हि वृत्तं ते तत् ख्यापय सुखावहम्[12]॥34॥
कुतस्तेषां समुत्पत्तिर्भुवि राज्यं क्वसंस्थितम्।
किमाचरितमन्यच्च सर्वं मद्वंशजैः शुभम्[1]॥35॥
धर्माचारं पूज्यसेवां सर्वदा नीतिपालनम्।
गुणस्पृहामनाचाराद्रक्षणं कार्यपाटवम्॥36॥
देवद्विजगवां रक्षां शरणागतपालनम्।
सर्वंहि विस्तरेणात्र ब्रूहि मे योगिनां वर॥37॥
पश्यभद्राऽधुनाभानुरस्ताचलमुखोऽभवत्।
सांध्यं विधेश्च[14] कालोऽयं ब्राह्मणां विशेषतः॥38॥
न हातव्यः कदाप्येषः कालोऽन्यत्र द्विजातिभिः।
ब्रह्मविष्णुशिवाद्यैर्यत्संन्ध्याः सर्वाः सुपूजिताः॥39॥
तस्मात्सम्पूर्य तत्कार्यं धर्मकामार्थमोक्षदम्॥
समागच्छत वै यूयमैतिह्यश्रवणोत्सुकाः॥40॥
वेदवेदाङ्गतत्वज्ञैः सर्वशास्त्रविशारदैः।
अप्यैतिह्यं पुराणाभ्यां वर्धनीयं बहुश्रुतम्॥
वेदोबिभेत्यल्पश्रुताद्वचनीयश्च जायते।
ऐतिह्यश्रवणं तस्माद्भुवि सर्वस्व कारकम्[15]॥42॥
एवमादिश्य योगीन्द्र[16] : पश्चिमाभिमुखोऽभवत्।
उपास्ते स्म स्वशिष्यश्च सन्ध्यां धर्मानुरागिभिः॥43॥
स्नानध्यानस्तुतैर्मन्त्रैर्होमकृत्यं समाप्य च।
सर्वे पुनः समायाता ऐतिह्य श्रवणेच्छया॥44॥
तेजसा दीप्यमानोऽसौ योगिपूज्यो महामुनिः।
कुशसाने चोपविश्य दृष्ट्वा सर्वान् सुशासितानम्[17]॥45॥

चालुक्यवंशजं शिष्यं कृत्वाऽग्रे विनयान्वितम्।
स्मृत्वा स्वेष्टं विशुद्धात्मा समन्तात्तन् ह्य बोधयत्[18]॥46॥
श्रूयतांसावधानेन चेतसेमं पुरातनम्।
चालुक्यकुल जातानामितिहासंस्वराष्ट्रजम्[19]॥47॥
विष्णोरंशात्समुद्भूतो वंशोऽयं वैष्णवो भुवि।
तेषामत्र सुनामानि पुण्यानि निगदामि वः॥48॥
श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभोः,
नाभीपङ्करहाद्बभूव जगतः सृष्टा स्वयम्भूस्ततः।
जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रितः,
सोमोवंशकरः सुधांशुरुक्तिः श्रीकण्ठचूडामणिः॥49॥
तस्मादासीत्सुधासूतेर्बुधो बुधनुतस्ततः।
जातः पुरूरवा नाम चक्रवर्ती नृपोत्तमः॥50॥
तस्मादायुस्ततो जातो नहुषः पुण्यपूरुषः।
ततो ययातिस्तस्माच्च पुरुरित्यभिधानवान्॥51॥
जनमेजयस्ततो जातः प्राचीशस्तत्सुतस्ततः।
तस्माज्जातः सैन्यातिस्ततो ह्यपतिस्ततः॥52॥
सार्वभौमस्ततो जातो जयसेनः प्रतापवान्।
महाभौमस्ततो देशानकक्रोधाननौ क्रमात्॥53॥
ततो देवकीरित्याख्यस्ततः क्रमुकनामकः।
तस्माद्दक्षकसंज्ञश्च ततोमतिवरः पुमान्॥54॥
कात्यायनस्ततो नील दुष्यन्तभरताः क्रमात्॥
भरताद् धर्मशीलाच्च भूपमन्युस्तत्सुतोऽभवत्॥55॥
तस्मात्सुहोत्रस्तज्जश्च हस्ती तस्माद्विरोचनः।
तस्मादजाभित्व इति तस्य संवरणः सुतः॥56॥
तस्मात्सुधन्वा जातोऽयं तपत्या सूर्यकन्यया।
तस्मात्परीक्षितस्तस्मात् भीमसेनः प्रतापवान्॥57॥
ततः प्रदीपनस्तस्माच्छान्तनुः कीर्तिवर्धनः।
ततो विचित्र वीर्याच्च पाण्डुराजस्ततोऽर्जुनः॥58॥
ततोऽभिमन्युस्तस्माच्च परीक्षिदितिविश्रुतः।
जनमेजयस्ततस्तस्माज्जातः क्षेमुंकसंज्ञकः॥59॥
नरवाहनसंज्ञोऽभूत् भारते भूतिमांस्ततः।
शतानीकस्ततो[25] जातस्तस्मादुदयनो नृपः॥60॥
यशः पुन्जप्रभावेण यस्य राज्ञः प्रभावितम्।
भारतं भारतं जातं देवदानव पूजितम्॥61॥

एकोनषष्टिराजानोऽभवन्नुदयनात्परम्।
शशासुर्ये महद्राज्यं चालुक्यान्वयभूभृताम्॥62॥
एतत्वपूर्वं तु वंशस्य चालुक्यस्य च दक्षिणे।
एकोनाशीति राजानो राज्यं चक्रुः सुनीतितः॥63॥
अशीति संख्यकों राजा कोल्हालस्तु प्रतापवान्।
कोल्हापुरं सुनगरं रचयामास रागतः॥64॥
अनन्तरं तद्वंशीया अयोध्यायां समागताः।
तत्र शोलावले भागे स्थापयामास शासनम्॥65॥
एतेषु विजयादित्याश्चित्रकण्ठेन भार्त्सतः।
स्वभ्रात्रा दक्षिणे तस्मात्पुनः स प्रस्थितोऽभवत्॥66॥
श्रीरामचन्द्राद्भुतराजधानीं, पुरीमयोध्यांसुसिषेविरे नृपाः।
स चित्रकण्ठस्य निशम्यवन्धोः, तत्याजशब्दान्न्जि मातृभूमिम्[22]॥67॥

॥इति श्रीचालुक्यराजअय्यणवंशचरिते काव्ये वंशपरिचये
विष्णोरंशाभूतचन्द्रवंशीयत्ववर्णनम् नाम प्रथमसर्गः॥

## सन्दर्भ

1. क. पुस्तकें–स्तोत्रे यस्य
2. कामोऽस्मि त्वत्सह–क. पुस्तके
3. श्रोष्यनित सर्वे–ग. पुस्तकें
4. राज–ख पुस्तकें
5. दानधर्मरताः पुनः–क. पुस्तकें
6. क. पुस्तकें–प्रफुल्लति
7. क. पुस्तकें–त्वद्वंश
8. ग. पुस्तकें सनातनम्
9. क. पुस्तकें–नृपायितम्
10. क. पुस्तकें–नाथ
11. ग. पुस्तकें–प्रार्थये मतः।
12. ग. पुस्तकें–वद में पूर्वजानां ममितिह्रासं पुरातनम्॥
13. क. पुस्तकें–साधितम्
14. संन्ध्यावन्दन–ग. पुस्तकें
15. ग. पुस्तकें सर्वोपकारकम्।
16. क. पुस्तकें एवमुक्त्वा गुरुवरः।
17. क. पुस्तकें समागतान्
18. ग. पुस्तकें समस्तान् तान्यबोधयत्
19. ग. पुस्तकें मेतिहूयं महद्भुतम्।
20. ख. पुस्तकें तवंशजानां नामानि
21. क. पुस्तक–ततः शतानीक इति
22. क. पुस्तकें–राजधानीम्

# ॥अथ द्वितीय सर्गः॥

समानी विजयादित्योऽपूर्व शक्तिसमन्वितः।
बुद्धिमानीति निपुणो सदाचारपरायणः[1]॥1॥
कदाचिच्चित्रकण्ठेन तद्भ्रात्राविमानितः।
त्यक्त्वा तस्माद्राजधानीमयोध्यां स्वकुलागताम्॥2॥
ततो मनस्वी वीरोऽसौ प्रस्थितो दक्षिणां दिशम्।
स्वबान्धवैः समायुक्तो नर्मदायास्तटेऽगमत्॥3॥
रामवेदाब्जसंख्याके शके चौवलिनामके।
ग्रामे निवसतिं चक्रे श्री माहेश्वरसन्निधौ॥4॥
संतीर्य नर्मदां सोऽथ सर्वैश्च स्वानुयायिभिः।
अजन्तां विपुलां प्राप सर्वसौख्यप्रदायिकाम्॥5॥
दानमानैश्च संताष्य विप्रान् वेदविदां वरान्।
उवास कतिचित्कालं अजन्तायां महावली॥6॥
आसीद्राज्यं नर्मदाया दक्षिणे भुवि विश्रुतम्।
पल्लवान्वयजातस्य रासस्त्रिलोचनस्य च॥7॥
स हिराजा महावीरो धर्माय निरतस्सदा[2]।
पालयामास तद्राज्यं रामराज्यमिवाद्भुतम्॥8॥
समापन्ने विपत्काले बुद्धिर्मतिमतामपि।
विपर्यासं समायाति दुर्दैवाभिहता सदा॥9॥
स वीरो विजयादित्यः दुर्भाग्याभिहतस्तदा।
आक्राम्यतिस्म तद्राज्यं शक्तित्रयसमनिवतम्॥10॥
तत्राऽभूत्सुमहज्जन्यं देवानामसुरैर्यथा[1]।
शास्त्रखण्डितगात्राणां वीराणां रक्तसंस्रवैः॥11॥
युद्धभूमिरभूत्तत्र[5] किंशुकैरिव छादिता।
व्याप्ता खण्डितमुण्डैश्च भुजैः पादैः समन्ततः॥12॥
ततस्त्रिलोचनस्याऽयं मदोन्मत्तो मतङ्गजः।
मर्दयन् रिपु सैन्यानि प्रचचाल वलादुवली॥13॥

स राजा विजयादित्यः[6] दृष्ट्वा तं समुपस्थितम्।
बहुधा भिन्नवर्माऽपि पुरतस्संरुरोध तम्॥14॥
पदे पदे बाणघातैर्निषिद्धोऽपि महाबलः।
चकार शत्रुसैन्यानां कदनं तर्जनैः सह[7]॥15॥
ततस्त्रिलोचनेनाऽसौ हृदि बाणेन ताडितः।
पपाताऽश्वात्ततः सैन्यं तस्य सर्वं पलायितम्॥16॥
गृहीत्वा विजयादित्यः भार्यां गर्भवतीं तदा।
निष्क्रान्तस्ततस्तस्मात् पङ्कादिव गजेन्द्रकः॥17॥
मुडिवेडुग्राम मध्ये विष्णुभट्टं तपस्विनम्।
वेवदाङ्गतत्वज्ञं[9] शरण्यं सोमयाजिनम्॥18॥
विलोक्य तां सगर्भां सः[10] शरणागत वत्सलः।
स्वाश्रयं स्वाश्रये दत्वा[11] पुत्रीमिव ररक्ष ताम्[12]॥19॥
पितशोकाभिभूता सा राज्ञी तत्राऽवसत्तदा।
पालयन्ती चात्मगर्भं व्रतं वैधव्यजं समम्॥20॥
अथ काले शुभे राज्ञी सुतमेकमजीजनम्।
चन्द्रप्रभं दिव्य देहं लक्षणैः शोभनैर्युतम्॥21॥
दृष्ट्वा तं विष्णु भट्टेन[13] तन्नाम करणं कृतम्॥
विष्णुरित्यभिधानेन विलोक्याङ्गानि विग्रहे॥22॥
अयमेव प्रसिद्धोऽभूद्विष्णु वर्द्धन संज्ञया।
चालुक्य कुलजां लक्ष्मीं वर्द्धयन्निजतेजसा॥23॥
अथ तं शिशुरूपेण ललन्तं ललितद्युतिम्।
कुमारं पालयन्ती सा राज्ञी दुःखं न विस्मृता[14]॥24॥
ववृधे व्याघ्र बालो हि बालः[15] सरसिजाननः।
मातुः सन्जनयन् हर्षं लीलाभिर्वालकोचितैः॥25॥
प्रपेदे पन्चमं वर्षं विष्णुश्चालुक्यजो यदा।
विद्यारम्भं तदा चक्रे विष्णुर्विष्णोर्विशेषतः[16]॥26॥
पश्यन् कुशाग्रां प्रतिभां नीतियुक्तां च तद्गिरम्।
प्रसन्नो विष्णुभट्टोऽसौ प्रादात् तस्मै समाः कलाः[17]॥27॥
वेदशास्त्रदि कन्चैव धनुर्विद्यां च शास्वतीम्।
विविधास्त्रप्रयोगांश्च प्रीतेन मनसा क्रमात्॥28॥
द्वादशे हापने तस्य मौन्जीवन्धं समाप्य च।
निरीक्ष्य शंकरे भक्तिं शक्तिं तस्य विचार्य च॥29॥
आज्ञप्तो गुरुणा वीरस्तपस्तप्तुं[18] विधानतः।
संप्राप्य[19] चालुक्यगिरिं तपश्चरणमातनोत्॥30॥

कार्तिकं स्वामिनं गौरीं तीव्रेण तपसा ध्रुवम्[20]।
नारायणन्च संतर्प्य भक्त्या मुदितास्तेऽभवन्[21]॥31॥
प्रतिढक्कं पन्चमहाशब्दान्मकरतोरणम्।
यष्टिं हेममयीं दत्वा शास्त्राणि विविधानि च[22]॥32॥
तथा स श्वेत छत्रन्च शंखं पालिध्वजं पुनः।
वाराहचिह्नं सम्प्राप्य नारायण कृपालवान्॥33॥
हर्षेण महता युक्तः प्रसन्न वदनो मुदा।
परावर्तत वीरोऽसौ मातृदर्शन कांक्षया॥34॥
माता वीक्ष्य सुतं वीरं कृतकृत्यं महाव्रतम्।
वरैश्चिह्नैर्युतं धीरं परमं मुदमन्वभूत्॥35॥
ततः प्रभृत्ति सर्वेऽपि चालुक्य कुल नन्दनाः।
चिह्नान्येतानि संधार्य पृथिव्यां प्रतिथा बभुः॥36॥
अथ प्रभावतस्तेन तपसा स हि सारभूत[23]।
सैन्येन महता युक्तो[24] राजराजाधिपोऽभवत्॥37॥
कदम्बगङ्गवंशीयान् राज्ञो युद्धे विजित्य च।
नर्मदासेतुमध्यस्थं राज्ये रेजे स राजराट्[24-ग]॥38॥
राज्यं जित्वात्वनेकेषां राज्ञां राजाभिमानिनाम्[25]।
ग्रामान्संस्थापयामास राज्यं स्वं दक्षिणापथे॥39॥
अस्योत्कटप्रतापेन प्रीतः पल्लववंशजः।
कान्चीश्वरो महाराजो हर्षेण विनयेन च॥40॥
प्रादात्कन्यां निजां तस्मै सुन्दरीं गुणगुम्फिताम्।
दासीदासं धनं रत्नं श्रियं सिन्धुसमुद्भवाम्[26]॥41॥
सा जज्ञे विजयादित्य मादित्यमिवतेजसा[27]॥
जयसिंहस्ततो जातो बल्लभेन्द्रादि नाम धृक्॥42॥
राष्ट्रकूटादिकान् राज्ञो जितवान् बलवान् रणे।
शिलालेखादि लेखेषु स्तुतोऽयं गुणवैभवैः[28]॥43॥
अङ्कवाणेशनेत्राख्ये शकवत्सरसन्निधौ।
अस्य राज्ञस्तु राज्यं स्याद्विस्तृतं विपुलं ध्रुवम्[29]॥44॥
यो राष्ट्रकूटकुलमिन्द्र इति प्रसिद्धः,
कृष्णाव्हयस्य सुमष्टशतेभ सैन्यम्।
निर्जित्य दग्धनृप पन्चशतो बभार,
भूयश्चुलुक्य कुलवल्लभराजलक्ष्मीम्॥45॥
कन्दः कीर्तिलताङ्कुरस्य कमलं लक्ष्मीविलासास्पदं,
वज्रं वैरिमहीभृतां प्रतिनिधिर्देवस्य दैत्यद्रुहः।

राजऽऽसीज्जयसिंहवल्लभ इति ख्यातश्चरित्रैर्निजैः
यो रेजे चिरमादि राजचरितो ह्युत्कण्ठ कण्ठाधरन्[30]॥46॥

॥इति श्री चालुक्यराज-अय्यणा-वंशचरिते काव्ये चालुक्यवंशपरिचये
प्रथमजयसिंहनृपवर्णनं नाम द्वितीयः सर्ग॥

## सन्दर्भ

1. धर्मकर्मरतः सदा–ख. पुस्तके
2. धर्मकर्मरतस्सदा–क. पुस्तके
3. विजयादित्य राजोऽसौ–क. पुस्तके
4. वीराणां रोमहर्षणम्–क. पुस्तके
5. युद्धभूमिः शोणितेन रद्यस्तत्र परिप्लुता॥–ख. पुस्तके
6. विजयादित्यराजोऽपि–ग. पुस्तके
7. गर्जश्च कदनंमहत्–क. पुस्तके
8. तद्भ्राता तु कथन्चिच्चाऽगात्तया सह दुःखितः।–क. पुस्तके
9. ब्राह्मणम्–क. पुस्तके
10. पूर्णगर्भा सः–ग. पुस्तके
11. प्रददाति स्म–क. पुस्तके
12. पुत्रीमिवापलयन्मुदा–क. पुस्तके
13. दृष्ट्वैतद्विष्णु भट्टेन–क. पुस्तके
14. विलोक्य राज्ञी प्रीताभूद्र विस्मृत्सकलं क्लमम्–क. पुस्तके
15. दिने दिने स ववृधे शिशुः–क. पुस्तके
16. तदऽाक्षरारम्भमस्य चकार द्विजसत्तमः॥–क. पुस्तके
17. अपाठयत् सकलां कलाम्–ग. पुस्तके
18. विष्णुभट्टेन तपस्यायै–क. पुस्तके
19. स प्राप्तः–ख. पुस्तके
20. ध्रुवम्–क. पुस्तके
21. मुदितोऽभवत्–क. पुस्तके
22. सुर्वयष्टीं शास्त्रांश्च विविधानं भयप्रदान्॥ क. पुस्तकें
23. तस्यास्तपस्याः सुसाहसः–क. पुस्तके
24. सैन्यं धनन्च संचित्य–क. पुस्तके

24-ए. नर्मदासेतुवन्धं यावविस्तीर्णमद्भुतम्।–क. पुस्तके

25. जित्वा पन्चाशत्सह'ाधिकलक्ष्यस्य सप्तकान्–क. पुस्तके
26. दासीदासादिसंयुक्ता भूषणभूषिताम्।–ग. पुस्तके
27. विजयादित्यानामाऽभूत्तत्सूनुर्भुरिविक्रमः॥–क. पुस्तके
28. शिलालेखादिषु स्तुत्यः स्तुतो बहुविर्धर्यथा–ग. पुस्तके
29. जयसिंहमहाराजस्यासीद्राज्यं सुविस्तृतम्।–क. पुस्तके
30. राजचरितोत्कण्ठप्रजानाहरन्।–ग. पुस्तकें

## ॥अथ तृतीयः सर्गः॥

जयसिंहात् परं राज्ये प्राज्ये तस्मिन् प्रतापवान्[1]।
बालवर्मा प्रतापी च[2] बुद्धवर्मेति विश्रुतौ॥1॥
रामे भाग्निमिते वर्षे राज्यासनमलङ्करोत्।
देवद्विजगवां रक्षा विदुषो हि महाव्रतम्[3]॥2॥
तत्पश्चाद्विजयो राजा प्रजापालन तत्परः।
वेदाङ्कराम प्रमितेवर्षेपृथ्वीं शशास सः[4]॥3॥
वनराजस्ततश्चागात् वदान्यो राज्यरक्षकः[5]।
पृथ्वीराजस्ततो यातो विजयोऽभूत्ततः परम्॥4॥
जयसिंहस्ततो राजा बालवर्मा ततोऽभवत्।
एतांस्त्वयोग्यान् सम्भाव्य राज्यकर्मणि निष्ठितान्॥5॥
जयसिंहस्यान्यपुत्रो महावीरो जितेन्द्रियः।
रणरागस्ततो पृथ्वीं शाशास निजविक्रमैः॥6॥
अतीव बलसंयुक्तः शिवभक्तःप्रतापवान्।
संग्रामरसिको वीरोनिजं राज्यं व्यवर्धयत्॥7॥
रुद्रवेदशके वर्षे राज्यं तस्याति विस्तृतम्।
विराजितं भुवि तदा सर्वलोक सुखावहम्[6]॥8॥
पुलकेशी तस्य सूनुरभवद्भूरि पराक्रमः[7]।
चालुक्य श्रीर्यत्प्रतापात्परां वृद्धिं समागमत्॥9॥
सत्याश्रयो महाराजो रणविक्रम वल्लभैः।
श्रीवल्लभेति विरुदैः भूषितो बहुमानदैः[8]॥10॥
निर्मिता राजधानी सा वातापी तेन भूभृता[9]।
या कीर्तिवर्मपर्यन्तं चालुक्यानां श्रियं दधौ[10]॥11॥
स धर्मात्माऽश्वमेधादि यज्ञान् सम्पाद्य यत्नतः।
ऋत्विग्भ्यो ग्रामदानेन तुतोष परमादरात्॥12॥
पुराणेष्वितिहासे च नीतौ च निपुणौ नृपः।
धर्मेण मानदानेन स[11] राज्यमकरोतद्भुवि॥13॥

चन्द्रेषु वेदके वर्षे शोभने भुवि भूपतः[12]।
राज्यमासीत्सुविस्तीर्णं राज्ञः श्रीः पुलकेशिनः॥14॥
कीर्तिवर्मा मंगलीशः पुत्रौ ख्यातौ बलान्वितौ[13]।
ताभ्यां पुरुषसिंहाभ्यां[14] चालुक्यश्रीर्वशीकृता॥15॥
कीर्तिवर्मा महावीरः[15] पुरुरणपराक्रमः।
पृथिवी वल्लीाश्चैव महाराज इति स्मृतः॥16॥
नलमौर्य कदम्बादीन् विजित्य बहुसंगरैः।
नलवाडीं कोंकणन्च कानन्च गृहीतवान्॥17॥
चकार व बहून् यज्ञान्विजये प्राप्य सम्पदाम्[16]।
अग्निष्टोमादिकान् लोके प्राज्यान् बहुसुवर्णकान्[17]॥18॥
ब्राह्णेभ्योऽर्पिता भूमिर्दत्तश्च बहुर्दक्षिणाः।
प्रसन्ना ब्राह्मणादेवास्तमाशीर्भिः समवर्धयन्[18]॥19॥
धर्मकार्याणि सर्वाणि कृत्वाऽत्यन्त बलान्वितः।
वङ्गं कलिङ्गं वदवरं मगधं मद्रकं तथा ॥20॥
केरलं मूषकं गाङ्गं पाण्ड्यं द्रमिलमेव च।
चोलीयं चालुकं राज्यं ससैन्यं स विजित्य[19]च॥21॥
निधाय तत्र सामन्तान् राज्यं विस्तीर्य भूरिशः।
शशास सकलामुर्वीं नीत्या धर्मेण भूमिपः॥22॥
सोमानन्दस्य भगिनी तस्य पत्नी पतिव्रता।
वीराङ्गनेव सर्वत्र विषेवे स्वपतिं मुदा॥23॥
सौन्दर्यं परमं प्राप्ता वातापी तस्य शासने।
विष्णुमन्दिर कृपादिनिर्माणैश्चान्यशिल्पकैः॥24॥
गजेभवेदवर्णे तु प्रजापालो[20] वलान्वितः।
प्रतापी कीर्तिवर्माऽसौ राजाऽऽसीच्चुलुकान्वये॥25॥
तस्य भाग्यवतः पुत्राश्चत्वारः स्युः सुशोभनाः।
ते तस्य[21] निधने काले नाप्तमासन्च[22] यौवनम्॥26॥
ज्येष्ठस्तु पुलकेशीति द्वितीयो विष्णुवर्धनः।
तृतीयो जयसिंहश्च चतुर्थो बुद्धवर्षकः॥27॥
सत्स्वप्येतेषु पुत्रेषु राज्यसिंहासने स्थितः।
युवराजो मंगलीशः सर्वलाकानुरोधतः॥28॥
चालुक्य नृपतीनां तद्राज्यं सिंहासनं महत्।
अङ्के भवेद वर्षेऽसौ शोभयामास मङ्गल॥29॥
मङ्गलीशस्य विषये विदुषा केन धीमता[23]।
घोषितं समुदाचारं[24] चालुक्यकुलभूभृतः॥30॥

ज्येष्ठभ्रातुस्मतिसुतवरेऽप्यर्भकत्वादशक्ते--
र्यस्मिन्नात्मन्यकृत विधुरं मङ्गलीशः पृथिव्याः।
तस्मिन् प्रत्यर्पयदथ[25] महीं विस्तृतां यूनि सद्यः,
चालुक्यानां क इव हि पथो धर्म्यतः प्राच्यवेत्॥31॥

॥इति श्रीचालुक्य राज अय्यण वंशचरित काव्ये
मङ्गलीशराज्यसिंहासन प्राप्ति नाम तृतीयः सर्गः॥

## सन्दर्भ

1. जयसिंहानन्तरं राज्श्ये प्राज्ये प्रतापवान्—क. पुस्तके
2. समागचछत्—क. पुस्तकें
3. गोविप्राणां रक्षणेन विदुषां भरणेन च।—ग. पुस्तके
4. ह—क. पुस्तके
5. राज्ये स दानिनां वरः—ख. पुस्तके
6. सुखप्रदम्—क. पुस्तके
7. विक्रमः—क. पुस्तके
8. सर्वत्र वर्णितो बुधैः—ग. पुस्तके
9. स राजधानीं वातापीं चकार नृपसत्तमः॥—क. पुस्तके
10. चालुक्यनगरी स्मृता।—ग. पुस्तके
11. सु—ख. पुस्तके
12. शकभूपतेः—ग. पुस्तके
13. कीर्तिवर्ममंगलीशौ सुतौ तस्योदितौ शुभौ।—क. पुस्तके
14. पराक्रमेण याभ्यां सा—ख. पुस्तके
15. महावीरो—क. पुस्तके
16. प्राप्तसम्पदा—क. पुस्तके
17. अग्निष्टोमं तथाऽन्यन्च यज्ञं बहुसुवर्णक॥—क. पुस्तके
18. प्रसन्ना ब्राह्मणास्त्वंनामाशीर्भिः समवर्द्धयन्॥—क. पुस्तक
19. वैजयन्तीं विजित्य च—क. पुस्तके
20. वत्सरे स—क. पुस्तके
21. यैस्तस्य—ग. पुस्तके
22. आसीच्च—ग. पुस्तके
23. केनापि विदुषा पुरा—क. पुस्तकें
24. लिखितं तत् समुचितं—ख. पुस्तके
25. प्रत्यार्पिपत्—ग. पुस्तके

# ॥अथ चतुर्थः सर्गः॥

स प्रतापी नरेन्द्रस्तु पृथिव्यां प्रथितो यशाः[1]।
जितेन्द्रियः सत्यवादी प्रजारन्जन तत्परः॥1॥
सह्योरुरण विक्रान्तो रणविक्रान्त एव च।
पृथिवीवल्लभश्चैव राजा राष्ट्रे रणे त्वभूव[2]॥2॥
तस्याऽश्वसैन्यं प्रसृत मब्धिवेलां विलङ्घ्य हि[3]।
समस्तं दक्षिणं देशंस[4] शशास वलान्वितः॥3॥
कलचूरीषं शभवं बुद्धराजं महावलम्।
प्रणाश्य गजसैन्यं सः[5] जितवान् समराङ्गणे॥4॥
विजित्य रेवती द्वीपं मंगलः[6] शत्रुसूदनः।
अन्यानपि नृपान् संख्येऽसंख्यान् भुवि प्रशीयितम्[7]॥5॥
उत्तरे लाटदेशान्तं स्वराज्यमकरोद् दृढम्[8]॥
शक्तित्रयसमायुक्तो चालुक्य कुलभूषणः॥6॥
वर्षे[9] पन्चशते तेन स्थापितं विष्णुमन्दिर॥
वातापि गिरिमुत्कृत्य गुहायां परमाद्भुतम्॥7॥
यत्प्रबन्धार्थमेतेन ग्रामं तन्जीश्वराभिधम्।
कल्पितं महता तेन महसा देवताबलिः[10]॥8॥
विप्राः षोडषसंख्याका भोजनं नित्यमाप्नुवन्।
परिव्राजश्च वहवस्तुष्टास्तेन तदा मुदा[11]॥9॥
एवं संवर्ध्यराज्यं स्वं कीर्तिन्चाऽवाप्य शाश्वतीम्।
प्रजाः सम्पाल्य सन्जातः पुरन्दरः पुरातिथिः॥10॥
अङ्केभेदवर्षोच्चि भवेद नेत्ररामेषु वत्सरम्।
राज्ञा राज्यं[12] कृतं तेन चालुक्यान्वयभूषकम्॥11॥
सामन्तस्तत्सुतश्चेन्द्र वर्मासत्याश्रयो नृपः।
ध्रुवराज इति ख्यातः स्वल्प कालं शशास सः॥12॥

पुलकेशीति नामा तद् भ्रातुः पुत्रः प्रतापवान्।
शशास राज्यं तदनु कीर्तिवर्मसुतो बली॥13॥
नेत्र रामेषु सविधे वत्सरे शाक भूपतेः।
राज्य धूः संगता तस्य करे चालुक्य भूभृतः॥14॥
स राजनीति कुशलो बुद्धिमान् बलविक्रमः।
कार्येषु परमोत्साही पैत्र्यं राज्यं गृहीतवान्॥15॥
कान्यकुब्जेश्वरो हर्ष[13] आक्रमद्दक्षिणे तदा।
विजिगीषुश्च श्रीहर्षस्ततस्तेन न्यवर्तत[14]॥16॥
प्रबाध्य तच्चमूं वीरो महाबलसमन्वितः।
दूरी चकार हर्षस्य हर्षं सबल गर्वितः॥17॥
तेन चालुक्यवंश्यानां नाभूत् सहि प्रशासकः।
परं स भारतदेशस्य श्रेष्ठोऽभूद् श्रीधरापतिः॥18॥
अयं सत्याश्रय इति पृथिवीवल्लभस्तथा।
भट्टारकश्च परमेश्वर नामभिरीरितः॥19॥
रणरङ्गप्रियो वीरोऽप्यायिकेन समन्वितम्।
गोविन्दं हस्तिसैन्यैश्च भीमरथ्यास्तटे गतम्॥20॥
बाहुभ्यां सम्प्रमथ्यै तौ प्रक्षिप्तौ युद्धसागरे।
पलायितश्चाप्ययिको गोविन्दो मित्रतां गतः॥21॥
'वनवासी'[15] दृढं दुर्गं सुसंरुध्य गृहीतवान्।
गंगाऽलूपान्वयगतौ राजानौ स्वाश्रयेऽनयत्॥22॥
कोंकणस्थो मौर्यवंशी राजा युद्धे पराजितः।
पश्चिमाब्धौ पुरी नाम्नी[16] लक्ष्मीवन्नगरी शुभा॥23॥
नौकाभिस्तां समाक्रम्य स्वायत्ती कृतवान्पुनः।
मालवेन्द्रो महावीरो तथैषो गुर्जराधिपः॥24॥
दृष्ट्वा तस्य विशालां तां सेनां शत्रुविमर्दिनीम्।
तस्याधी त्वमुररीकृत्य तच्छरणं गतौ॥25॥
नर्मदायास्तटे तस्य प्रबलं सैन्य मुच्छितम्।
शक्तित्रयेण युक्तस्य वीरस्यारातिविद्विशः॥26॥
नवनवति ग्रामाणां सहस्रेर्ण समन्वितम्।
महाराष्ट्रं दृढं देशं[17] स वशे कृतवान् वली॥27॥
कोसलस्य कलिङ्गस्य राजान्यै शत्रुमर्दनौ।
विलोक्य तत्प्रतापन्च भीतौ तौ शरणागतौ॥28॥
दुर्गं पिष्ठपुरं श्रेष्ठं हेलयैव गृहीतवान्।
शत्रुशैन्यं पराजित्य कुनालं स्ववशेऽकरोत्॥29॥

पल्लावान्वयराजस्तु कान्चीशो भयविह्वलः।
दुर्गमाश्रित्य चात्मानं कथमप्यभ्यरक्षयत्॥30॥
पाण्ड्यकेरल चोलानां राजभिः शरणागतैः।
स दुर्धर्षोऽकरोन्मैत्रीमौदार्यादि गुणान्वितः॥31॥
वातापीं स्वपुरं प्राप्य नीत्या धर्मेण चान्वितः।
स्व राज्यमकरोद्धीमान् परितोष्य समाः प्रजाः[18]॥32॥
प्रजानुरन्जनं कुर्वन् धर्मकर्माणि पालयन्।
सुखयबान्धवादींश्च दानमानादिभिः सदा॥33॥
वर्षे नु षोडशे राज्ये दूतश्चेरानदेश तः[19]।
स्खुस्त्रोर्नृपस्य चायातो[20] विशिष्टोपायनैः सह॥34॥
प्रादादागत्य दूतोऽसौ[21] पत्रं राजाङ्कमुद्रितम्।
सभामाकार्य मानेन मैत्र्या मैत्रीं व्यवर्धयत्[22]॥35॥
चीनयात्री हुएन्त्सङ्गो राज्ये तस्य समागमत्।
लिखितं तेन तद्वृत्तं[23] स्वयात्रावृत्तवर्णने॥36॥
अहो प्रभावो कालस्य प्रभावाद्यस्य भूभृतः।
नीतिधर्म समायुक्तास्तेऽपि यान्ति विपर्ययम्॥
वर्धमाने हि बौद्धानाम्त्याचारे स धर्मवित्।
सत्याश्रितस्य हिन्दूनां धर्मस्योन्नतिमातनोत्॥37॥
धर्मार्थं शङ्कराचार्यो यत्कार्यंकृतवान् पुरा।
प्रारम्भस्तस्य कार्यस्य पुलकेशी समाचरङ्॥38॥
यच्चैतिहासिके काले भारतेऽभिमत शक्तिमान्।
युद्धेषु विविधेष्वत्र स्थितोऽयमयराजितः॥39॥
तेन श्रेष्ठतमो हिन्दू सार्वभौमो नृपोह्ययम्।
बभूव पुलकेशीति सत्याश्रयसमन्वितः॥40॥
समैस्तैश्च सद्भिस्त्वस्य यशो गीर्वाणवन्दितम्।
गीतं हि श्रद्धया वृत्ते मुक्तकण्ठेन सादरात्॥41॥
अस्य शौर्यस्य शक्तेश्च सम्पत्तेरपि वर्णनम्।
कृतं स्वभाषा ग्रन्थेषु वैदेशिकजनैः श्रुतम्॥42॥
चालुक्यानां वंशजातो राजा नृपः श्रेष्ठो ह्यभूदयम्।
देशे देशान्तरे चास्य सद्भिः कीर्तिः प्रगीयते॥43॥
रघोर्वंशे यथा रामः पाण्डवेषु यथार्जुनः।
तथा चालुक्य वंशोऽयं पुलकेशीति विश्रुतः॥44॥
अहो प्रभावो कालस्य प्रभावाद्यस्य भूभृतः।
नीति धर्म समायुक्तास्तेऽपि[24] यान्ति विपर्ययम्॥45॥

तद्राज्यस्यान्तिमे काले राजानः पार्श्ववर्तिनः।
वलं सन्चित्यक्रमशस्तद्राज्यं समपीडयन्॥46॥
कान्चीशोवर्म संयुक्तो नरसिंहः प्रतापवान्।
पाण्ड्यकेरलचोलानां राज्ञां बल समन्वितः॥47॥
चतुरङ्गबलैर्युक्तो निरुद्धोऽपि समन्ततः॥
समाक्रमेत्तस्य राज्यं दृष्ट्वैतद्दुःखमाप्तवान्॥48॥
नेत्राङ्ण्गवाणवर्षे तु शके दुर्देवधर्षितः।
प्रतापी राजराजो हि त्यक्त्वा भूमिं दिवं गतः॥49॥
चत्वारस्तस्य पुत्रास्युरम्बेरा नाम कन्यका।
पन्चसन्तति संयुक्तोऽप्यन्ते दुःखमवाप्तवान्॥50॥
चन्द्रादित्यो ज्येष्ठपुत्रन्चान्य आदित्यवर्मणः।
तृतीयोविक्रमादित्यो जयसिंहश्चतुर्थकः॥51॥
आदित्यवर्मणि ज्येष्ठे सत्यपिक्रूरविक्रमः।
विक्रमादित्य नामासावगृण्हाद्राज्य शासनम्॥52॥
सत्याश्रयो राज्यमल्लः श्रीवल्लभ इतीरितः।
महाराजाधिराजश्च परमेश्वर इत्यपि॥53॥
पृथिवीवल्लभेत्यादि विरुदैर्बहुभिः स्मृतः।
चालुक्य वंशतिलकः प्रसिद्धोऽभून्महीतले॥54॥
उच्चैश्रवाः समवलस्तस्याऽम्बः परपीडनः।
चित्रकण्ठ इति ख्यातः सर्वयुद्धेषु संगतः॥55॥
पाण्ड्य केरल चोलादीन् जित्वा खड्गबलेन च
वातापीं राजधानीं स्वामानयत्स्ववशे पुनः॥56॥
रणाङ्षे स्रवद्रक्तैर्व्रणैर्युक्तो महीपतिः।
शुशोभ गैरिकस्रावैर्युक्तः पर्वतराडिव॥57॥
नरसिंहवर्मयुक्तं पल्लवान्वय सम्भवम्।
पराजित्यपितुर्वैरशोधनन्चाऽनरोन्नृपः॥58॥
कान्चीं जग्राह च वलाद्रक्त पातेन वीर्यवान्।
महाबलो विशुद्धात्मा नीतिधर्म विशारदः॥59॥
सर्वत्र युद्धे विनयादित्यारन्येन सुतेन च।
पौत्रेण विजयादित्य नामकेन समन्वितः॥60॥
आश्चर्यकारकं जन्यं विधाय नर पुङ्गवः।
तेजःश्रियं द्विषां सर्वा[25] चालुक्यान्वयमानयत्॥61॥
कावेरं पारसीकन्च सिंहलं देशमुत्तमम्।
तत्र तत्र स्थितान् राज्ञो सज्विामानयत् पुनः[26]॥62॥

शकात् नेत्राङ्क वाणाच्च रामाकाशरसान्तकम्।
कृत्वा राज्यं स्वपुत्राय दत्वा राजा[27] दिवंगतः॥63॥
स्वराज्य रक्षा चिन्तातो निर्मुक्तो धर्मिणो वरः।
स्वर्गलोकं गतो वीरो आहूत इव जिष्णुना॥64॥
यस्य प्रतापो भुवि विस्तृतोसौ,
सद्दानधर्मार्जितपुण्यराशिः।
आतिथ्यमेवं लभते स्म चेन्द्रात्
संवर्ध्य चालुक्य कुलस्य लक्ष्मीम्॥65॥

॥इति श्री चालक्यराज अय्यण वंशचरिते काव्ये वंशपरिचये प्रथम विक्रमादित्यवर्णनं नाम चतुर्थः सर्गः॥

## सन्दर्भ

1. मंगलीशो महावीरो गां देवब्रह्मपूजकः।– क. पुस्तके
2. लिखितो नामभिश्च तैः–क. पुस्तके
3. प्राग्प्रतीच्यब्धितीरयोः–ग. पुस्तके
4. यथं–क. पुस्तके
5. विनाश्य तद्धस्तिसैन्यं–क. पुस्तकें
6. एव स– क. पुस्तके
7. न्यपातयत्– क. पुस्तके
8. अभ्यवर्दयत्– ग. पुस्तके
9. शाके–क. पुस्तके
10. सङ्कल्पितं नित्यं नारायण वलिस्तथा–क. पुस्तके
11. तर्प्यन्ते तदनन्तरम्–क. पुस्तके
12. यावद्राज्यं–ग. पुस्तके
13. कन्नौजराजः श्रीहर्ष–क. पुस्तकें
14. जेतुकामः परं तेन परास्तः सन्नयवर्तत।–क. पुस्तके
15. दुर्गमिषः–ग. पुस्तके
16. पुरीनाम्नी पश्चिमाब्धि–क. पुस्तके
17. देशं महाराष्ट्रसंज्ञं–क. पुस्तके
18. स्वराज्यमकरोद् विप्रान् सन्तोष्यैतान् धनादिभिः–क. पुस्तके
19. वर्षे तु षोडषे तस्य राज्यस्येरानदेशतः।–ख. पुस्तकें
20. दूतश्च–ख. पुस्तके
21. समागच्छद्राजसभां–ख. पुस्तके
22. दत्वा संस्थापयामास मैत्री तस्य च तेन च–ख. पुस्तके
23. वर्णनं–ख. पुस्तकें
24. अपि–क. पुस्तकें
25. विजयश्रीं पराणान्तु–क. पुस्तके
26. विजित्य स्ववशेऽकरोत् ग. पुस्तके
27. समर्प्य च–ख. पुस्तके

## ॥अथ पञ्चमः सर्गः॥

तत्सूनुर्विनयादित्यो रणकाननकेसरी।
तद्राज्यं स्वपितुः प्राज्यं पालयामास धर्मतः॥1॥
चोलकेरलकालभ्रविलहैहयपल्लवान्।
पाण्ड्यमालववंश्यांश्च स्व साम-तान् चकार सः॥2॥
शिवनेत्राभ्ररसतः गजचन्द्ररसान्तकम्।
शके राज्यं सुस्कृत्य[1] पुत्रं संयोज्य स्वर्गतः॥3॥
विजयादित्य इत्याव्हस्तत्सूनुर्वहुविक्रतः।
राज्यं सम्भूषयामास विदुषां पालकः प्रभुः[2]॥4॥
तस्य लोकमहादेवीराज्ञीति प्रथितां भुविः[3]।
वाणेषु शास्त्र संख्यान्ते शके राज्यं चकार सः॥5॥
महारको रणधरः समस्त भुवनाश्रयः।
महाराजाधिराजाद्यैर्विविधैर्विरुदैर्युतः॥6॥
अपि बाल्ये शस्त्र विद्यापारंगोऽमित शक्तिमान्।
पितामहेन पित्रा च तुल्यो[4] युद्धेषु वीर्यवान्॥7॥
गत्वा प्रादर्शयत् स्वीयमद्भुतम् बल पौरुषम्।
पितामहं च पितरं प्रीणतिस्म च तेन सः॥8॥
अददाद्बहुरत्नानि सुवर्णादिकमुत्तमम्।
युद्धे प्राप्तं गजाश्वादि ताभ्यां नम्राननः सदा॥9॥
एकदा दैवतः सोऽभूद्वद्धः शत्रु कदम्बकैः।
नीजनीत्यैव तस्मात्स मुक्तो भूत्वाऽगमीद् गृहम्[5]॥10॥
तस्य राज्यं समृद्धिन्तु कः शक्तो वर्णितुं भुविः।
देवराऽपि तद्राज्यं दृष्ट्वा सेर्ष्योऽभवद् हृदि॥11॥
ब्रह्मविष्णु शिखादीनां स्थापिता मूर्तयो मुदा।
मन्दिराणि विनिर्माय सुन्दराणि ततस्ततः॥12॥

वातप्यां पट्टलकडे विजयेश्वर मन्दिरम्।
रचितं तेन दत्तन्च भूमिदानं द्विजातिषु॥13॥
जैनेषु ग्रामदानन्च विहितं तेन भूभृता।
सर्वा प्रजा प्रसन्ना सीद्राज्ये तस्य विचारिणः॥14॥
गजचन्द्ररसाद् वर्षाद् बाणबाणरसान्तकम्।
राज्यं चकार धर्मेण शक्रतुल्यः प्रतापवान्॥15॥
तस्मिन्नेव शके राजा[6] स श्रीचालुक्यनन्दनः।
पुरुहूतपुरातिथ्यं स्वीचकार निजै र्गुणैः॥16॥
तत्सूनुर्विक्रमादित्यो बहुभिर्निरुदैः स्मृतः॥
महाबलो महावीर्यः सत्यसन्धः प्रतापवान्॥17॥
पल्लवीयं वन्दिपोतं वर्माणं बलगर्वितम्।
युद्धे निर्जित्य कान्चीं तां जित्वा स स्ववशेऽनयत्॥18॥
दर्शनीयान्च दृष्ट्वातां राजधानीं सुखप्रदाम्।
लुठ्यतिस्म न तां राजा रक्षां तस्याश्च सोऽकरोत्[7]॥19॥
तत्रस्था ब्राह्मणाः सर्वे दानमानैः सुपूजिताः।
प्रसिद्धे मन्दिरे तत्र राजसिंहेश्वरस्य च॥20॥
शिलालेखे स्थिरा[8] कीर्तिः विरूपावलि संयुता।
विलोक्यतेऽधुनाप्येवं दर्शनायाऽऽगतैर्जनैः॥21॥
मन्दिराण्यप्यनेकान्य स्थापयेद्देव भक्तितः।
महता स्वर्णदानेन समृद्धानि सदाकरोत्[9]॥22॥
प्रतापप्रसरणाऽसौ पाण्ड्यकेरलचोलकान्।
जयस्तम्भान्सु संस्थाप्य दक्षिणाब्धि तटेऽदहत्॥23॥
हैहयान्वय संभूते कन्ये विधि विधानतः॥
पर्णि लोक महादेव्या गृहीत्वासौ समाकरोत्[10]॥24॥
स अन्यां त्रैलोक्यमहादेवीं द्युतिमतीं मुदा[11]।
जग्राह ते च त्रैलोक्येश्वर लोकेश्वरस्य च॥25॥
स्थापिते मन्दिरे तत्र विप्राः द्रव्यैः सुपूजिताः।
सुषुवे सा सुतं देवी त्रैलोक्यसुयशोधनम्[12]॥26॥
कीर्तिवर्माभिधं वालं वालातयसमप्रभम्।
वर्षेऽङ्क षड्रसे शाके वीरवीरो दिवं गतः॥27॥
स्वपितृराज्ये बलवान् कीर्तिवर्मा समागमत्।
नृपसिंहादि विविधैर्विरुदैः शतशैर्युतः॥28॥
शस्त्रविद्यासु निपुणः शास्त्रचक्षुर्गुणान्वितः।
युवराजपदे पूर्वं पिता संस्थापितो मुदा॥29॥

पितादेशात्[13] पल्लवीयं राज्यं सम्यूकसमाक्रमत्।
तेन भीतो पल्लवीयो दुर्गाश्रयमुपागमत्॥30॥
मदोन्मत्तांश्च करिणस्तत्राश्वान् बहुसंख्यकान्।
रत्नानि बहुमूल्यानि सुवर्णरजतस्य च॥31॥
महार्हसम्पद् ततस्तमाच्च पल्लवात्[14]।
पितुः पुरस्तु संस्थाप्य स उपायमाचरत्॥32॥
स मेधावी महादानी प्रजारन्जन तत्परः।
दुर्दैवाभिहतो राज्यं नाऽशक्नोद्रक्षितुं स्वकम्॥33॥
कान्चीकेरल पाण्ड्याद्यैर्युद्धेषु क्षीणसैनिकः।
राष्ट्रौढढ़न्तिदुर्गेण स्वबलेन पराजितः॥34॥
श्रीदन्तिदुर्गराजाख्यः स्वकुलाम्भोजभास्करः।
सर्वान् राज्ञो दक्षिणस्थान् जितवान् बहुसंगरैः॥35॥
गृहीतस्तद्राज्यभागो वलात्तेनोत्तरस्थितिः।
दक्षिणं भागमाश्रित्य राज्यं चक्रे स दुःखितः॥36॥
पातुङ्गलप्रदेशं तु विप्रमाधव शर्मणे।
प्रादात्तदाप्यहोदान शौण्डत्वं तस्य चाद्भुतम्॥37॥
नैकवारं स्वराज्याप्तौ कृत यत्नोऽपि भूमिपः।
अवशिष्टमपि स्वीयं राज्यं तस्मात्ततो गतम्15॥38॥
अरक्षितं दैववशात्पुनर्यत्सुरक्षितं तद्भवतीति निश्चितम्।
दैवप्रकोपपाद्बहुशोऽपि रक्षितं विनश्यतीति प्रमुखाः वदन्ति॥39॥

॥इति श्री चालुक्यराज अय्यणवंशचरिते काव्ये चालुक्यवंश परिचये
नृपकीर्तिवर्म द्वितीयवर्णनं नाम पन्चमः सर्गः॥

## सन्दर्भ

1. बालयित्वा—क. पुस्तके
2. गोदिप्रप्रतिपालकः।—क. पुस्तके
3. तस्य राज्ञी लोक महादेवीति प्रथिता भुवि—क. पुस्तके
4. सार्धं—क. पुस्तके
5. भूत्वागमद् गृहम्—क. पुस्तके
6. असौ—ख. पुस्तके
7. शोभनीयां दर्शनीयां तान्च दृष्ट्वा स बुद्धिमान्।
   न लङ्घयतिस्म महतीं रक्षां प्रत्युत चाकरोत्॥
8. तस्य. क. पुस्तके
9. स चाकरोत्—ग. पुस्तके

10. उवाहासौ लोकमहादेवीं परमसुन्दरीम्—क. पुस्तके
11. अन्यां तु त्रैलोक्य महादेवी च सोदरां मुद्रा।
याभ्यां त्रैलोक्येश्वरस्य तथा लोकेश्वरस्य च॥—ख. पुस्तके
12. काले सा त्रैलोक्य महादेवी सुतजीजनत्। क. पुस्तके
13. पित्राज्ञप्तः। ख. पुस्तके
14. मुद्रास्तस्माद् समानीय विजिताद्राज्यपालकात्—क. पुस्तके
15. राज्यं न रक्षितुं क्षमः।

# ॥अथ षष्ठः सर्गः॥

वर्ष द्विशतपर्यन्तं तद्राज्यं शत्रुपीड़ितम्।
राष्ट्रोढान्वयजातानां राज्ञामाधीनतां गतम्॥1॥
तद्वंशीयैर्लाटदेशे यद्राज्यं स्थापितं पुनः।
राष्टौढवंश्यैस्तदपि क गृहीतमिति कथ्यते॥2॥
पुलकेशी द्वितीयस्य पुत्रेष्वासीत् धराश्रयः।
जयसिंहो वर्मयुक्तो कनिष्ठः शान्त चेतवः॥3॥
शिलादित्यो मंगलेशः पुलकेशीति नामकाः।
आसन् पुत्रास्त्रयस्तस्य जयसिंहस्य धीमतः॥4॥
पुत्रकेशी शिलादित्यौ निस्सन्तानौ दिवं गतौ।
मंगलेशात् प्रचलितो वंशोऽभूतः कीर्तिमांस्ततः॥55॥
मंगलेशस्य पुत्रस्तु माणिक्यादित्यनामकः।
नरसिंहस्तस्य सूनुस्तत्सूनुः कतियारकः॥6॥
तस्माज्जाता प्रसिद्धोऽयं विमलादित्य नामकः।
धर्मकार्यरतः[1] श्रीमाननेक गुणगुम्फितः॥7॥
तत्पुत्रोभीमसंज्ञोऽयं तस्माज्जातः प्रतापवान्।
आदित्यवर्मेत्याख्यातःश्चालुक्य कुलभूषणः॥8॥
तेन भीमेन वीरेण नीतिशास्त्रविदा तदा।
मतिशूने स्वकं स्वल्पं राज्यं कृतिमता कृतम्[2]॥9॥
कालेशेलरराजस्तु तस्मिन्नीतिविशारदः।
अपराजित नामाऽसौ कोंकणे राज्यमन्वभूत्॥10॥
यस्य राज्ञी कर्मसेन राजस्योज्जयिनी पतेः।
पत्न्या शशाङ्क पुरराङ्नन्दिन्याः कन्यकाऽभवत्॥11॥
कश्चित्कदम्बवंशीयो राजा कोंकणमाक्रमत्।
जित्वा पराजितं तत्र कोंकणं स्ववशेऽकरोत्॥12॥

ज्ञात्वेदं दुःखवृत्तान्तं भीमो भीमपराक्रमः।
सिंधुदेशाधिपैः पूर्णं साहाय्यं प्राप्य बुद्धिमान्॥13॥
कदम्बवंशजातं तं विजित्य समराङ्गणे।
प्रत्यावर्तत तद्राज्यं कोंकणस्थं कदम्बतः॥14॥
ददौ शेलरराजाय राज्यं कोंकणदेशजम्[3]।
सिंधुदेशाधिपैस्तस्य मैत्री गाढा ततोऽभवत्[4]॥15॥
सिंधुदेशीयं पोतं तु ह्येकदा जलमज्जितम्[5]।
दृष्ट्वा कदम्बवंशीयैः सर्वं तस्माद्विलुण्डितम्॥16॥
कुद्धास्तेसिंधुदेशीयास्तद्वैर परिशोधने।
प्रीतिं चालुक्यवंशीयै[6] र्वबर्धुः कोंकणाजिरे॥17॥
साहाय्यमर्पितं तैस्तत्र[7] रहस्यं राजसम्मतम्[8]।
येन चालुक्यवंशीया राजानो[9] जयमाप्नुवन्॥18॥
मकराकृतिकः कश्चित् पशुन्चालुकनामकः।
नीरे महत्कर्दमे वा प्राप्यतेऽसौ महाबली॥19॥
अश्वं गजन्च सम्प्राप्य प्राण बाधां सदा करोत्[10]।
जघान तं स्थले चाऽपि क्रीडन्तेन मुहुर्मुहुः॥20॥
आनीय तं पशुं हत्वा वृक्षाधारेण लम्बितम्[11]।
तापितं चैधसा तेन[12] कृत्वा चैनमधो मुखम्॥21॥
तच्छरीरस्रुतं तैलं बृहद्भाण्डेषु सन्चितम्[13]।
तेन तैलेन दुर्गे वाऽरण्ये प्रज्वलितोऽनलः॥22॥
कदापि न शमं याति जलेन शिकतेन वा।
वायुना चोदितः शीघ्रं दावानलसमो भवेत्॥23॥
भीमपुत्रः कीर्तिवर्मा तैलस्याऽस्य प्रयोगतः[14]।
कल्याण्याश्च वाताप्याः परितर-सकलान् नृपान्॥24॥
पराजित्य रणे सर्वान् तेषां राज्यानि चागृहीत्।
तस्मात्तस्य च साम्राज्यं जातं परम विस्तृतम्॥25॥
एवं विस्तार्य तद्रान्यं शान्तिं नीत्या नियोजकः[15]।
आसुमाशीर्गुरोर्राजा पृथ्वी राजस्य पादयोः[16]॥26॥
चालुक्यानां गुरोः पार्श्वे श्रद्धावान् विनयान्वितः।
सम्वर्द्धितः स तेनाऽऽशीर्वचोभिर्मुदमाप्तवान्॥27॥
वार्तालाप प्रसङ्गेऽस्मिन् गूरुणा वृत्तबोधिना[17]।
त्वं यदा गतवान् राजन् जन्याय जनितोत्सवः[18]॥28॥
ते भार्या त्वद्वियोगेन दुःखैश्च बहुपीडिता।
विललाप महानादैः पृथिव्यां च लुलोठ सा॥29॥

अकस्माद्दैवयोगेन खवाणीम श्रृणोत्तदा।
वलेश्वरं महादेवं भक्त्या त्वं राध्यसे[19] यदि॥30॥
समस्ते भारते वर्षे त्वद्वंशीयाश्च भूभृतः।
स्थापयिष्यन्ति स्वं राज्यं यावच्चन्द्र दिवाकरौ॥31॥
तेन तुष्टः कीर्तिवर्मा गृहीत्वाऽऽज्ञां गुरोस्ततः।
परावर्तत राज्ये स्वे प्रजाभिश्चाऽभिनन्दितः॥32॥
दानधर्मरतो वीरो गो विप्राणां तु सेवया।
प्राप्तवान् तैलपं पुत्रं नीतिशास्त्र विशारदम्॥33॥
तस्मात्तु विक्रमादित्यो जातो विक्रमवान् भुवि।
तस्य पुत्रो महानासीद्[20] भीमो भीम पराक्रमः॥34॥
भीमस्यासीदय्यणो हि पुत्रः श्रीमान् नृपो महान्[21]।
कृष्णराजस्य तनयामुवाह स महायशाः॥35॥
तत्पुत्रो विक्रमादित्यो नोन्तादेवीं पतिव्रताम्[22]।
धर्म शीलां विवाह्यैव तैलपं पुत्र माप्तवान्॥36॥
नन्दाब्जाङ्क शक्रे वर्षे विक्रमादित्यभूपतिः।
प्रदाय राज्यं पुत्राय तैलपाय दिवंगतः॥37॥
तैलपस्तु महातेजा प्रजापालन तत्परः।
वाल्यादेव समेषां च प्रीतिपात्रमभूच्चिरम्॥38॥
शस्त्रं शास्त्रं च विधिवत् संगृह्य गुरुपार्श्वतः।
चकास्ते स युवा तत्र साक्षादिव जनार्दनः॥39॥
महाराजाधिराजश्च परमेश्वर इत्यपि।
पृथिवी वल्लभ श्चासीदाहवमल्ल[23] इति क्रमात्॥40॥
बहुभिर्विरदैरेतैः स्तुतो धर्म धुरन्धरः।
चालुक्यान्वय सजगतो रणकानन केसरी॥41॥
और्जित्याच्चरणाविव प्रचलितौ साक्षात्कलेः क्रामतः
क्रूरौ वद्धशरीरकौ गुरुजनद्रोह प्ररोहाविव।
राज्ञा खण्डितशब्दकूटक कुल श्री वल्लिजाताङ्कुरौ
लूनौ येन सुखेन कक्कररणस्तम्भौ रणाप्राङ्गणे॥42॥
इत्थं पुरादिति सुतैरिव भूतधात्रीं,
यो राष्ट्रकूटकुटिलैर्गमितामधस्तात्।
उद्धृत्य माधव इवादिवराह रूपो,
बभ्रे चुलुक्य कुलवल्लभ राज्य लक्ष्मीम्॥43॥

इति श्री चालुक्यराज अय्यणवंशचरिते काव्ये वंशपरिचये द्वितीय तैलप नृप वर्णनं नाम षष्ठः सर्गः॥

## सन्दर्भ

1. धर्मकर्म—क. पुस्तकं
2. राज्यं कथमपि कृतम्—क. पुस्तकं
3. अददाच्छेलग्नृपायैत्प्रेम्णा तु कोंकणम्। —ख. पुस्तकं
4. प्रेमवृद्धिर्वभूव च—ग. पुस्तकं
5. एकदा सिंधदेशीयं पोतं तु जलमज्जितम्—ख. पुस्तकं
6. संवद्धर्य—क. पुस्तकं
7. चोक्तं—क. पुस्तकं
8. परमाद्भुतम्—ग. पुस्तकं
9. राजानः सर्वत्र—ख पुस्तकं
10. ऽनायासेनैव शक्तिमान्—ख. पुस्तकं
11. लम्बयेत्—ख. पुस्तकं
12. तापयेदग्निनाधस्तात्—ख. पुस्तकं
13. सन्चयेत्—ख. पुस्तके
14. सहायतः—ग. पुस्तकं
15. शान्तिसंस्थाप्य स्वामिनः—क. पुस्तके
16. आशीर्वादार्थमगमत्पृथ्वी राजस्स पादयोः। —ख. पुस्तकं
17. वार्तालापप्रसङ्गेन गुरवर्येण जल्पितम्। —ख. पुस्तकं
18. राजन् यदा त्वं गतवान् युद्धाय कृत निश्चयः—ख. पुस्तके
19. भक्त्या वाराध्यते यदि—ख. पुस्तके
20. भीम इति ख्यातो—ख. पुस्तके
21. भीमादव्यणो संज्ञश्चोत्पन्नः कीर्तिमान् नृपः। —क. पुस्तके
22. प्रतापवान्—क. पुस्तके
23. चैवा—क. पुस्तके

# ॥अथ सप्तमः सर्ग॥

एवं सर्वान् राष्ट्रकूटान् निहत्य समराङ्गणे।
तैलपोऽसौ महावीरो ययावन्यान्नृपान् प्रति॥1॥
पारमाराधिपं मुन्जं मालवाधीशमुद्धृतम्।
पान्चालं गाङ्गवंशीयं जघान च रणाङ्गणे॥2॥
पराजिताश्चोलहूणचेदीमालवभूभृतः।
महद्विक्रमशीलेन तेन शक्तिमता क्षणात्॥3॥
न्यवसन्मान्यकूठे च राष्ट्रकूटस्य भूभृतः।
राजधान्यां महावीरो नीत्या राज्यं सुपालयन्॥4॥
महाराज्ञी तु जाकब्बा देवी जक्कल विश्रुता।
राष्ट्रकूटस्य कर्कस्य पुत्री शील गुणान्विता॥5॥
ममासाख्यस्य कन्या तु लक्ष्मी नाम्नी पतिव्रता।
द्वितीया महिषी तस्य लोकरन्जन तत्परा॥6॥
विसत्याश्रो ज्येष्ठपुत्रो दशवर्मा कनिष्ठकः।
द्वावप्येसौ महाभागौ गृहं तस्य शुशोभतुः॥7॥
आकाशशिवनेत्राङ्के शके सत्याश्रयो नृपः।
प्रज्यं राज्यं पितुः प्राप्य शशास नयकोविदः॥8॥
महाराजाधिराजश्च परमेश्वरः इत्यपि।
अकलङ्क चरित्रन्च पृथ्वीवल्लभ भूषितः[1]॥9॥
भट्टारक परमादिर्विरुदैः शोभितोमहान्[2]।
योऽभूत्प्रतापिनां श्रेष्ठश्चालुक्य कुलनन्दनः॥10॥
श्रुत्वाकोदण्डटंकार महङ्कारो विलुम्पितः।
शत्रूणां समरे यस्य विपक्ष क्षयकारिणः॥11॥
अबला बालविप्राणां घातकं चोलराजकम्।
विजित्य समरे वीरश्चक्रे शान्तिञ्च दक्षिणे॥12॥

अम्बिकेवाऽम्बिका देवी राज्ञी तस्य पतिव्रता।
सावित्री सा सत्यवन्तं सिषेवे स्वपतिं तथा[3]॥13॥
कालान्तरेण नृपतिः सत्यवाक् धर्मतत्परः।
जगामातिथिरूपेण नगरी ममरावतीम्॥14॥
पुत्राऽभावेऽनुजस्याऽस्य पुत्रः श्रीदशवर्मणः।
ज्येष्ठस्तु विक्रमादित्यः सिंहासनमुपाविशत्॥15॥
स राजा विक्रमादित्यो विरुदैर्बहुभिर्युतः।
शशास विपुलां पृथिवीं मुदाभाग्यवती स्मृता।
तस्यमाता भाग्यवती भाग्यं भाग्यवतीस्मृता
याऽऽसीत् भग्गलदेवीति नाम्ना सर्वत्र विश्रुता॥17॥
नभवणाङ्कपर्यन्तं वत्सरे शकभूभृतः।
राज्यं सम्वर्द्धय सम्पाल्य चाऽयं राजां दिवंगतः॥18॥
अय्यणो जयसिंहश्च भ्रातरौ तस्य विश्रुतौ।
अक्कादेवीति भगिनी नीतिशास्त्रविशारदा॥19॥
रसरामाङ्क शकतो शास्त्राब्ध्यङ्कान्तमेव च।
जिजीवाय्यणनामाऽयं काञ्चिन्मासान् शशास च॥20॥
मालकेडात्पन्चदश क्रोशेयाऽऽसीत् यतागिरौ।
राजधानी पुरा सातु कल्याण्यां स समानयत्॥21॥
कल्याणीराजधान्यासीत् रणदेवीति नामिका।
भार्याऽसीत् प्रथमा तस्य द्वितीया कृष्णनन्दिनी।॥22॥
या नाम्ना चन्द्रिका देवी राष्ट्रौढान्वयसम्भवा।
चतुष्पुत्रांश्च कन्ये द्वे समुत्पाद्य दिवं गता॥23॥
अय्यणेन विरक्तेन खाबाणाङ्कमिते शके।
मासान् पन्चश संख्याकान् धृता शासनधूः स्वयम्॥24॥
श्रुत्वाऽर्जुनस्य विद्रोहं जयसिंहस्य बुद्धितः।
वि चार्य वंशसंघातं वैराग्यमतिनाऽमुना॥25॥
असारः खलु संसार, सारस्तु भगवत्स्मृतिः
इति निश्चित्य मनसि समाचरितमद्भुतम्॥26॥
भ्रात्रेश्रीजयसिंहाय राज्यधूः परिकल्पिता।
येन स्यान्नात्रकलहो माभवेद्वंश संक्षयः॥27॥
शकाद्वेद् रसाङ्कान्तं जयसिंहो महाबलः।
शास्ति स्म विपुलं राज्यं प्रजानामनुरन्जकः॥28॥
महाराजाधिराजश्च परमेश्वर इत्यपि।
भुवि ख्यातश्च जगदे कमलाधैश्च वीरुदैः॥29॥

राजेन्द्र चोलं भोजन्च पर्यतः पर्यपीडयत्।
मालवेन्द्र चेलचोलनृपती तेनदण्डितौ॥30॥
तस्य सग्गलदेवीति महिषी गुण गुम्फिता।
सोमेश्वरं महावीरं तनयामास बालकम्॥31॥
पितुर्युपरते प्राप्य राज्यं सोमेश्वरः सुधीः।
शशासाऽऽकाशनन्दाङ्क पर्यन्त शकवत्सरे॥32॥
लुण्ठिता नगरी कान्ची सहाय्यं मालवानृपम्।
कृतवान् ग्रहणे राज्यं बलवच्छत्रुभिर्हृतम्॥33॥
कामरूपस्य गौडस्य शतानौ च विमर्दितौ।
सिंहलस्य[34] नृपं जित्वा करदानमथाऽग्रहीत्॥34॥
विनाश्य चन्दनवनं मलयाचल संगतम्।
नृपः केरल देशस्य नाशितोऽनेन भूभृता॥35॥
चक्रकोटगाङ्कूट वेंगी भूया जिता बलात्।
लाटकुन्तलवल्हाल गङ्गकोशलभूभृतः॥36॥
कर्नाटचोलसौराष्ट्रदशार्णनृपतिस्तथा।
तुरुष्कमालवाधीशात्कलिङ्गस्य नृपाच्च सः॥37॥
कराटनृपतोऽप्यायं चालुक्य कुल नन्दनः।
महाबलो महावीर्यः करं जग्राह निश्चितम्॥38॥
मगधान्ध्रावन्ति वङ्गकुरुद्राविडभूमिपान्।
खसलाटाऽऽभीरकान्चपान्चालान् क्षोणियान्बलात्॥39॥
विजित्य समरे चैतान् करोत्स्ववशे बली।
कर दाने सैन्यदाने कृतो बन्धोऽपि तैः सह॥40॥
स्वराजधानीं कल्याणीं विस्तार्य परितः क्रमात्।
चकार शोभानां तां स पताकाराम मण्डपैः॥41॥
सोऽभूदाहवमल्लन्च पृथिवी वल्लभः पुनः।
त्रैलोक्य मल्ल इत्याख्यः समस्त भवनाश्रयः॥42॥
इत्यादिभिर्बहुविधैर्विरुदैर्विश्रुतो नृपः।
त्रैलोक्य मालाऽध्मम्माले स्त्रियौ द्वे तु पतिव्रते॥43॥
महाप्रतीपिनं भोजं जित्वा समर कर्कशम्।
धारां कुर्वन्निराधारां कम्पयामास भूतलम्॥44॥
डाहलस्थं कर्णराजं विजित्यैवन्च चोलकम्।
अस्थापयन्जयस्तम्भान् पारावार तटेषु सः॥45॥
गर्वेण महताऽऽयातं द्रामिलोद्देशकं नृपम्।
हेलयैव परास्तं तं कृतवान् भूरिविक्रमः॥46॥

एवं विधाय सकलान् सामन्तान् राज्यपालकान्।
पालयामास राज्यं स्वं धर्मेण च नयेन च॥47॥
समस्त सुख युक्तोऽपि पुत्राऽभावेन दुःखितः।
समर्प्य राज्यभारं तन्मन्त्रिणे वनमाययौ॥48॥
तत्र पत्न्या समं वीरो शङ्कर प्रीतये मुदा।
तपश्चकार महता क्लेशेन नियमेन च॥49॥
कालान्तरेण शुश्राव पुत्रत्रय विधायिनीम्।
आकाशवाणी माल्हादकारिणीम शरीरिणीम्॥50॥
ततो राज्ये समागत्य दत्वा दानं यथेप्सितम्।
गोविप्रसेवयानूनं पुत्रत्रयमवाप्तवान्॥51॥
सोमेश्वरश्च प्रथमो विक्रमादित्य संज्ञकः।
द्वितीयो जयसिंहन्च तृतीयः शंकराज्ञया॥52॥
विक्रमादित्य नामाऽसौ विशिष्ट गुणगुम्फितः।
राज्ञा आहवमल्लस्य प्रीतिपात्रमभूत्तदा॥53॥
अबध्यङ्कनन्द पर्यतं शके सोमेश्वरो नृपः।
पितर्युपरते राज्यं चकार परपीडनः॥54॥
चालुक्यवंशेऽयं राजा श्रेष्ठो जातः प्रतापवान्।
गौडबार्बर पान्चाल सौराष्ट्रान्ध्रतुरुष्ककान्॥55॥
मरुवङ्ग कलिङ्गा चेदी नेपाल गुर्जरान्।
वराट लाट कह्राट सिन्धुकाश्मीरमागधान्॥56॥
मालवान्द्रविडादींश्च राज्ञः संजित्य संगरे।
जातो भारतवर्शस्य सम्राटपदविभूषितः॥57॥
अश्वेमधं महायागं धर्मात्मा कृतवान्मुदा।
अनलाख्ये शुभे वर्षे वीरः विक्रमवत्सरम्॥58॥
हस्त्यङ्काङ्कं शके चैत्रे शुक्ले च प्रतिपत्तिथौ।
चालयामास चालुक्य विक्रमापरनायकम्॥59॥
शालिवाहनभूपस्याऽनन्तरं राजशेखरः।
प्रवर्तको वत्सरस्याऽयमेवाऽभून्नु दक्षिणे॥60॥
विक्रमादित्यराजोऽसौ चकार तदनतरम्।
हस्तिवेदाभ्रचन्द्रान्तं शके राज्यं सुविस्तृतम्॥61॥
चालुक्यवंशं समारभ्य विक्रमादित्य वर्णने।
सन्ति काव्यान्यनेकानि प्राक्कृतानि कवीश्वरैः॥62॥
जयसिंहस्तु सामन्तो भूत्वा खर्व वलान्वितः।
वनवासीं शशाखाऽथ भ्रातृप्रेमाभिवर्द्धितः॥63॥

विक्रमादित्य पुत्रोऽपि सोमेश्वर इतीरितः।
आकाशरसखेन्द्वन्तं शके राज्यमपालयत्॥64॥
द्वितीयो जयकर्णश्च विजयादित्य नामकः।
तत्कन्या मेपलादेवी गोवाप्रानत नृपस्य च॥65॥
कदम्बवंशजातस्य द्वितीयजयकेशिनः।
महिषी सा प्राण समा पतिधर्म[6] परायणा॥66॥
तस्य पुत्रस्तु जगदे कामल्ल इति विश्रुतः।
नेत्राब्ध्यभ्र चन्द्रान्तं शके राज्यासने स्थितः॥67॥
तद्भ्राता तैल संज्ञश्च चालुकय कुलभूषणः।
वेदेभाभ्रेन्दु पर्यन्तं शके राज्यं चकार सः॥68॥
सोमेश्वरस्तैलपुत्रस्तातपादाब्ज सेवकः।
चन्द्रभूरुद्रपर्यन्तमकरोल्लोकरन्जनम्॥69॥
एते नृपा अय्यणराज्य कालादनन्तरं कीर्तियुताक्रमाच्च।
चालुक्यवंशेऽद्भुत कार्यकारिणो राज्यावसनं प्राप्य भुवं शशासुः॥70॥

॥इति श्री अय्यणवंशचरित काव्ये वंश परिचये
अय्यणराजानुगतन्सोमेश्वराचतुर्थान्त नृप वर्णनं नाम सप्तमः सर्गः॥

## सन्दर्भ

1. इत्यपि—क. पुस्तके
2. परमादित्यमहाभट्टारकेत्यादिविरुदैर्युतः—खः पुस्तके
3. सिषेवे स्वपतिं सत्यवन्तं सावित्र्यभूद्यथा—क. पुस्तके
4. सिंव्रलस्य—क. पुस्तके
5. संपाश्व—क. पुस्तके
6. पातिव्रत्य—क. पुस्तके

# ॥अथ अष्टमः सर्गः॥

देव द्विज गवां गोप्ता प्रजानां प्रीतिवर्द्धनः।
जातो नृपः पूतनामा अय्यणस्त्वय्यणोपमः॥1॥
श्रुतिशास्त्रपुराणेषु तत्वशास्त्रेषु निष्ठितः[1]।
तत्वमस्यादि वाक्येषु दत्तचित्तः समान्वितः॥2॥
दानशौण्डः सत्यवक्ता धर्मात्मा शंसितव्रतः।
धर्मराजावतारश्च यज्ञयागरतः सुधीः॥3॥
साक्षान्नारायणस्यांशः शशिशेखर भक्तिमान्।
सदैव ब्रह्मचिन्तायां निरतो योगतत्वविद्॥4॥
कमलायतनेत्रोऽसौ शोभनौ जानु वाहुकौ।
दीप्त्या प्रकाशमानश्च समेषां सुखदायकः॥5॥
महाबलो महोत्साहो विशुद्धज्ञान संस्कृतः।
द्रष्टेव प्रकृतेः कार्यं वीक्ष्यमाणस्तु पूरुषः॥6॥
कथन्चिदपि षड्मासान् राज्यसिंहासने स्थितः।
मन्त्रिभिः क्रियमाणे च राज्यकार्ये गतस्पृहः॥7॥
शास्त्रमुन्यङ्क वर्षेऽसौ जयसिंहविरोधतः।
विद्रोहं सर्वतो ज्ञात्वा मिथ्यात्वं जगतः स्मरन्॥8॥
प्रेम्णाऽनुजं समाहूय राज्यभारं प्रदाय च।
गतस्तपस्वी विपिनं त्यक्त्वा राज्यादिकं क्षणात्॥9॥
तस्यपुण्यप्रतापेन महता तपसा[2] ध्रुवम्।
विलसन्ति सदा तस्य चालुक्यान्वयबान्धवाः[3]॥10॥
तारदेवडिसंज्ञे तुगहने तप आचरन्।
चिरायाऽऽभ्यन्तरैः षड्भी रिपुभिः परिवर्जितः॥11॥
यतोगिरावपि वने किन्चित् कालं निविश्य च।
चन्द्रतारकगत्योश्चाऽकरोत्सूक्ष्माभि वीक्षणम्॥112॥

गणित ज्योतिषो ज्ञानात् खगोले कृतनिश्चयः।
विरह-अभी-हरा यो शोधितस्तेन धीमता[1]॥13॥
संशोधनं नवं शोधमकरोद्ग्रहजस्थितौ।
अन्योयपत्तीर्भूयोऽसौ खगोले समदर्शयत्॥4॥
ग्रन्थेऽय्यण—नशा-संज्ञे स सर्वं संगृहीतवान्।
संस्कृते चानुवादेनसूर्यसिद्धानत संज्ञया॥15॥
प्रसिद्धो भूदयं ग्रन्थे विद्वद्गणक संस्तुतः।
खगोल विषये तेनतस्य ज्ञानं सुविस्तृतम्॥16॥
तत्प्रपौत्रेणा गोविन्द नामके नेति श्रद्धया।
काशीस्थ पण्डितैस्तस्याऽनुवादोऽकारि संस्कृते॥17॥
ग्रन्थेऽप्यस्ति समुल्लेखस्तस्य[6] चालुक्यभूपतेः।
अय्यणस्य सुवृत्तान्तः कीर्तिस्तस्यानुवर्णिता॥18॥
बन्धुभिः स्वजनैः सार्धं प्रजाभिश्चाऽथ मन्त्रिभिः।
सौजन्यं प्रेम सद्भावो विद्यतेऽत्र सुखप्रदः[7]॥19॥
विमातृकुक्षिभूतस्य जयसिंहस्य धीमतः॥
ज्ञात्वा लौल्यं स राज्यस्य[9] वीतरागः स धर्मवित्॥20॥
राज्यं ददौ समं तस्मै राजामन्ये नु वारिधिः[10]।
जगाम च वने घोरे तपस्तप्तुं परंतपः॥21॥
धर्मावतारनाम्नाऽसौ प्रसिद्धोगणकोत्तमः।
योगविद्योगिनां श्रेष्ठः स आसीदय्यणः सुधीः[11]॥22॥
तस्य पत्नी कृष्णकन्या पतिशुश्रूषणे रता।
कन्याद्वयं चतुःपुत्रानुपाद्याऽऽय च सद्गतिम्॥23॥
ज्येष्ठपुत्रश्चन्द्रदेवो द्वितीयोऽप्याइकस्तथा।
नाम्ना चासीत् कतीयारदेवौ देवद्युतिर्महान्[12]॥24॥
नृसिंहदेव एते हि पुत्रा आसन् धुरन्धराः[13]।
तस्यैका कन्यका जाता वेदवेदाङ्क संज्ञके॥25॥
शके विवाहिता साऽसीद् गोवादेशस्य भूभृता।
कामदेव समेनैव वलिना सुन्दरेण च॥26॥
कदम्बवंशजस्तेन चेष्टदेवाभिधेन च।
महाप्रतापिना तेन धर्मकर्मरतेन च॥27॥
अक्कादेवीति नामासीदय्यणस्याऽनूजा तथा।
कदम्बवंशसामन्त षष्ठदेव विवाहिता॥28॥
युद्धक्षेत्रे भैरवी-सा सद्गुणा नीतिकोविदा।
जैवबौद्धादिधर्मेषु शैववैष्णवयोरपि॥29॥

समदृष्टिमतीसाध्वी किसुकाऽस्य सप्ततिम्।
शशास शातनारूढा नीत्या धर्मेण च स्वयम्॥30॥
जयकेशी सुनुरस्याञ्चक्रे गोयागघट्टने।
राजाधानीं विसन्धाय नृपौ राजेन्द्रविक्रमौ॥31॥
त्यक्त्वाराज्यं स अय्यणः किन्चित्कालं तथा सह।
न्यवसविक्रमपुरे तस्या एव निरीक्षणे॥32॥
जयसिंहेनाऽय्यणार्थं ग्रमाः कुश्वाऽसप्ततिः।
प्रदत्ता येऽपि तेषां च प्रबन्धोऽक्काऽकटोन्मुदा॥33॥
येतागिरीनामके च तारदेवडिसंज्ञके।
स्थानयोरुमयोः स्थित्वा कल्याणी विपिनेऽगमत्॥34॥
तत्र वासे महत्प्रीतिस्तस्याऽसीत्पूर्वतः सदा।
यतोऽस्यवंशाचार्योऽपि तत्रैव न्यवसद्गुरुः[14]॥35॥
स शम्भुनामकः साधुः भारद्वाज कुलोद्भवः।
स्थित्वा प्रज्वलिताग्नौ च समाधिस्थोऽभवत्सदा॥36॥
श्रीपरहितराजस्य चालुक्यान्वय सद्गुरोः।
प्रधानशिष्योऽयं तस्मात् सेवितोऽय्यणभूभृता॥37॥
तत्राध्यात्मिकचर्चायां धार्मिकैः सज्जनैः सह।
साधुना सह कालो हि तपसो मोददायकः[15]॥38॥
प्रवृत्ते गुरुणा कस्मात् धर्मचर्चा समन्वये।
मैघैराच्छादितं व्योम व्याप्तन्च तमसा जगत्॥39॥
प्रादुर्बभूव भूकम्पो विद्युच्छब्दो महानभूत्।
हिमवृष्टिश्च सन्जाता सर्वमासीद्भयान्वितम्॥40॥
तदानीं साहसाचार्य शम्भुराघोषयत् क्रशन्।
हन्त! अय्यरणराजस्तु ज्ञानिनामग्रणी सुधीः[16]॥41॥
त्यक्त्वा पृथिवीं गतः स्वर्गमीश्वरेच्छा प्रकाश्यते।
यदस्य वंशजाऽश्चात्र कल्याण्यामुत्तरोत्तरम्॥42॥
उषित्वा प्राच्यधर्मस्योत्थानं समयग्विधाय च।
पुत्र पौत्रादि संयुक्ता भूषमिष्यन्ति भूतलम्॥43॥
राज्यलोभं परित्यज्य स्थाष्यन्ति यदि धर्मतः।
कीर्तिमन्तो भविष्यन्ति भुविसत्कार्यतत्पराः॥44॥
उक्त्वैवं स ऋषिः श्रेष्ठः[17] परलोकं स्वयं गतः।
विलयं हि क्षणाघातं सर्वं प्रकृतिकोनात्॥45॥
अकण्यागाचिकायान्तु गुहायां समदृश्यते।
सामध्य्यूयणशम्भ्वोश्च त्रिपुरान्तसरस्तटे॥46॥

सारसाद्यैर्युतं दीर्घं मणिसोपान शोभितम्।
इदं सास्तैलयेन पुत्रकामनया कृतम्॥47॥
तत्रैव शिवलिङ्गश्च स्थापितं तेन भूभृता।
विद्योततेऽद्याऽपि तत्र चायूयणस्य स्मृतिगृहम्॥48॥
अय्यणभ्रातृपुत्रोऽसौ जयसिंहस्य भूभृतः[18]।
दूरट्टपाड़ीं निर्जित्य स्तम्भं कोल्हापुरेऽकरोत्[19]॥49॥
संस्थाप्य कोप्यमाभिख्ये सोमेश्वरनृपो तदा।
श्रुत्वाऽय्यणस्य निधनं कल्याण्यां समुपागतः॥50॥
तस्योद्र्ध्वदैहिकं कृत्यं कारयित्वा विधानतः।
नयवर्तत पूनस्तत्र दानं पात्रे विधाय सः[20]॥51॥
चालुक्यवंशस्य महाप्रभावो
यत्रोत्थिता अय्यणराजवन्नृपाः।
स्वार्थं तिरस्कृत्य कुलाभिवृद्धयै[21],
वनाधिवासः समुपासितो[22] यैः॥52॥

॥इति श्री चालुक्यराज अय्यणवंशचरिते काव्ये
नृपाय्यण वर्णनं नामाष्टमः सर्गः॥

## सन्दर्भ

1. सदैव धर्मशास्त्रेषु पुराणेषु श्रुतीषु च।—क. पुस्तके
2. घोरया च तपस्यया—क. पुस्तके
3. विलसत्यधुनाप्यत्र तद्वंशीयाः स बान्धवाः—ग, पुस्तके
4. सांऽयं विरह अभीहरानामक पुस्तके।
5. तस्मिन् ग्रन्थेऽप्युल्लिखितं—क. पुस्तके
6. कीर्तिमत्वन्च वर्णितम्—ग. पुस्तके
7. वर्णिताऽत्र सुविस्तृतः—ख.पुस्तके
8. वैमातृकस्यानुजस्य—ख. पुस्तके
9. राज्यं ज्ञात्वा लोलुपत्वं—क. पुस्तके
10. पूर्णं राज्यं ददौ तस्मै समुद्र इव धैर्यतः।—ग. पुस्तके
11. आसीदित्यादि वर्णितम्—ग. पुस्तके
12. नाम्ना कानीयारदेवस्तृतीयो बहु सुन्दरः—क. पुस्तके
13. देवयुक् नरसिंहाऽभूच्चतुर्थः सूनुरुत्तमः—ग. पुस्तके
14. न्यवसन्मुदा—ख. पुस्तके
15. आध्यात्मिकायां चर्चायां धार्मिकानुयायिकादिभिः।
    साधुना सह कालोऽस्यागचछदानन्ददायकः॥—ग. पुस्तके
16. तदानीं सहसा शम्भुरुच्चराघोषयत् भृशम्—क. पुस्तके

17. एवमु कत्वा योगिराट् स—ग. पुस्तके
18. जयसिंहाऽव्यणभ्रातुः पुत्रः सोमेश्वरो नृपाः।—ग. पुस्तके
19. पुनः—ग. पुस्तके
20. यथोप्सितम्—क. पुस्तके
21. कुलाभिवृद्धये—क. पुस्तके
22. समुत्तीर्णतां यैः—ग. पुस्तके

# ॥अथ नवमः सर्गः॥

अय्यणस्य ज्येश्ठपुत्रश्चन्द्रदेवः सुरूपवान्।
नैसर्गिकगुणैः स्वीयैरक्कादेवीं तुतोष सः॥1॥
अक्कापुत्रः सोमेदेवो राजा भानुङ्गलस्य च।
वनवारस्य निजया मात्राऽऽज्ञप्तो निजां सुताम्॥2॥
नाम्नारूपमतीं प्रादाद्विवाहे सद्गुणान्विताम्।
चन्द्रदेवाय ग्रामैश्च कोंकणस्थैः धनैः सह॥3॥
चांदवाउस्य दुर्गेऽपि स्वामित्वं तस्य कारितम्।
तेनाऽयं चन्द्रदेवोऽपि राजपुत्र समोऽभवत्॥4॥
पूर्वमासीद्धि दुर्गोऽयं चन्द्रादित्यस्य सन्निधौ।
ज्येष्ठ पुत्रस्य धीरस्य राज्ञः श्री पुलकेशिनः॥5॥
जीर्णोद्वारं चन्द्रदेवस्तस्य दुर्गस्य चाऽकरोत्।
तत्रैव न्यवसत्साधं दाराभिः प्रीतमानसाः॥6॥
द्वितीयोऽप्याइकः सूनुः सूवीप्रान्ते समागमत्।
धारवाडसमीपे तु प्रान्तोऽयं विश्रुतो भुवि॥7॥
तैलपेन पुरी सूवी प्रान्तोऽयं गंगवशजात्।
राष्ट्रौढनृपसामन्तात् जित्वायत्तं कृतं स्वकम्[2]॥8॥
तत अय्याइको वीरः दुधोगिर्यामुवास च।
बंकीदेव कृते तस्मिन् बंकापुर[3] उवास सः॥9॥
तृतीयोऽयं कतीयार–देवः सेंदकमातुलात्।
सेनानन्दकुलोत्पन्नात् स महामण्डलेश्वरात्॥10॥
साममगढ़[4] दुर्गं सं. नेरूराभिख्यमेव च।
ग्रामसप्तति संयुक्तं लब्धवान् कोंकणे तदा॥11॥
तत्रैव भूदरगढं प्राप्तं यन्निर्मितं[5] पुरा।
भूदेवेनाब्धिचन्द्रेभे शके वर्षे स्वनामतः॥12॥

सेलारान्वयजातेन भोजदेवेन भूभृता।
जीर्णोद्धारं कृतं तस्य पक्षदुर्गाधिपो हि[6] सः॥13॥
पश्चाच्चेषु शशीभूमिचन्द्र वर्षेषु भूमिपः[7]।
कन्योद्वाहे तु भोजोऽसौ कामदेवाय दत्तवान्[8]॥14॥
बंकिदेवापराख्याय चालुक्याय महात्मने।
ततः प्रभृति तद्वंशे दुर्गे स्वामित्वनिश्चितम्[9]॥15॥
अष्टादश शताब्यन्तं शाकवत्सरमानतः।
चालुक्यगोत्रतां कीर्तिं स्फालयन् दिक्षु सर्वतः॥16॥
चतुर्थो नरसूदेवो शिंद्दियामात्यतां गतः।
पहन्कुट्यां च गोकाग्रे नामके परके तथा॥17॥
अन्यत्र च बहून् ग्रामान् नीत्या धर्मेण चस्वयम्।
शशास शिंद्दिया प्रीत्यै तस्य सख्यत्वमागतः॥18॥
ज्येश्ठस्य सूनोर्भुवि चाय्यणस्य श्रीचन्द्रदेवस्य बभूव पुत्रः।
नाम्ना प्रसिद्धो हरपालदेवो यः कोंकणे स्वां वसतिंचकार॥9॥
सोमेश्वर तृतीयस्य पश्चाद्ये समुपागताः।
त्रयोधिकारिणस्ते तु निर्बला राज्य कर्मणि॥20॥
अतो विजल्लासंज्ञेन सेनापत्यं प्रकुर्वता।
कालाचुरीन् राजपूतवंशस्याऽऽदि नृपेण वै॥21॥
नन्दरामाक्षिचन्द्राख्ये शाके तत्र स्वराज्यकम्।
कल्याण्यां स्थापितं किन्तु कर्मणा[10] दुर्गति ध्रुवा॥22॥
लिङ्गायतस्तु बसवा यस्य पद्मावतीं मुदा।
भगिनीं पश्चोदवहत् विजल्ला सैन्यपालकः॥23॥
तं तु विषप्रयोगेणाऽऽवुतं स जघान हि।
स पुनर्यादवे नाऽभूत् वल्लालेन विमर्दितः॥24॥
प्राणदण्डेन दुष्टात्मा दण्डितस्तस्य चाऽऽसनम्।
गृहीतं तेन सम्भिद्य कालचूरीयशासनम्॥25॥
एतस्मिंस्तु विपत्काले तृतीयस्तैलपो नृपः।
आश्रये हरपालस्य कोंकणे न्यवसच्चिरम्॥26॥
अग्रेनुपस्तैलपस्य पुत्रः सोमेश्वरेण च।
कल्याण्यां स्थापितं राज्यं नतुत त्स्थिरतां गतम्॥27॥
होसालैर्वादवैस्तन्तु बाणाब्धयक्षिचन्द्रके।
शके विनाशितं राज्यं कल्याण्यां स्थापितं तु तत्॥28॥
गोविन्दो हरपालस्य सुनुर्मतिमती[11] वरः।
द्वितीयः सोमदेवश्च राज्यभ्रंशस्तयोः पुरः॥29॥

तेनैतपोर्महद्धानिर्जाता क्लेशविडम्बना।
सम्बन्धिन्श्च तेषां ये सर्वऽपि बहुपीडिताः॥30॥
सेलारवंश सम्बन्धात् कदम्बान्वय संगमात्।
रुद्रदेवः सोमपुत्रः कोंकणे स्थितिमाप्तवान्॥31॥
परन्तु तत्र जातेषु कहलेषु पुनः पुनः।
एतद्वंशीय सम्बन्धमनुकल्प्य विपक्षिभिः॥32॥
न पुनस्ते स्वकं राज्यं स्थापयेयुर्धियै तया।
सुदृढाभावुका बालाः त्रिचतुः पुरुषं क्रमात्॥33॥
एतद्वंश्याघातितास्ते निर्दयैम्रिषमात्रतः।
सुधिया चाय्यणराजेन नीत्या[12] च गुरुपार्श्वतः॥34॥
राज्यं संस्थाप्य कल्याण्यां[13] पारम्पर्यं कुलस्य च।
आशीवादैस्तु सम्प्राप्तमासीदिति विनिश्चितम्॥35॥
तेनैवैतद् वंशपुत्राः प्राणसंरक्षणाय हि[14]।
सम्बन्धिशरणं गत्वा तेऽकुर्वन् नात्मरक्षणम्[15]॥36॥
तस्मात्तेषामकुप्यायाः कुप्याः सम्पत्तयः[16] समाः।
विनष्टाबंधुशरणे प्राणरक्षेषुणां तदा॥37॥
वेटुंगीत्य पराख्येन प्रपौत्रेणाऽय्यणस्य च।
गोविन्देनाऽय्यणकृता नाविष्कारांश्च ज्योतिषे॥38॥
काशीस्थ पण्डितैस्तेस्तु संस्कृतेऽनूहादर्शिताः।
विद्वद्भक्तो दान शौण्डोऽप्यं दुष्टैर्निपातितः॥39॥
एतद्वंश्यो वंकिदेवो बंकापुरमुवास सः।
तत्पुत्रश्चन्द्रदेवोऽसौ धार्मिको नीतिमान् सुधीः॥40॥
युवावस्थां गतः सद्योद्यातितोऽनीति तत्परैः।
चन्द्रदेवस्य मातासीच्चन्द्रदेवीति नामिका॥41॥
सिंहे वंशगता कन्या जाता तारगले पुरे।
तस्यात्तु चांदवाङ श्री वेलग्रामस्य भूभृता॥42॥
पूर्वं जितः पुनर्यातो वंशोऽस्मिन्दानपोगतः।
चन्द्रदेवस्य सविधे स्नेहसम्बन्धकारणात्॥43॥
तत्पुत्रः कामदेवोऽभूत् कल्याण्याधिपतिः शुभः[18]।
चालुक्यकुलाजानां च कीर्तिं सम्वर्द्धयन् मुदा॥44॥
सोमेश्वरस्तस्य पुत्रो कर्णदेवान्यनामकः।
कृत्वाप्रबंधं सम्पत्तेः धर्मतो नीतिः सदा॥45॥
शिंदाख्येयु शुभे वंशे चैलबुर्गयुते नुते।
श्रिया देव्या समं जातं प्रसिद्धं पाणिपीडनम्॥46॥

देवगिर्यां महादेवो नृपः कोंकणमण्डले।
यादवान्वयजातस्तु चर्कर्त्याक्रमणं भृशम्॥47॥
राज्यत्रयस्य साहाय्याच्छेष्ठ भूमिधृतां बलात्॥48॥
रसवेदाग्नि चन्द्राख्ये शके तं समुपाद्रवत्।
परं दृष्ट्वा बलं घोरं स्वसामर्थ्यं विचार्य सः॥49॥
सर्वैः[21] सम्बन्धिभिर्वीरैः रक्षार्थं स्वकुलस्य च॥
पोतेन गोवानगरेगच्छ न् दुर्भाग्यप्रेरितः॥50॥
सर्वैः सहैवाऽब्धिजले मग्नः पोतस्य भ्रंशतः।
यादवस्तु महादेवो वीरो वीरप्रियो मुदा॥51॥
तत्पराक्रममालोक्य नृपो गणपतिस्पुनः।
राज्ये स्वस्त्रीं तु संस्थाप्य स निर्भीक इवाऽचरत्॥52॥
एवं मालव राजोऽपि संस्थाप्यात्ममासने।
स्वराज्यरक्षणेजातः सफलङ्कथ्यते बुधैः॥53॥
पुत्रहीनो गणपतिस्तस्माद्भीत्या पलाय्य च।
वारंगले राजधानीं स्वकीयां स तु निर्ममे॥54॥
गणयाम्बा च रुद्राम्बा कन्ये द्वे तस्य शोभने।
गिर्यग्निरामाब्जमिते रुद्राम्बा शासिकाऽभवत्[22]॥55॥
चालुक्य कुलभूतेन वीरभद्रेश्वरेण सा।
सोमेश्वरस्याऽनुजेन वीरेण च विवाहिता॥56॥
पूर्वजानां वचः स्मृत्वावीरभद्रेश्वरः सुधीः।
राज्यसिंहासने स्थातुं नितान्तं विमुखोऽभवत्॥57॥
वारंगलस्य राज्ञा च मुहुरभ्यर्थितोऽपि सः।
न तद्वन्तकसूनुत्वं स्वीचकार जितेन्द्रियः॥58॥
अतः स्त्री तस्य रुद्राम्बा रुद्रदेवेति संज्ञया।
चकार सफलं राज्यं कार्यं भर्त्राऽनुमोदिता॥59॥
देवगिर्या यादवस्य पश्चात् सिंहण भूपतेः॥
जैतुंगिनो द्वितीस्य राज्यमासीत्सुविस्कृतम्॥60॥
कनिष्ठस्तस्य पुत्रोऽयं शाङ्‍र्गपाणीति विश्रुतः।
राज्यं चकार मतिमान् स्वपितृव्वस्य धर्मतः॥61॥
ज्येश्ठ भ्रातुः कृष्णेन महादेव युतेन च।
शाङ्‍र्गपाणी राज्याकार्याद्वलादेवपृथक्कृतम्॥62॥
शाङ्‍र्गपाणी राज्यहीनो वीरभद्रेश्वराश्रये॥
प्राप्तवान् तत्प्रभावेण राज्यं पानुङ्गले तदा॥63॥

तेन क्रुद्धो महादेवा यादवो सन्तताक्रमैः।
नन्दरामाग्निचन्द्राङ्के रुद्राम्बामजयच्छके॥64॥
रुद्राम्बा तेन सन्तप्ता विपद्दावानले[23] खरे।
राज्यहीना महद्दुःखमन्वभूत्तदनन्तरम्॥65॥
मुम्मदाम्बा तु रुद्राम्बा कन्या या च विवाहिता।
देवगिर्याः शासकेन पुत्रमेकमजीजनत्॥66॥
प्रतापरुद नामानं तं सा दत्तविधानतः।
जग्राह राज्य भारार्थं स्वरक्षायै च दुःखिता॥67॥
रुद्राम्बया राज्यकाले धर्म्याणि विविधानि च।
सम्पादितानि कार्याणि विश्रुतानि समन्ततः॥68॥
नरेन्द्रदेवः संज्ञोऽभूद्बाधदेवान्य नामकः।
भ्राता सोमेश्वरस्याऽयं कनिष्ठोऽमितविक्रमः॥69॥
तस्य पुत्रत्रयन्चा भून्नीति धर्मविशारदम्।
प्रथमो मङ्गुदेवाऽऽसीदन्यो केशवदेवकः॥70॥
तृतीयः कामदेवा यत् स पौत्रो कामदेवकः।
पद्ममालां विदाहेन स्वीचकार कदम्बजाम्॥71॥
दुःखान्यनेकान्यपि तेऽनुभूय न राज्यलोभं दधिरे चुलुक्यजाः।
स्वपूर्वजानां व्रतमेतदद्भुतमपालयन्विघ्नशतैरुपाहताः॥72॥

॥इति श्री चालुक्यराजअय्यणवंशचरिते काव्ये महाप्रतापिन्या रुद्राम्बयाप्रतापरुद्रचालुक्यनाम दत्तकपुत्र ग्रहणवर्णनं नाम नवमः सर्गः॥

## सन्दर्भ

1. दुर्गोऽयमासीत्पूर्वं तु—क. पस्तके
2. राष्ट्रौढसामन्तनृपात् पन्चालाद्विजितोऽभवत्।—क. पुस्तके
3. पश्चाद् बंकीदेवकृतं बंकापुरमुपागतम्—ख. पुस्तकं
4. दुर्गं व सामगढ़—ख. पुस्तके
5. यां निर्मितः—ग. पुस्तके
6. जीर्णोद्धारः कृतस्य पक्षुदर्गाधिपेन च।—ग. पुस्तकं
7. पश्चाद्द्वादशीभूमिचन्द्रेशाके स दुर्गकः—ग. पुस्तके
8. चार्पितः—क. पुस्तकं
9. दुर्गोऽयं समुपस्थितः—क. पुस्तकं
10. दुष्कर्मात्—ग. पुस्तक
11. हरपालस्य कर्णदेवान्याख्यस्य पुत्रकः।
    गोविन्दो वेटुंगीदेवान्याख्यस्य च बुद्धिमान्॥—क. पुस्तके
12. दूर दृष्टा चाय्यणोनात एव—क. पुस्तके

13. राज्यमस्थाप्य—क. पुस्तके

14. वै—क. पुस्तके

15. अकुर्वन् स्व प्राणरक्षणम्—क. पुस्तके

16. तस्मात्तेषां स्थावराश्च चलाः सम्पत्तयस्तथा—ग. पुस्तके

17. पण्डितद्वारा—क. पुस्तके

18. तत्पुत्रः कामदेवोस्तु हियार्यावान् सुलक्षणः।—क. पुस्तके

19. ततस्तु महिमाशाली मण्डलेश्वरतां गतः।
शिंदासंज्ञे चैलवुर्ग वंशे सन्जातया तया॥47॥

20. जातस्तु सिरियादेव्या विवाहोऽस्य व कुलश्रिया।
महादेवो देवगिरी नृपस्तु खलु कोंकणे॥
यादवाचयसंजातस्तमाक्रम्यद्यदा तदा॥—ग. पुस्तके

21. सर्व—क. पुस्तके

22. स्वासनेऽकरोत्—क. पुस्तके

23. रुद्राम्बा तेन पतिता महादापत्तिसागरे।—क. पुस्तके

# ॥अथ दशमः सर्गः॥

सोमेश्वरस्य पुत्रोऽत्रौ कामदेवान्यनामकः।
वङ्किदेवः प्रसिद्धोऽभूच्चालुक्य कुलभूषणः॥1॥
कामदेवस्य पुत्रस्य वीरस्य कुशलस्य च।
सु पुरन्दरायस्य पुत्रीं जग्राह पाणिना॥2॥
कदम्बवंशशाखायां सैवासीदधिकारिणी।
तस्माद्ग्रामाविशिष्टाश्च विवाहे लब्धवानसौ॥3॥
स्वचातुर्यात्स महामण्डलेश्वरतां गतः।
पूर्वपत्नी तु कमला देवी गोवा नृपस्य वै॥4॥
सा त्रिभुवनमल्लस्य कदम्बान्वय कन्यका।
षष्ठदेव द्वितीयस्य भगिनी धार्मिकस्य च॥5॥
षष्ठदेवस्य सन्तानराहित्यादियमेव हि।
गोवाराज्यस्य पूर्णस्य तदाऽऽसीदधिकारिणी॥6॥
गोवाऽऽसीदि नेत्राग्नि चन्द्रान्तं तत्प्रशासने[2]।
शकेऽनन्तरमेतत्सिद्धराज्यं तु यादवैर्हृतम्॥7॥
तथाऽपि बहुसम्पत्तिं तत्सम्बन्धादवाप्तवान्।
सावराजङ्गमात्रेति तेन सुस्थो बभूव सः॥8॥
भार्याद्वितीया सह्याद्रे भोजस्य तनुजा शुभा।
सेलारवंशजातस्य वीरस्य गुणगुम्फिता॥9॥
कोंकणे भूडरगढ प्राप्तं संग्राम पन्चकम्।
विवाहेऽस्मिन्तेन राज्यं द्वितीयायाः प्रभावतः॥10॥
मण्डलेश्वरतां यातो लब्धा च विरुदावलिः।
कल्याणीश्वराधिपति नृपोऽभूद्मानवर्धनः[3]॥11॥
कृपया स्वपितु र्व्यस्य वीरभद्रेश्वरस्य च।
प्रतापरुद्र नाम्ना तत्सूनूना दत्तकेन वै॥12॥

कल्याणी परितो ग्रामाः स्ववंशीयेति बुद्धितः।
बंकिदेवं महत्प्रेम्णोपभोर्थं समर्पिताः॥13॥
मुख्यचालुक्यवंशीय इति कर्नाटकेऽत्रि च।
कोंकणे च महानासीत्प्रभावस्तस्य सर्वतः॥14॥
तत्पुत्रस्तु हरीपालो रामदेव सुतां शुभाम्।
व्यवहरच्छास्य[4] विधिना यादवान्वय सम्भवाम्॥15॥
भगिनी यादवस्याय शंकरस्य गुणान्विता।
अभ्राङ्करामचन्द्राख्ये शके देवगढे तु सः॥16॥
माल्लिक्कफूटनाम्ना[5] च शंकरो घातितः क्रुधा।
अनवाप्यकरं दिल्याः सुल्तानस्य पूर्ववत्॥17॥
रामदेवस्य जामात्रा यादवानान्च भक्तितः।
रक्षितं हरपालेन तद्राज्यं नीति सम्पदा॥18॥
गर्जुरेशः[6] कर्णदेवश्चालुक्यान्वयस्म्भवः।
इष्वद्रिरामचन्द्राख्ये शके युद्धे पराजितः॥19॥
अलाउद्दीननाम्ना यत् स तस्मात्संपलाय्य च।
देवगिर्यां रामदेवाश्रये शान्ति ललाभ वै॥20॥
नान्दूर वारे ग्रामाश्च लब्धाः कल्याणिसन्निधौ।
रामदेवात्ततस्मोऽथ तत्रैव न्यवसन्मुदा॥21॥
रामदेवस्य जामात्रा हरपालेन भक्तितः।
स्ववंशीय[7] इति प्रेम्णा व्यवहारः कृतस्तदा॥22॥
परन्तु भाविनी पत्नी दिल्लयां नीता तदा क्रुधा।
कमला नामिका तेन न दत्तः खणुनी करः॥23॥
तस्माद्देवा भवज्जन्यं कर्णदेवाऽत्रिनाशितः।
इन्द्रङ्करामचन्द्राख्ये शंकरोऽपि विनाशितः॥24॥
मलिकूनजीवो[8] यद्दिल्यामलाउद्दीन सम्मतः।
गतस्तदा देवगिर्यां राज्यस्यांशं प्रगृह्य च॥25॥
हर पालेन स्वं राज्यं वर्द्धितं स्थापितं च तत्।
स्वस्त्री नाम्ना[9] तदा कर्णदेवपुत्रस्तु बालकः॥26॥
नाम्नाहरणदेवश्च तत्रैवासीद् सुरक्षितः।
भ्राताश्री कर्णदेवस्याऽऽप्यासीत्सौभाग्यदेवकः॥27॥
दक्षिणे भारते यो हि[10] सोमदेव इति स्मृतः।
हरपालस्थापितं तद्राज्यं नैव चिरं स्थितम्॥28॥
मुबारको[11] महावीरो दिल्लीशो[12] भूत्तदन्तरे।
महता सैन्यभारेण स दक्षिणमुपाद्रवत्॥29॥

हरपालो वर्षषड्कैरपितद्राज्य गोपनेः।
असमर्थोऽवत्तत्र मुबारकवलार्दितः॥30॥
प्रतिज्ञातन्च साहाय्यमप्राप्यनिजमित्रतः।
संघातितः शिखानष्टैर्दुर्दशामनुभाव्य च॥31॥
चन्द्राङ्काग्निचन्द्राख्ये[13] शके तुष्टैस्तुतच्छिरः।
मुख्यद्वारे देवगिर्या दुर्गे लम्बितमन्ततः[14]॥32॥
तस्य पुत्रास्यस्त्वासन् देवो नारायणे[15] बली।
वीरदेवः शक्तिदेवो रक्षिताः कथमप्यमी॥33॥
सौभाग्यदेवयत्नेन ग्रामे येन च कोंकणे।
व्याघ्रदेवस्य सून्वोस्तु मङ्गकेशवदेवयोः॥34॥
सविद्ये स्थापिताश्चैते तेन तेषां तयोस्तथा[16]।
सम्बन्धः सुदृढो जातः कौटुम्बीयत्वमागतम्॥35॥
पूर्वं सौभाग्यदेवस्तु हरपालेन योजितः।
रक्षणाय स्वपुत्राणां ग्रामान्दत्वा तु भूरिशः[17]॥36॥
स्थित्वा नारायणो देवः कल्याण्यां च तहन्तिकान्।
ग्रामान् संस्थापयासमास प्रबन्धे स्वे स्वबुद्धितः॥37॥
वीरदेवः कोंकणे च स्वीयान्कर्नाटके तथा।
भ्रात्राश्री शक्तिदेवेन सह ग्रामान् ररक्ष च॥38॥
समयेऽस्मिन्महानासीद्हाहाकारस्तु दक्षिणे।
स्थानं प्रथमं तत्र जातं राज्यस्य पापिनाम्॥39॥
भयाक्रान्तोऽभवद्देशः18 स्वार्थान्धैः समुपस्थितैः।
हिन्दूनां घातनं तेषां धर्मस्य परिवर्तनाम्॥40॥
होसालकाकटीपानां पाण्ड्य यादवभूभृताम्।
सुसमृद्धानि राज्यानि नष्टानि कलहान्मिथः॥41॥
हिन्दूनां नाशनैस्तेषा धनराज्यादि लुण्ठनैः।
व्यवस्थारहितैर्रक्तपातैर्दक्षिणमङ्कितम्॥42॥
देवो नारायणो दृष्ट्वा दशां चिन्तासमन्वितः[19]।
अलाउद्दीनबम्हन[20] शाहस्य पक्षतां गतः॥43॥
खिल्जीवंश विनाशे तु गयासुद्दीन तुग्लकः।
दिल्यां संस्थापयामास राज्यं दोर्दण्डशक्तितः॥44॥
तस्मिन्काले तुग्लकोऽसौ मोहम्मद इति श्रुतः।
प्रायततूस्थापने[21] राज्यं स्वीयं नूत्नं तु दक्षिणे॥45॥
तदा ह्यासन्दक्षिणे तु राज्यानितु बहूनि[22] च।
परस्परं विरुद्धानि स्वार्थसिद्धि पराणि च॥46॥

तत्रैव तेषु श्रीवीर-वल्लालेन स्वकीयकम्।
द्वारावती पुरी मध्ये स्थापितं राज्यमल्पकम्॥47॥
अलाउद्दीन बम्हन्नशाहस्योल्लङ्घ्य[23] शासनम्।
एवं च काकंतीयेनकन्हैया नायकेन च॥48॥
तेलङ्गानां राज्यभोक्त्रा न तच्छासनमीप्सितम्।
शके इमाक्षवेदाब्जे अलाउद्दीन[24] हासनः॥49॥
नाम बम्हनशाहस्य धृत्वा स्वीयं स्वतन्त्रकम्।
राज्यं संस्थापयामास दक्षिणे विप्लवान्विते॥50॥
एकादशाब्दपर्यन्तमयुद्ध्यद्धिन्दुभूमिपैः।
स्वसत्तास्थापनार्थन्च तत्सेनापतिना तदा।॥51॥
खानकम्बरनाम्ना सा ह्याक्रान्ताकल्याणिकीपुरी[25]।
कन्हैय्यानायकेनात्र साहा1यं च समर्पितम्॥52॥
नारायणः स्वभ्रातृभ्यां वीरदेवेन विक्रमात्।
शक्तिदेवेन च वलाद्रुद्धोऽसौ समराङ्गणे॥53॥
पन्चाशद्दिवसान्यावद्धोरं युद्धं बभूव[26] तत्।
खानकम्बराम्ना तु जितं कल्याणदुर्गकम्॥54॥
कन्हैय्यानायकोप्यन्ते पश्चात्तेन पराजितः।
यो मित्रं संत्यजेत्धोरे तस्य नाशो भद्रेद्ध्रुवम्॥55॥
कल्याणीदुर्गगमनाच्चालुक्यकुलभूषणः।
देवो नारायणो देशे महद्दुःखमवाप्तवान्[27]॥56॥
कृष्णाघटप्रभान्योर्मध्यस्थैः स्वीयबान्धवैः।
परमृश्य महीनुद्दीननवावं[28] स्वदलेऽकरोत्॥57॥
महीनुद्दीन नवाबस्य ग्रामाः प्रान्ताश्च शासनम्।
तत्रैवासीद् सुविस्तीर्णं कल्याण्याश्च समन्तमः॥58॥
तेन बम्हनशाहस्य विद्रोहस्तु प्रचारितः।
श्रुत्वैतत्तेन शाहेन गुलवर्गाम चोदितौ॥59॥
ख्वाजा जहानमिरजा मुन्दारो बलमास्थितः[29]।
कुतुबुलूमुल्लकनामा च विद्रोहद्रावणाच[30] च॥60॥
श्रीनारायणदेवस्य कम्बारीदुर्गकं प्रति।
प्रेषिते सैन्यके ख्वाजा जहानो द्रोहमन्वभूत्॥61॥
मोहम्मदस्ज्ञतुगल्कस्तु मृतः संश्रुत्य सर्वतः।
विद्रोहाः प्रसृताआसन् सहसा दक्षिणापथे॥62॥
तस्मिन्नेव च काले स सागराद्भूमिविक्रमः।
शीघ्रं ब्रह्मन शाहोऽपि सैन्येन महता युताः॥63॥

विद्रोहिणां विनाशार्थं सहसा समुपाद्रवत्।
कलाबगूरं मूघोलं कामवासिन्च लब्धवान्॥64॥
संधाय च फुस्तेन कार्यसिद्धौ[31] हि बुद्धिमान्।
कल्याण्या अधिकारश्च ग्रामान्यानेक संख्यकान्॥65॥
तद्भ्रातृभ्यश्च तस्मै च दत्वाध्येयमपूरयत्।
ज्ञात्वाविरोधं कल्याण्याः कोहीरस्य बलस्य च॥66॥
नारायणात्प्रसन्नोऽसौ वीरदेवं बलन्वितम्।
शक्तिदेवं स्वसैन्येतु, रावस्य चानयत्॥67॥
कोहीरस्य तुकल्याण्यां अधिकाराप्तिकाम्यया[33]।
प्रेषयामास तौ जित्वा चान्यान्विद्रोहिणस्तदा॥68॥
दुर्गद्वयं ततो जित्वा कृतं स्वायत्तमात्मनः[34]।
नारायणस्य वीरस्य शक्तिदेवस्य शासने॥69॥
तदा नारायणो देवः कूटनीतिविशारदः।
स्वस्य वातापिदुर्गस्थं जहौ तं च मुहम्मदम्[35]॥70॥
जीर्णोद्धारेण सुदृढः कृतोऽसौ दूरदर्शिना।
विपरीते हि समायाते[36] सम्भवेदात्मरक्षणम्॥71॥
त्रिचिनापल्लि युद्धे[37] तु वीरवल्लालनामकः।
घातितो रक्षितं राज्यं शुत्रस्तेन मोदितः[38]॥72॥
ओडीया श्रीहरिहरात्प्रीतौऽसौ नीतिकोविदः।
ब्रह्मन्नशाहस्तस्मै तं प्रादात्स्मृत्वा पराक्रमम्॥73॥
गोवावङ्किपुरप्रान्तौ विशालौ तस्य सेवया।
तेन शतिश्च वीरश्च देवौ काठिन्यमागतौ॥74॥
राज्यं ब्रह्मनशाहेन चतुर्भागे विभज्य च।
चत्वारः स्थापितास्तत्र सुनीतिज्ञाः प्रबन्धकाः॥75॥
शैफुद्दीनं घुरीम् कृत्वागुलबर्के प्रशासकम्।
दौलताबाद भागे तु बहरामाख्यखानकम्॥76॥
बरारे सफदर्खानं शैफुद्दीनसुतं पुनः।
हुमायूँ अजमीसंज्ञं वीदरे च न्ययोजयत्॥77॥
एवं विधिविधानेन सुतरां दक्षिणे तदा।
विद्रोहस्तेन नैवासीद् राज्ये तस्य प्रतापिनः॥78॥
पुनर्संवर्धनार्थन्च स्वं राज्यं बहुसेनया।
चचाल कोंकणं गोवां पूर्वं संजित्य शत्रुतः॥79॥
तदुत्तरन्च दाभोलमब्धिमार्गार्थमेव च।
गृहीत्वा हिन्दुराजाश्च दक्षिणस्याः पराजिताः॥80॥

करहारस्य राजा तु मीत्यान्यत्र पलायितः।
कोल्हापुरस्य राज्यन्च विजयी स्ववशेऽकरोत्॥८१॥
जित्वा सर्वान् क्रमाद्वीरो विजयानन्दपूरितः।
गुलबर्गे समायातो म्लेच्छच्चानन्दमाप्नुवम्॥८२॥
तेन चालुक्य वंशस्य ग्रामाः कोंकण संस्थिताः।
बङ्कापुरश्चादम्बाडो गोवा च निर्गताः क्रमात्॥८३॥
वोगीभुजबलौ यौ च39 देवौ पूर्वं शाशास तुः।
चालुक्यकुलजौ वीरौ चिराय स्वबलेन च॥84॥
एतौ नारायणस्यास्तां पितृव्यस्य वीरपुत्रकौ।
तेन नारायणस्याऽभूद् महद्दुःखं विलोक्य तत्॥85॥
शके श्रुत्यग्निवेदाब्जे वत्सरे दैवकोपतः।
पुनस्तत्रऽभवज्जन्यं लोकानां रोमहर्षणम्॥86॥
यस्मिन् गोगी भुजबलौ[10] पुत्रौ युद्धे मृतौ तदा।
तच्छ्रुत्वा कर्णपुत्रस्तु हरणो गुर्जराधिपः॥87॥
यस्य सूनुर्मानकजी महावीरः इति स्मृतः।
यस्यै नारायणदेशाद्देवोभुजबलोमुदा॥88॥
प्रादात्स्वकीयविपुलां[11] सम्पत्तिं प्रेमनिर्भरः।
पुत्रवत्पालयित्वा च सम्बन्धेन[12] तु तेन सः॥89॥
आजगाम च साहाय्यं दातुं चालुक्यवंशजान्।
स्मृत्वा पूर्वोपकारांश्च गुर्जराद् गुर्जराधिपः॥90॥
चालुक्यवीरदेवस्य सुतोगोविन्ददेवकः।
य आसीत्कोंकणे वीरो बुद्धिमान् मण्डलेश्वरः॥91॥
सर्वे सम्बन्धिनस्तस्य मिलित्वा प्रेमभावतः।
चालुक्यकुलरक्षार्थं सम्मानात्तत्कुलस्यच॥92॥
कोङ्कणाद्द्रावयामासुर्ब्रह्मनस्य सुविस्तृताम्।
चतुरङ्गवलोपेतां पृतनां शक्तिशालिनीम्॥93॥
बगलानानरेशस्य मानसिंहस्य वाक्यतः।
सन्धाय बम्हनो नारायणदेवं महाबलम्॥94॥
कर्णपुत्रं तु हरणं स्वाश्रये गुर्जराधिपम्।
स्वीकृत्य नवसार्यश्च रोगाक्रान्तो बभूव ह॥95॥
प्रत्यावर्तते तेनाऽसौ गुलवर्गे झटियथ।
इभेशेक्षणवेदाब्जे शके वर्षे दिवंगतः॥96॥

धृतिन्च शक्तिं कुलजां समुज्वलां दधन्त एते चुलुकान्वयोद्भवाः।
आपन्नकालेऽपि राज्यमन्तरा, सुनीतिमार्गेण ररक्षुरात्मनः॥97॥

॥इति श्री चालुक्यराजअय्यणवंशचरिते काव्ये चालुक्यवंशीय नारायणदेव वीरदेवशक्तिदेव गोगीदेवादि वर्णनम् नाम दशमः सर्गः॥

## सन्दर्भ

1. स—क. पुस्तके
2. तस्य शासने—ग. पुस्तके
3. तेनकल्याणीश्वराधिरतिरित्यन्तमानदा—क. पुस्तके
4. व्यवहरन्तत्र—ग. पुस्तके
5. मलिक् कफूरो हि दिल्लीसुलतानस्य सेनानायकः मराज्यकरग्रहणप्रसङ्गमवलम्ब्य यादवेन्द्रस्य रामदेवस्य सुतं चालुक्यवंशीयस्य हरपालस्य श्यालकं शङ्करदेव 1390 शके वर्षे प्राणदण्डेनादण्डयत्।
6. गुर्जरषः—क. पुस्तके
7. स्ववंशीरिति—ग. पुस्तके
8. दिल्लीराजधान्या अधिपतेरलाउद्दीनस्य सम्मतः कार्यवाहको मलिकूनजीबो हि देवगिरिमाक्रमत्, तत्र स 1391 शके वर्षे कर्धदेवं हत्वा देवगिरिराज्यभगमेकं प्रागृहीत्। एवं करप्रसङ्गमवलम्ब्य शङ्करदेवः यादवानां कुलदीपकस्तथा च चालुक्यः कणदेवः द्वावति दिल्ली सुल्तानेन नाशितौ—
9. स्वस्त्रिनाम्ना—क. पुस्तके
10. यस्य—ग. पुसतके
11. दिल्लीऽसौ—क. पुस्तके
12. 1391 शकसंवत्सरस्य सविध एव मुबारको हि दिललीराजधान्यमाधीशोऽभवत्। स हि दक्षिणं भारतं महत्सा सैन्य शक्त्योपद्रव्य हरपालस्य दुर्दशां कृत्वा तस्य शिरश्छित्वा देवगिरिदुर्गद्धारमवालम्बयत्।
13. रसाङ्कराम चन्द्राख्ये—समीचीनं स्यात्—क. पुस्तके
14. मन्त्रितः—क. पुस्तके
15. तस्य पुत्रास्त्रयो नारायणदेवस्तु ज्येष्ठकः—ग. पुस्तके
16. सह—ख. पुस्तके
17. भूरिषः—ग. पुस्तके
18. क्रन्तियुक्तो—ग. पुस्तके
19. अस्मिन्नवसरे नारायणदेवोऽतिचिन्तितः—ग. पुस्तके
20. 1428 शकवर्षस्य सविधेऽयमलाउद्दीनब्रह्मनशाहो हि दक्षिणे भारते शक्तिसम्पन्नो भूत्वा राज्यं संस्थापयामास।
21. प्रायतस्थापने—क. पुस्तके
22. स्वल्पकानि च—क. पुस्तके
23. अलाउद्दीनबम्हननसाह—ग. पुस्तके
24. 1428 शके वर्षे अलाउद्दीनहसनो हि शक्तिमानूनाक्रान्तासीत्। कम्बरखानो हि अस्य सेनापतिरासीत्।
25. चाऽऽकान्ता—क. पुस्तके
26. ह—ग. पुस्तके

27. नारायणो देव इति सुमहद्दुःखमाप्तवान्।—ग. पुस्तकं
28. महीनुद्दीननबाबनाया तुरुषको हि कल्याण्याः परितो ग्रामान् विजित्य नवाबविसदभूपितः 1428 शकवर्षाणां निकटे शासक आसीत्। ख्वाजा जहान् मिर्जामुन्दारो हि अलाउद्दीनब्रह्मनशाहस्य सेनानायकः, स महाबलशाली वीरो विक्रान्तश्चासीत्।
29. ख्वाजा जहानो मिरजान्मुंदागीतः सुसैन्यवान्—
30. द्रावणार्थकम्—ग. पुस्तकं
कुतुबुल्मन्को हि अलाउद्दीनब्रह्मनशाहस्य सेनानायक एवासीत्
31. सन्धाय च पुनर्नारायणदेवेन बुद्धिमान्।
32. तथैव च—क. पुस्तकं
33. कोहीरस्य तु कल्याण्याऽधिकारग्रहाय च—क. पुस्तकं
34. दुर्गद्वयं तद्विजितं तदा प्रभृति चागतम्—ग. पुस्तकं
35. तदा तेन मुदा नारायणदेवे धीमता।
स्वस्य वातापिस्थं दुर्गे मुहम्मदविनाशिनः॥
36. ये च काले—ग. पुस्तकं
37. त्रिचनापल्लीयुद्धे—क. पुस्तकं
38. शत्रुस्तेन—क. पुस्तकं
त्रिचनापल्लीराज्ये विद्रोहध्वंसनं कृतवा अलाउद्दीनब्रह्मनशाहो राज्यं चतुःषु भागेषु विभज्य तेषु नीतिनिपुणान् शौफद्दनधुरी-वहरामखान-सफ-दरखान—हुमायूं अजमीनायकान् प्रबन्धकान् नियोज्य विद्रोहीविरहितं राज्यं चकार।
अलाउद्दीनब्र ह्मनशाहराज्ये गुलर्बभूभागस्य प्रशासकः शैफुद्दीनधुरी आसीत्।
ब्रह्मनशाहस्यालाउद्दीनस्य दौलताबादप्रान्तस्य प्रबन्धका बहराम खान आसीत्।
अह्मनी राज्ये अलाउद्दीनब्रह्मनशाहस्य बरारप्रान्ते सफदरखानो हिं नियोजितः प्रशासक आसीत्।
वीदरभूभागस्य प्रबन्धतन्त्रं शाहेनालाउद्दीन ब्रह्मनेन स्वसुतस्य हुमायूँ-अजमीनामकस्याधिकारे कृतम्।
39. यांश्च—क. पुस्तके
40. भुजबलपुत्रौ—ग. पुस्तकं
41. स्वकीयां—ख. पुस्तकं
42. च—ग. पुस्तकं

## ॥अथैकादशः सर्गः॥

मोहम्मदो महावीरो मदोन्मत्तोऽभवत्तदा।
चक्रे च स्वर्णमुद्राणां प्रचारः स्वस्य नामतः॥1॥
श्रुत्वा प्रचारं मुद्राणां तुग्लक् मोहम्मदस्य च।
कन्हैयानायको राजा विजयानगरस्य वै॥2॥
बुक्को नृपोऽपि तद्‌धाष्ट्‌र्यं ज्ञात्वा सम्यग्विचार्य च।
क्रोधेन तं दूतमुखात् प्रत्यर्पयितुमग्रतः॥3॥
आदिष्टवन्तौ कौलाशं रायचूरं च सत्वरम्।
अन्यथा तौ समाक्रम्य तं ध्रुवं नाशयिष्यतः॥4॥
मोहम्मदो महाधूर्तः श्रुत्वा सन्देशमेतयोः।
स्वमित्रैः सह सम्मन्त्र्य स्वाभीष्टमनुचिन्तयन्॥5॥
दानमानादिसत्कारैर्दूतं सन्देशवाहकम्।
मासाष्टादशपर्यन्तं संरुध्यनगरे स्वके॥6॥
चकार युद्धसंभारचयनं नीतिकोविदः।
स्वमित्राणि समस्तानि सूचयन्नात्मसम्मतम्॥7॥
दृष्ट्‌वा दूतमनायातं तौ मासाष्टादशावधिः।
कुपितौ तस्य नीत्या च तदाक्रमणमैच्छताम्॥8॥
अयुतद्वयसंख्याकां बुक्कराजाश्ववाहिनीम्।
स्वबलेन च संयुक्तां गृहीत्वा युद्धकोविदः॥9॥
क्रोधेनाऽऽक्राम्यतिस्म स कौलाशं[1] विनायकः।
कन्हैयानायकसुतो देवेतिपदयुक् ततः॥10॥
खवेदवेद चन्द्राख्ये शके युद्धमभून्महत्।
बहादुरखाननाम्ना स तस्मिन् युद्धे पराजितः॥11॥
कन्हैयानायकास्याऽऽसीत्तत्र हा महती क्षतिः।
चालुक्यः शक्तिदेवश्च गोगीदेवश्च भ्रातरौ॥12॥

नारायणस्य देवस्य पुत्रौ तत्सङ्गरेमृतौ[4]।
तेन हिन्दुनृपाणान्तु सम्बन्धः श्लथतां गतः॥13॥
देवो विनायको वीरस्तस्मिन्नेव तु हायने।
प्रस्थितान्[5] च गुलबर्गं बलादारबघोटकान्॥14॥
जग्राह तेन रुष्टोऽभून्मोहमदमहाबलः।
चतुः सहस्रसैन्यैस्तमतिशीघ्रमुपाद्रवत्॥15॥
स्थाने वेलम्पालम्मे वन्दीकृत्य विनायकम्।
रुष्टस्तस्यापशब्देन जिह्वामुत्पाट्य कोपतः॥16॥
दुर्गादधोऽग्निकुण्डे तं सहसाऽपातयत् पुनः।
विनायकस्तत्र वीरो वह्निना भस्मसात्कृतः॥17॥
यदा तस्मात् परावृत्तो मार्गे हिन्दुत्वमानिभिः।
नाशिता पृतना तस्य लुण्ठितं धनधान्यकम्॥18॥
कन्हैयानायको वीरो पुत्रशोकेन दुःखितः।
तद्वैरप्रतिशोधार्थमुपायमकरोत्तदा॥19॥
दौलताबाददुर्गस्य दुर्गपालेन यत्नतः।
खनेन बहिरामेण[1] विद्रोहं समकारयत्॥20॥
तुग्लक्फिरोजदिल्लीशात् साहाय्यन्च ययाच सः।
दिल्लीशान्न परं तत्र साहाय्यं समुपागतम्॥21॥
मोहम्मदः समाक्रामद्वारङ्गलमथान्तरे।
तिलङ्गानाप्रदेशे च स्थित्वा वर्षद्वयं पुनः॥22॥
कन्हैयानायकं सम्यक् पीडयामास यत्नतः।
कन्हैयानायकस्तस्मात् सन्दधे तेन नीतिवित्॥23॥
दत्वासिंहासनं श्रेष्ठं गोलकुण्डप्रदेशकम्।
यत्पुरा निर्मितं दातुं मुहम्मदतुग्लकाय[5] च॥24॥
त्रिसहस्रं हस्तिनान्च हूनान् त्रिदशलक्षकान्।
प्रदर्शयित्वा स्वप्रेम बाह्यतो नैव चान्तरात्॥25॥
रामवेदयुगाब्जे तु शके वर्षे मुहम्मदः।
बहुमूल्यैर्नीलरत्नैर्हीरकाद्यैश्च शोभिते॥26॥
सिंहासने समारुह्य सभां सोत्साहमाह्वयत्।
गायका नृत्यकास्तत्र प्राप्नुवन् तु महद्धनम्॥27॥
ममाज्ञयेति विजयानगराऽऽकरतश्च ते।
इत्याज्ञाप्य महत्प्रीतो रेमे स्वैर्बान्धवैस्तदा॥28॥
विजयानगराधीशो बुक्को ज्ञात्वा स्वचारतः।
आज्ञा सा पालितव्या वा न वेति नृपसत्तमः॥29॥

पूर्वं मनसि निर्धार्याऽमन्त्रयन्मन्त्रिभिः पुनः।
उचितं नैव चैतद्धि मन्त्रिभिः प्रतिपादितम्॥30॥
मोहम्मदस्य बुक्कस्य तेन युद्धमुपस्थितम्।
इषुवेदयुगाब्जेतु वर्षे शाके भयङ्करम्॥31॥
तत्रैव सर्वप्रथमं शिखानष्टैः भयङ्करः।
शतघ्नीनां गोलकानां प्रयोगः सुमहान् कृतः॥32॥
कौथले युद्धभूम्यान्तु हिन्दुभिः प्रथमं कृतम्।
गोलकानलवर्षायां युद्धं तद्रोमहर्षणाम्॥33॥
अभावादश्वसैन्यस्य हिन्दूनां पृतनाभरे।
तद्बलं सुदृढं नाऽसीद्विपक्षदलमर्दने॥34॥
सेनापतिर्मलीनाथो बुक्कस्य गोलिकाहतः।
मृतस्तेन तु तत्सैन्यं सर्वं भीत्या पलायितम्॥35॥
तन्मासत्रयपर्यन्तं बुक्के मोहम्मदोऽन्वगात्।
घातयामास हिन्दूनां बालान् नारीश्च कोपतः॥36॥
विजयानगरं गत्वा बुक्को सन्धिं चकार तत्।
दत्वा धनादिकं सर्वं यथाऽऽज्ञप्तन्च शत्रुणा॥37॥
कोषादादाय विजयानगरस्य बलार्दितः।
महद्दुःखेन सन्तपतस्तेनाऽसौ बहुगर्वितः॥38॥
हिन्दवस्तु चतुर्लक्षसंख्यकाः घातिताः युधि।
येषु चायुतसंख्याकाः बभूवुर्वेदपण्डिताः॥39॥
वीरदेवो महावीरो भ्राता नारायणस्य वै।
हतश्चास्मिन् महायुद्धे चालुक्यान्वयसम्भवः॥40॥
मोहम्मदस्य बुक्केन युद्धे प्रचलिते सति।
दौलताबादसामन्तो खांयुक्तो बहरामकः॥41॥
कोण्डिबादेवतः सम्यग् देवनारायणात्मजात्।
साहाय्यं प्राप्य विद्रोहं चकार बलगर्वितः॥42॥
मोहम्मदविरोधे तु तदकार्यं निवेद्य च।
दिल्लीशाद्याचयामास सहाय्यं न तु लब्धवान्॥43॥
करादानात् सन्चितेन धनेन बहुलेन च।
जगलानानृपाच्चैव साहाय्यं प्राप्य नीतिमान्॥44॥
कोण्डिबादेव भ्रातृणां साहाय्याच्च प्रचोदितः।
एकत्र स महत्सैन्यं कृत्वा मोहम्मदं ययौ॥45॥
प्रतिज्ञातं क्षमादानं मोहम्मदकृतं पुनः।
अविचार्य स दुर्बुद्धिस्तमेव समपीडयत्॥46॥

गृहीत्वा पृतनां स्वीयां पैठणान्तं समागमत्।
मुहम्मदस्तदा क्रुद्धोऽभवद्धाष्ट्रं विचार्य[7] च॥47॥
खानमोहम्मदः सेनापतिर्मोहम्मदस्य च।
शिवगांवसमीपे च सन्तात्समुपाद्रवत्॥48॥
विचार्य धृष्टतां तस्य दण्डाय कृतनिश्चयः
मोहम्मदः स्वयं तत्र सेनया पृष्ठतो ऽगमत्॥49॥
त्यक्त्वा युद्धं तदा[8] भीतो खांयुतो बहरामकः।
जगाम सेनया सार्धं गुर्जरस्य दिशि क्षणात्॥50.
स्ववंशरक्षाकरणैकचिन्ताराज्यप्रलोभाऽनुब्धतमोवियुक्ताः।
चालुक्यवंशीयजनाः समस्ताः धन्या विजाता भुवि वीरपुङ्गवा॥51॥

॥इति श्रीचालुक्यराजाय्यणवंशचरितकाव्ये हिन्दूकदनपूर्वक
चालुक्यवीरदेववधो नाम एकादशः सर्गः॥

## सन्दर्भ

मुहम्मदतुगलकः दिल्लीराजधान्या अधिपतिरभूत्। स हि हठप्रधानस्वभावो राजा भवत्। असावेव दिल्लीं राजधानीं विहाय दौलताबादे राजधानीमकरोत्। अनेन मुहम्मदतुगलकनाम्ना स्वर्णमुद्राः प्रचलिताः ताश्च प्रचलना बहिर्भूताः राजकोषस्य स्वर्णसन्चयमपि च क्षयं गतम्।

1. आशुकौलाशं तु—क. पुस्तके। विजयानगरस्य राज्ञा कन्हैयानायकः 1440 शके वर्षे मुहम्मदतुगलकस्य विरोधं कृत्वा तेन युद्धमकरोत्। अस्मिन् युद्धे कन्हैयानायकस्य महती क्षतिरभवत् तथा च नारायणदेवस्य प्रयन्नाद् हिन्दुराजानां संगठनात्मकं निर्धारितं स्वरूपं शिथिलमभवत्। युद्धेऽस्मिन् नारायणदेवस्य द्वावपि पुत्रौ शक्तिदेवगोगीदेवौ वीराणां गतिं गतौ।
2. पुत्रौ तत्संगरे मृतौ—क. पुस्तके
3. प्रास्थितांश्च—क. पुस्तके
4. वहिरामखा
   अयं स एव बहरामखानो वर्तते यः ह्यलाउद्दीनब्रह्मनीशाहेन दौलतावादस्य प्रबन्धको नियुक्तः। फिरोजशाहतुगलको हि दिल्ली सिंहासनारूढस्तदानीं तुरुष्कशासक आसीत्।
5. महम्मदेन सार्धमपा सन्धिः 1443 शके वर्षेऽभवत्। अस्यां सन्धौ बीजयानरस्याधिपतेर्महती क्षतिरभवत्। यत् सिंहासनं मुहम्मद तुगलकायोपहारीकर्तुं निर्मये तदेव सिंहासनं गोलकुण्डस्य राज्यन्च 1443 वर्षे सन्धौ तस्मै मुहम्मदाय सप्रादात्।
   तुरुष्कसेनया सर्वप्रथममस्मिन्नेव युद्ध 1445 शके वर्शे गोलाबारूदस्य प्रयोगः कृतः।
   मुहम्मदप्रचारितेऽस्मिन् युद्धे 1445 वर्षे नारायणदेवस्य भ्राता वीर देवोऽपि वीरगतिं प्राप्तवान्।
6. नैनत् समुचितमिति—क. पुस्तके
   भारते वर्षे 1445 शके वर्षे मुहम्मदबुक्कयोर्युद्धे तुरुषकैः सर्वप्रथमं शतघ्नीनां प्रयोगः कृतः।
   आततायी तुरुष्को मुहम्मदो 1445 वर्षे बुक्केन सार्धं सन्जाते युद्धे, युद्धस्थस्य तत्परितः स्थितानां ग्रामाणां निवासिनः बालान् वृद्धान् स्त्रींश्च प्रतन्ताड्यामारयत्। अस्मिन् युद्धे चतुर्लक्षहिन्दुजनानां बधोऽभवत्। अत्रिस्मिन् नरसंहारे दशासहस्रसंख्याकाः विद्वांसः पण्डिताश्च मुहम्मदेन घातिताः।
7. तदा क्रुद्धोऽभवन् मोहम्मदोऽसौ तस्य धाष्ट्र्यतः।—क. पुस्तके
   महम्मदखानो हि मुहम्मदस्यसेनापतिः 1445 वर्षे दौलताबादस्य शासकं विद्रोहिणं बहरामखानं प्राद्रवत्।
8. तेन—क. पुस्तके

# ॥अथ द्वादशः सर्ग॥

नृपः श्रीमान् हरिहरो विजयानगरस्य वै।
वेदेभवेद चन्द्राख्ये शके वर्षे दिवङ्गतः॥1॥
तस्य पुत्रो बुक्क इति श्रुत्वा द्विजमुखात्तदा।
स्वर्णकारस्य कन्यायाः सौन्दर्यं परमाद्भुतम्॥2॥
परथालेति नाम्न्याः स ब्राह्मणं तं समादिशात्।
आनेतु स्वावरोधे तां कन्यकां गुणगुम्फिताम्॥3॥
न श्रुतं तत्पितृभ्यां तद्वचस्तेनातिरोषितः।
प्रेषयामास राजासौ[1] सैन्यं दशसहस्रकम्॥4॥
सहस्रपन्चसंख्याकैरश्ववारैर्युतं तदा।
विशिष्टवीरैर्विश्वस्तैः सह युद्धपरायणैः॥5॥
आनेतुं तां मुड्गलात् सुलतानस्य शासनात्।
ताज्जुद्दीनफिरोजस्य ब्रह्मनीराज्यमध्यगात्[2]॥6॥
श्रुत्वैतत्पितरौ तस्या गृहीत्वा तां पलायितौ।
आतस्थानयो[3] तेन कार्यं त्वफलतां गतम्॥7॥
परावर्तनकाले तु ग्रामं ब्रह्मनि[4] राज्यगम्।
लुण्ठितं तस्य सैन्येन रुष्टोऽभूच्च फिरोजकः॥8॥
वेदभभेद चन्द्राख्ये शके वर्षे समाक्रमत्।
विजयानगरं वीरो सैन्यैरद्भुतविक्रमैः॥9॥
युद्धेऽस्मिस्तु फिरोजोऽसौ सव्रणश्च पराजितः।
पुनः सैन्यं समादाय फिरोजश्याप्य[5] नचोदयत्॥
स्वभ्रातुरहमदखानस्याऽऽधिपत्ये लुण्ठनाय च।
अयुतैरश्वभिर्युक्तं[6] प्राप्तं तन्नमराभितः॥11॥
फजुल्लाइंजुनाम्ना च रुद्धं बंकापुरं तदा।
जित्वा च मुड्गलं तेन सीमानिर्धारिता मुदा॥12॥

तुङ्गभद्रानदी तीरं ब्रह्मनीराज्यकस्य[7] च।
हिन्दूनां षष्ठिसाहस्रमानीतं दासतां यदा ॥13॥
खानाहमदनाम्ना तु तदा बुक्कः स्वकन्यकाम्।
फिरोजाय भिया दत्त्वा गजांश्च धनसंयुताम्॥14॥
दासीदासाभिर्युक्तां सन्धिं भीतश्चकार सः।
एतेनापितयोः सख्यं न जातमिति कथ्यते॥15॥
यतः सासीन्निजा नैव कन्या बुक्कस्य भूभृतः।
वेश्यासुता प्रसिद्धा हि बुक्कस्य कुनृपस्य सा[8]॥16॥
स्वर्णकारस्य कन्या च याऽसीद् बंकापुरे तदा।
आनीय तां तु तत्स्थानात् क्रोधेन महता युतः॥17॥
स्वर्णकारस्य कन्या सा परथालेति नामिका।
फिरोजेन स्वपुत्रेण हसनेन विवाहिता॥18॥
एतेन तु विवाहेन प्रसन्ना स्वर्णकारकाः।
फिरोजेन पुनः सर्वे मुद्राकार्ये नियोजिताः॥19॥
युद्धेऽस्मिन् कोण्डिबादेव भ्राता गोविन्ददेवकः।
तथा विशालदेवोऽपि दुर्दशां समुपागतौ॥20॥
आसीद् गोविन्ददेवस्तु कोंकणे मण्डलेश्वरः।
ररक्ष कोण्डिबादेवपुत्रमापद्गतं तदा॥21॥
नाम्ना स तुकदेवश्च सुखदेवं स्वपुनवत्।
पुत्रो हरणदेवस्य मानकश्चेति विश्रुतः॥22॥
प्राप्तवान् सुमहत्कष्टं युद्धे तस्मिन् भयङ्करे।
सोऽपि गोविन्ददेवस्य पार्श्वे कोंकणमागतः॥23॥
त्रयोऽपि भ्रातरो बुक्कं स्वग्रामार्थं न्यवेदयन्।
म्लेच्छैश्चैव पराजित्य चालुक्याः क्रोधमागताः[9]॥24॥
विनयः कटियारश्च तुकदेवसुतौ पुनः।
कथयामासतुः बुक्कं तत्पराजयकारणम्॥25॥
भगवन्नारबाश्वानामभावस्तत्र कारणम्।
नान्यथाऽस्मद्बलानान्तु सम्भवेद्धि पराजयः॥26॥
तेषां संग्रहणार्थाय यत्नः पूर्वं परं परम्[10]।
येन न स्यात्कदाप्यत्राऽस्मदीयस्तु पराभवः॥27॥
बंकापुरे च कल्याण्यामश्वव्यापारिणः पुरा।
त्रिशतं चाऽरबाश्वानां ददुः प्रत्यब्दकं क्रमात्॥28॥
परं ब्रह्मनशाहस्य[11] राज्यस्य स्थापनात्परम्।
न ते हिन्दुनृपेभ्योऽश्वान्नददन्जाति भेदतः॥29॥

हिन्दुराजो न कोऽप्यासीत्तदाशक्तिसमन्वितः[12]।
हयानां सैन्यसर्वंभारस्तेन[13] नाशमुपागतः॥30॥
चन्द्राङ्कावेदशशिके शके वर्षे हुसेनकः।
जमालुद्दीनसाबुश्च प्रसिद्धो मुस्लिमस्तदा॥31॥
दिल्लीतो गुलबर्गे स निवासार्थं समागतः।
तस्य तत्राऽभूत सद्यो महानेव समादरः॥32॥
फिरोजशाहपुत्रस्याऽहमदस्य मदस्तदा।
क्षीणातां समनुप्राप्तः पुरतस्तस्य धीमतः॥33॥
इष्वङ्कवेद चन्द्राख्ये शकेफीरोजशाहकः।
बारङ्गलस्य राजानं करं दातुं समादिशत्॥34॥
दुर्गं पांगुलसंज्ञन्च न दृष्ट्वाऽऽज्ञां हिपालिताम्।
समाक्रामत्तदा सद्यः सैन्येन महता तदा॥35॥
पाङ्गुलोऽयं पूर्वमासीद्विजयानगराङ्गके।
हिन्दूनृपस्य साम्राज्ये धनधान्यसमन्वितम्॥36॥
तदा विजयदेवस्य तुकदेवसुतस्य[14] च।
नाम्नो विनयदेवस्य कटियारस्य सम्मते॥37॥
वारङ्गलस्य राज्ञा तु सन्धिं सद्यो विधाय च।
प्रेषयामास सेनां[15] स विजयानगरस्थितम्॥38॥
सह स्वबन्धुवर्गेश्चाऽरुणत् फीरोजसैन्यकम्।
वर्षद्वयन्च युद्धं[16] तदभवत् भीतिकारकम्॥39॥
अब्ध्यङ्कवेदचन्द्राख्ये साहाय्यं प्राप्य बन्धुतः।
कन्हैयानायकेनाऽसीर् बलं दिल्लीश्वरस्य च॥40॥
निष्कासितं स्वराज्याच्च तेन रुष्टो मुहम्मदः।
शाहो बहूमनिकः क्षिप्रं जघान च विनायकम्॥41॥
कन्हैयानायकसुतं नागदेवान्यनामकम्।
कोण्डिबादेवपितृव्यः पुत्रः श्रीसुखदेवकः॥42॥
तदाऽवसन्तेनसार्धं पुत्रवत्पालितो मुदा।
यत आसीन्मुम्मदाम्बा माता तस्य चुलुक्यजा॥43॥
कन्हैयानायकस्तस्मात् सुखदेवं स्वपालितम्।
राज्यासने समायातुमुवाच प्रेमपूर्वकम्॥44॥
सुखदेवेन तद्राज्यं स्वीकृतं न विवेकत्।
संस्कृत्य पूर्वजानान्च वचनं तद्विरोधकम्॥45॥
स दत्तवाविधानेन पुत्रोऽसौ विनयान्वितः[17]।
प्रतापरुद्रवंशीयो नाम्ना रुद्रप्रतापकः॥46॥

चक्रे राज्यं स्वल्पकालं कन्हैयानायकस्य च।
कथमप्यतिकष्टेन भीतो म्लेच्छान्मुहुर्मुहः॥47॥
महामारीप्रकोपेन सैन्यं फीरोजशाहकम्।
परावर्तत युद्धात्तु दृष्ट्वा सैन्यं महत्तरम्॥48॥
फिजुल्लाइंजुनामानं यो जघान च बान्धवम्।
कोण्डिबाराजदेवस्य बंकापुरसमन्ततः॥49॥
तंहत्वा वैरशोधन्च कृतवान् सुखदेवकः।
हत्वा पुनः शिखानष्टान् स्वायत्तीकृतवान् बलात्॥50॥
कर्नाटके कोंकणे च स्वभागान् शत्रुभिःर्हृतान्।
बंकापुरे च जग्राह युद्धेन निजशक्तितः॥51॥
तदा तु वीरविजयः प्रीतश्चालुक्यवंशजान्
ज्ञात्वा तान् दत्तवान् ग्रामान् बंकापुर समीपगान्॥52॥
यमादरेण महता प्रेम्णा सत्कृत्य तान् मुहुः।
स्वपक्षीया इति ज्ञात्वा परमानन्दमाप्तवान्॥53॥
पराजयेन फीरोजशाहस्य क्रान्तिरन्वभूत्।
खांहुसेनस्य पक्षीया अलाउद्दीनपक्षकाः॥54॥
फिरोजपुत्रयुग्मस्य कृते फीरोजकस्तु सः।
गुलबर्गे तदा राज्ये स्थापितुं खां हुसेनकम्॥55॥
प्रायतत्तु तदा क्षिप्रं नीतिज्ञोऽहमदः सुधीः।
मोहम्मदं शान्तचित्तमालाउद्दीननामकम्॥56॥
फिरोजस्य ज्येष्ठपुत्रं गृहीत्वा रक्षणाय च।
जमालुद्दीनहूसेनीभिस्मूदक्ष्मापकन्दरे॥57॥
गतो यात्राऽभवत्तस्य रक्षणं दुष्टपितृतः।
प्रातर्ग्रहीत्वा चाश्वानां चतुश्शतकमुत्तमम॥58॥
प्रस्थितो गलबर्गाय निर्भयं वीररसत्तमः।
मार्गे समेत्य खलफहसनं निजमित्रकम्॥59॥
बसरायाः सुप्रसिद्धं व्यापारिणिमरिन्पदमम।
तेन सार्थं गतः शीघ्रं कल्याण्मां वीरपुङ्गवः॥60॥
निवासं तत्र कृतवान् किन्चित कालं सुखेन सः।
कल्याणीदुर्गपात प्राप्य स्वागतं प्रेमपूर्वकम्॥61॥
तुकदेवसुतोनाऽत्र देवेन विनयेन वै।
समादरेण सैन्यैस्तु तस्मै साहाज्यमर्पितम्॥62॥
त्रिसहस्रं पदातीनांकृत्वैकत्रं प्रयत्नतः।
चतुः सहस्रमश्वानां सेनां तस्मै प्रदाय च॥63॥

सहसा गुलबर्गं तु वीरो खासफ़हासनः।
समाक्रमत् फिरोजस्य भ्राता तस्मात् पलायितः॥64॥
फिरोजपुत्रौ च पुनः बन्दिनौ कृतवान् स्वयम्।
खानयुक्तन्च हसनं खानमूबारकं तथा॥65॥
त्यक्तवन्तौ स्वाधिकारान् स्वाश्वेष्वब्जमितेशके।
अहमदः स्थितो राज्ये फिरोजस्तु हतः क्रमात्॥66॥
युद्धे तस्मिन् तु चालुक्य विजयस्तुकदेवभूः।
व्रणेन महता युक्तः स्वर्गलोकं जगाम सः॥67॥
जमालुद्दीन कथनादहमद्शाहभूभता।
तदाकटीयारदेवं भ्रातरं विनयस्य च॥68॥
कल्याण्यां दुर्गस्वामित्वं पूर्वाधिकृति संयुतम्॥
चालुक्यानां यथापूर्वं कारितं प्रेमपूर्वकम्॥69॥
खाब्जबाणशशीशाके काण्डिबादेव बालकः।
आनीतो दशवर्षीयो गुलबर्गे क्रमात्ततः॥70॥
नियाजितश्च प्रेम्णासौ पदे हि सरनोबते।
ततः परं तस्य नाम तवाजीत्यभवत् किल॥71॥
तेङ्गानं समाक्रम्य वार९गलमथाग्रहीत्।
ब्रह्मन्यहमदशाहो नेत्राभ्रेष्वब्जके शके॥72॥
युद्धेऽस्मिन्सुखदेवोऽसौ केशवेन सुतेन च।
कनिष्ठेन सहैवात्र मृत्युमाप चुलुक्यजः॥73॥
नृपं छलान्महोरस्य जघानाऽहमदो यदा।
तदा तु तस्य चाऽकीर्तिः प्रसृतासो समन्ततः॥74॥
राज्याधिकारान् सहसासमागतान्,
मुहुस्तिरस्कृत्य कुलानुशासनात्।
धन्या नरास्ते चुलुकान्वयेद्भवाः,
ररक्ष ये कीर्तिमनुत्तमां निजाम्॥75॥

॥इति श्री अय्यणवंशचरितकाव्ये चालुक्यवंशीयतुकदेवादि
वर्णनं नाम द्वादशः सर्गः॥

## सन्दर्भ

1. सुमहत्—क. पुसतकं
2. ब्रह्मनीराज्यमध्यगात्—ख. पुस्तके
सौन्दर्यशालिनी परथाला स्वर्णकारस्य कन्यासीत् एते स्वर्णकाराः मुड्गलाग्रामवासिन आसन्।

ग्रामोऽयं ब्रह्मनीराज्य आसीत्। ब्रह्मनीराज्येऽधना राज्यं ताज्जुद्दीनफिरोजसुलतानस्यासीत्। ताज्जुद्दीनफिरोजो हि ब्रह्मनीराज्यस्य सुलतान आसीत्। ब्रह्मनीराज्यस्य संापको हि अलाउद्दीनशाह आसीत्।

3. भूम्यां तेनैतत्—ख. पुस्तके
4. बम्हनि—ग. पुस्तके
5. तद्—क. पुस्तक
6. स्वभ्रातरहमदखाऽधिपत्ये—क. पुस्तके
7. अश्वावहायुतयुतं—क. पुस्तके
8. यतो नासीत् कन्यका सा निजाबुक्कस्य भूभृतः।
   सासीद्वेश्यासुता तस्य बुक्कस्य कुनृपस्य च॥
   अहमदखानो हि ताज्जुद्दीनफिरोजस्य ब्रह्मनीशाहस्य भ्राता, यो हि 3148 वर्षस्य निकट एव बुक्कमाक्रमत्। 1484 वर्षीये बुक्कस्योपरि समाक्रमणे फिजुल्ला-इंजुनामा ताज्जुद्दीनफिरोजशाहस्य सेनानायकः, यः अहमदखानेन सह बुककस्योपर्याक्रमणं कृत्वां तस्य कन्या फिरोजाय दापयतिस्म।
9. म्लेच्छायांश्च पराजित्य चालुक्यन्चकुरात्मसात्—क. पुस्तके
10. अतस्तेषां संग्रहाणार्थं यतितव्यं प्रयत्नतः—क. पुस्तके
11. बम्हनशाहस्य—क. पुस्तके
12. हिन्दुराजः कोऽपि नासीत्।—ख. पुस्तके
13. तेन तेषामश्वबलं महतीं क्षतिमागतम्—क. पुस्तके
    हसनोहि ताजुद्दीनफिरोजशाहस्य पुत्रः, यस्य विवाहो हि स्वर्णकारस्यपुत्र्या परथालया सार्धमभवत्। हुसेनः जमालुद्दीनसाबुश्चोभौ दिल्ली प्रशासनस्याधिकारिणौ तौ हि 1491 वर्षे दक्षिणभारते निवासकामनया गुलबर्गप्रदेशमाययतुः। पुरा 1434 सविधे शके वर्षे प्रदेशोऽयं अलाउद्दीनब्रह्मनशाहस्य राज्यमासीत्। तस्य प्रबन्धो हि शैफुद्दीनधुरी हस्त आसीत्।
14. तु वीरविजयो—क. पुस्तक
15. पृतनां—ग. पुस्तके
16. वर्षद्वयानतं—ग. पुस्तके
    अहमदो हि अलाउद्दीनब्रह्मनीशाहस्य पौत्र फिरोजशाहस्य पुत्र आसीत्।
    विजयानगरस्याधिपः कन्हैयानायक 1422 शके वर्षे दिल्लीराजधानीतः बलं प्राप्य चालुक्यानां साहाय्येन फिरोजशाहं स्वराज्याद् बहिः कृतवान्।
    मुहम्मदः फिरोजशाहस्य पुत्रः, स 1422 शकवर्षाणां सविधे विनायकं जघान।
17. तदा तु दत्तकविधिना गृहीतो विनयान्वितः।—क. पुस्तक
    फिंजुल्ला-इंजु-नामा फिरोजशाहस्य नायक आसीत्। स बंकापुरसमीपे प्रतापरुद्रेण 1422 शकवर्षाणां सविधे हतः॥
18. त्रै—ग. पुस्तके
    मुहम्मदअलाउद्दीनो हि फिरोजशाहस्य ज्येष्ठपुत्र हसेनखांनामा द्वितीयः पुत्रश्चासीत् जमालुद्दीनहसंनीमिस्मुदो हि मुहम्मद-अलाउद्दीनस्य प्राणान् ररक्ष।खलफहसनो हि जमालुद्दनहसंनीमिस्स्मूदस्य मित्रमासीत्। अयं खालफहसनआरबाणामश्वानां अरबीयबसराप्रदेशस्य व्यापारी अत्रारबीयाश्वानां व्यापारमकरोत्। अनेनैव सार्धं घोटकानां व्यापारिवेषेण जमालुद्दीनहुसंनीमिस्मूदः मुहम्मदअलाउद्दीनं फिरोजस्य द्वितीयं कल्याण्यां प्राप्यतु, तेन तस्य प्राणानां रक्षाभवत्।
    हसनूखानो हि फिरोजशाहस्य पुत्रः, स हि 1500 वर्षे गुलबर्गयुद्धे मृतः।
    मुबारकखानोऽपि फिरोजशाहस्य पुत्रः, सोऽपि गुलबर्गयुद्धे 1500 वर्षे घातितः।
    अहमदस्तु फिरोजशाहस्य पुत्रः पितुर्विद्रोहं कृत्वा चालुक्यानां साहाय्येन गुलबर्गयुद्धं विजीत्य 1500 वर्षे गुलबर्गराज्यस्य शासकोऽभवत्।

# ॥अथ त्रयोदशः सर्गः॥

इष्वब्जबाणचन्द्राख्ये शके वर्षे दिलावरः।
खांयुक्तःप्रेषितो जेतं सर्वान् हिन्दूनृपान् तदा॥1॥
कोंकणे सैन्यभारेण सङ्गमेश्वरभूमिपः।
परं मराठाराजोऽसौ सुखे नाम्ना हि विश्रुतः॥2॥
तं रुरोध बलाद्वीरः क्षतिं तस्य चकार च।
चन्द्रेक्षबाणचन्द्राख्ये विजयानगराधिपः॥3॥
देवरायः शङ्कुदेववीरदेवौविचारतः।
रायचूरं मुड्गलं प्र ग्रहणस्येच्छया पुनः॥4॥
सज्जीकृत्यमहत्सैन्यं म्लेच्छैरपि समन्वितम्।
युद्धार्थं पूर्णसामग्रया चचालाऽथ चतुर्दिशि॥5॥
मासत्रयं युद्धमासीत् प्रवृत्तं वीरमर्दनम्।
पूर्वनृतु हिन्दुराजानो जिताः पश्चात्पराजिताः॥6॥
अलाउद्दीनपूर्णोऽसावहमद इति श्रुतः।
विजित्य मुड्गलं देशं घातितं देवरायजम्॥7॥
बंकापुरस्य संग्राम कोण्डिबादेवको हतः।
तत्पितृव्यः कटीयारः देवोऽप्यत्र दिवङ्गतः॥8॥
कमलोजी स्कन्ददेवमालोजीति सुतत्रयम्।
कोण्डिबादेववीरस्याऽऽसन् बालास्तदा तु ते॥9॥
तत्सम्पत्ततेरक्षणार्थं विजयानगराधिपः।
नगाना-नामकं तत्र स्थापयामास चिन्तया॥10॥
सुवेनासुततिम्मोजीगोवाप्रान्तस्य रक्षणे।
पश्चान्नियोजयामास विजयानगराधिपः॥11॥
निर्मायौषधशालां च धर्मशालां तथैव च।
प्रसिद्धोऽभूत् कर्मणा स अलाउद्दीन वीदरे॥12॥

देवालयान् समान् भुङ्क्त्वा कृत्वा मस्जिदसादसौ[2]।
मदयुक्तोऽभवत् तेन कीर्तिनाशं गतस्तदा॥13॥
व्यापारिणोऽप्राप्य मूल्यमारबाश्वकृतं ततः[3]।
सैयदानां च घातेन तेऽघोषन् दुष्टमात्मकम्॥14॥
श्रुत्वाऽकीर्तिं सर्वत्र स शोकाकुलचित्तकः[4]।
रुजाऽर्तो[5] भूरि भूत्वाऽयं कार्यं तत्याज सर्वशः॥15॥
मिनुल्लाम्याननेतृत्वे बाह्यतस्तु समागतान्।
दक्षिणस्था मिलित्वा तु सुविचार्य समन्ततः॥16॥
म्लेच्छानेतान् ततो हन्तु निश्चयं चक्रुरुत्तरम्।
कोंकणस्योत्तरे भागे कार्यारम्भो बभूव च॥17॥
स्वल्पान् हिन्दूनृपान् जित्वा जग्राह शिरकेनृपम्।
मुस्लिमं धर्ममादातुं चोदितः स उवाच तान्॥18॥
सङ्गमेश्वरभूपालो यावन्न स्वीकरिष्यति।
तावत्तदाधिपत्यं न नात्मधर्मं त्यजामि[7] वै॥19॥
अहमप्यागमिष्यामि तत्कार्यार्थं स्वसेनया।
छलेनैवं समुच्चार्य निजधर्मं ररक्ष च॥20॥
अयुतत्रयसैन्येन गन्तव्यमितिनिश्चितम्।
पूर्वं हि शिरके राजा सङगमेश्वरभूपतिम्॥21॥
सूचयामास सर्वं तत् तेनकोंकणकानने।
उभाभ्यां नाशितं सैन्यं समाक्रम्य समन्ततः॥22॥
युद्धेऽस्मिन् कोण्डिबादेवभ्रातरौ तु हतौ भ्रमात्।
शङ्कवीरवरौ देवौ चालुक्यान्वयसम्भवौ॥23॥
अब्धिवेदेषु चनद्राख्ये शके वर्षे पुनस्तदा।
बीजापुरसूबेदारो गवां मुहमदो बली॥24॥
सङ्गमेश्वरभूपालं खेलनानायकं तथा।
समाक्रान्तु प्रेषितोऽभूत् सेनया नवयायुतः॥25॥
उभाभ्यामपि राजभ्यां स रुद्धः समराङ्गणे।
परन्तु कूटनीत्या स सैन्यं स्वीयमरक्षयत्॥26॥
वनमार्गान् स संरुद्धय पदातीनेव युक्तवान्।
तो पृष्ठोऽश्वान् सुसंस्थाप्य चतुरो युद्धकर्मणि॥27॥
ततः प्रज्वाल्य गहनं खेलनादेशमाक्रेमत्।
विशालगढदुर्गन्च पन्चमासं रुरोध च॥28॥
वर्षर्तौ च समायाते कोल्हापुरमुपागमत्।
भोसलेवंशजेनाऽत्र कृतं कार्यं प्रशस्यते॥29॥

प्राकारैस्सुसमृद्धन्च शतघ्नीशतसङ्कुलम्।
दुर्गं स्वायत्तकरणे काठिन्यमभवत्तदा॥30॥
तत्र गोधा प्रयोगेण योधान् संवेश्य युक्तितः।
द्वारमुद्घाटितं तेन प्रविशुः सैन्यमन्तरे॥31॥
युक्त्यैषा भोसलेवंशजातस्येतीह कथ्यते।
ततः प्रभृति ते घोरपडेनाम्ना सुविश्रुताः॥32॥
ग्रामे सुघोले तेभ्यश्च प्रदत्ताभूस्तु जागिरी।
पुत्रपौत्राधिकारार्थमहो बुद्धिबलं नृणाम्॥33॥
शके मुहम्मदगवां अङ्कवेदेषु चन्द्रके।
समाक्रमत् प्रसिद्धं तत गोवानगरमुत्तमम्॥34॥
प्राप्य साहाय्यमत्रस्थादयुतादधिकात्पुनः।
शिखानाष्टात् स सफलं स्वायत्तीकरणे ह्यभूत्॥35॥
प्रसिद्धं पोतविश्रानितस्थानं गोवापुरं तदा।
मदीनायां च मक्कायां गोवातो गमने पुनः॥36॥
सौविध्यं तु महत्जातं व्यापारे च विदेशिके[9]।
वीदरे तेन बहूमन्यां राजधान्यां समन्ततः॥37॥
उत्सवस्तु महानासीत् लोकानन्दकरस्तदा।
वर्षद्वयानन्तरन्च खबाणेष्वब्जके शके॥38॥
कर्नाटके कोंकणे च सप्तसंख्याकभूभतः।
जित्वा मुहम्मदगवां स्वायत्तीकृत्यं खेलनाम्॥39॥
सोनगीरं कराटन्च सऊगमेश्वरमेव हि[10]।
कोल्हापुरं वेलगावं बंकापुरमथापरम्॥40॥
पोतविश्रान्तिकस्थानगोवाराजपुरौ तथा।
परावर्तत हृष्टात्मा सर्वत्र विजयेन वै॥41॥
वीदरे तु महानासीत् तस्य सुस्वागतोत्सवः।
शाहमोहम्मदकृतस्तृतीयो लष्करीति यः॥42॥
तन्मात्रा च गवा प्रीत्यै कारितोऽयं महस्तदा।
येन तद्विक्रमस्याऽभूत् कृतज्ञत्वं प्रदर्शितम्॥43॥
दाक्षिणात्या विदेशीयाः शिखानष्टाश्च विप्लवम्।
चक्रुस्तदा तु माधोजी कमलोजी समन्वितौ॥44॥
इष्वङ्काग्नीन्दुवर्षे च बंकापुरनिवासिनौ।
विक्रमाद् बेलगांवस्य विजयानगरस्य च॥45॥
साहाय्यन्च वीरपदादवाप्यायततां पुनः।
गोवाग्रहणकार्यार्थं सफलौ नाऽत्र तौ परम्॥46॥

मोहमदस्तृतीयोऽपि मोहम्मदगवां सह।
समाक्रमच्च तत्सैन्यं विक्रमं बन्दिनं तथा॥47॥
कृत्वा प्रादाद् वेलगांवं गवां मोहम्मदाय च।
तयोः ग्रामान् मीरजस्थान् बेलगाँवसमन्ततः॥48॥
बलाज्जग्राह शाहोऽयं तथाप्युद्योगिनावुभौ।
विजयानगराख्यस्य साहाय्यं प्राप्य भूभृतः॥49॥
स्वं स्वत्वं पुनरप्याप्तुं यतेते स्म जितश्रमौ।
उद्योगिनं नरश्रेष्ठं लक्ष्मीरभ्यति निश्चितम्॥50॥
परस्परस्य संघर्षाद् विप्लवाच्च विभाजितम्।
तत्काले पन्चभागेषु राज्यं बहूमनि संज्ञकम्॥51॥
कमलोज्यात्मजो वीरोनरसोजीति बुद्धिमान्।
संस्थाप्यैभिर्मित्रभावं विजयानगरेण च॥52॥
प्रायस्तद्ग्रहणो स्वीयं हृतं यन्म्लेच्छजातिभिः।
तत्रांशिकं चसाफल्यं प्राप्तं तेनाऽत्ममानिना॥53॥
गोवां परनतु न प्राप कृतभूरिपरिश्रमः।
पुर्चगालाः पुनस्तस्य साहाय्यं कुर्तुमुद्यताः॥54॥
आरबाश्वबलं लब्धुं[11] प्रतिज्ञाय सहायताम्।
नसोजी तु विजयानगरास्य विंशांपतेः॥55॥
विविधानुनयेनाऽसौ साहाय्यं प्राप्तवानिति।
तेन गोवाजयार्थं स उद्योगं कृतवान् पुनः॥56॥
कामोजीत्यस्य पितृव्यः साबाजीति प्रतापवान्।
गोवाप्रान्तेऽवसत्[13] होना–बरनायकजापतिः॥57॥
दासीपुत्रस्तु तिम्मोजी पितुः साबाजिकस्य च।
तेन तौ भ्रातरावास्तां तस्मात् प्रेमसमन्वितौ॥58॥
उच्चपोताधिकारी स तिम्मोजीनायकस्य तु॥
होनावरस्य योद्धा च विश्रुतस्तत्र मण्डले॥59॥
कामोजी ननु साबाजीं तिम्मोजीं सूचनाय वै।
न्यदेवयन्मन्त्रिमुख्यं पोर्चग्लानां समाग्रमे॥60॥
तेन तस्य प्रभावेण गोवाप्रान्तोजितो भवेत्।
विजयापुरभर्तुस्तु गोवापति यतो हि सः॥61॥
आंजेदीरस्य सान्निध्ये साबाजी व तिमोजि च।
गोवाग्रहणकार्यर्थं पोर्चुग्लानां तु मन्त्रिणम्॥62॥
ययाचतुस्तु साहाय्यं यत् सोऽपि स्वीचकार च।
युक्त्या सम्पादितं कार्यं सिद्धिमेति न संशयः॥63॥

गजेभेष्विन्दुवर्षोऽसौ पोर्चुग्लानां पराक्रमात्।
गोवाप्रान्तं समस्तं च कामोजी स्ववशेऽकरोत्॥64॥
अस्मिन् युद्धे तु तिम्मोजी पराक्रममदर्शयत्।
परन्तु रुग्णः सन्जातः साबाजीति प्रतापवान्॥65॥
इच्छतिस्मात्मसात्कार्तुं तिम्मोजी नीतिकोविदः।
गोवाजागीरमेवात्र पोर्चुग्लाना प्रधानतः॥66॥
निरीक्षणकपदे किनतु तेनतिम्मोजि निश्चितः।
असन्तुष्टस्तु तिम्मोजी तेनकार्येण चाभवत्॥67॥
आदिलशाहो यदग्रे तु बीजापुरपतिः पुनः।
गोवाप्रान्तं समाक्रामत् साहाय्यं न तदाऽकरोत्॥68॥
परं मल्हाररावेण साबाजीसूनुना तदा।
कामोजीकथानात्तेभ्यः साहाय्यं तु समर्पितम्॥69॥
पोर्तुगीजैस्तु पार्दवलक्षं वार्षिकमित्यतः।
मल्हाररावो जग्राह यस्माद् व्ययमपोस्य च॥70॥
चतुर्थांशं तु कामोजीतद्भ्राताऽप्पाजिचाप्नुताम्।
साहाय्यस्याप्रदानेन निरीक्षकपदात् पुनः॥71॥
दूरीकृतस्तु तिम्मोजी पोर्चुगीजैसतु शेषतः।
निष्कासने तत्पदाच्च कारणान्तरमप्यभूत्॥72॥
प्राचीनवंशजानान्तुगोवाप्रान्ताधिकारिणम्।
मल्हाररावकम्मोजीसदृशानामुपस्थितौ॥73॥
गोवाप्रान्तगता लोका दासीपुत्रस्य शासने।
नैच्छत् स्थातुं तु तिम्मोजी तस्माद् दूरीकृतः पदात्॥74॥
उद्योगिनं पुरुषसिंहमथाऽत्र लक्ष्मीः
संयाति तद्गुणगणैश्च वशं प्रयाति।
तस्मान्नरैस्तु निजकार्यसुपूरणायो–
द्योगः सदैव करणीय इति प्रसिद्धम्॥75॥

॥इति श्री अय्यणवंशचरितकाव्ये कामोजीकृतगोवाग्रहणोद्योग नाम त्रयोदशः सर्गः॥

## सन्दर्भ

1. अलाउद्दीनाह्मदो मुद्गलं गृहीतवान्।
हिन्दू सैन्यं पराजित्य देवरायसुतहतः॥
दिलावरखानो हि गुलबर्गाधिपतेरहमदशाहस्य सेनापतिः। अलाउद्दीन अहमदो हि स एव अहमदशाह;

यो हि चालुक्यानां साहाय्येन 1500 वर्षे गुलवर्गस्य शासकोऽभवत्।

2. विनाश्यमन्दिरान् सर्वान् कृत्वा मस्जीदसंज्ञकाम्।
मदयुक्तोऽभवत् सोऽत्राऽपकीर्तिन्च गतस्तदा॥

3. मरबाश्वकृतं तदा।

4. स महदुःखितोऽभवत्–क. पुस्तकं

5. तेन भूत्वा रुजाऽर्तोऽयं–ख. पुस्तकं

6. तदाधिपत्यं तावन्नाहं स्वधर्मं तत्याजामि वै–ग. पुस्तकं

7. शङ्कुदेववीरदेवौ–क. पुसतकं

8. पृष्ठोऽश्वान्

9. विदेशकं–क. पुस्तकं
"मक्कामदीना तुरुष्काणां तीर्थस्थानम्। अत्रागत्य नमाजं 'अदा'–कृत्य तेषां हजयात्रा भवति। एनां यात्रां सम्पाद्य तुरुष्काः हाजी भवन्ति।

10. तृतीयो मुहम्मदशाहो ब्रह्मनीवंशीयः बीदरस्य प्रशासक आसीत्।

11. आरवाश्वाश्च प्राप्तिकार्ये–क. पुस्तकं

12. पुर्चगालाः पुर्तगालदेशस्य नागरिकाः, येऽत्र तदानीं व्यापारिणो ह्यासन् आरबाश्वबलं अरबदेशीयानां श्रेष्ठानां घोटकानां सेना, अरबीयाश्ववाहिनीत्यर्थः।

13. गोवा प्रान्तोऽवसत्–क. पुसतकं

14. याचतुः–ख. पुस्तकं
पोर्चुग्लानांपुर्तगालदेशवासीयाना सहायतां गृहीत्वा 1588 वर्षे कामोजी गोवाप्रान्तस्य शासकोऽभवत्।

15. आदिलशाहो हि बाजापुरस्य शासकस्तुरुष्कः। पोर्तुगीजैः पुर्तगालदेशीयैः।

## ॥अथ चतुर्दशः सर्गः॥

अलि आदिलशाहस्य तथाऽली अमिलस्य च।
परस्परन्तु कलहे कम्भोजी नरसोजितः॥1॥
कल्याण्यां स्वत्वरक्षायां काठिन्यं महदन्वभूत्।
चन्द्रनेत्ररसाब्जे च शके शाहो बुराहनः॥2॥
शोलापुरं समाक्रान्तं यत् सदाशिवसमन्वितः।
चकारोधोगमत्यर्थं कल्याणीं चाप्तुमिच्छया॥3॥
बुर्हनूनिजामशाहेन कल्याणी ननु चात्मसात्।
किन्चित् कालं कृता सद्यस्तदाप्पाजीसहोदरः॥4॥
कम्मोजीत्यस्य विजयानगरस्य च भृभृतः।
सेनायां मिलितश्चासीत् प्रसिद्धो वीरसत्तमः॥5॥
बुर्हनूनिजामशाहेन कम्मोज्यप्पाजिसंज्ञयोः।
अर्धं स्वत्वं तु कल्याण्यां स्वीकृतं मनसा तदा॥6॥
बीजापुरस्य सेना तु प्राप्ता पूर्णं पराजयम्।
बीजापुरस्य सेनानी स इब्राहीम संज्ञितः॥7॥
परेण्डे नामके स्थाने निवासमकरोत् तदा।
मशकानां महच्छब्दं रात्रौ श्रुत्वा भयान्वितः॥8॥
बुर्हन्निजामशाहस्य सेनायाः क्रोशविंशतौ।
याऽऽसीत् तदैव भयतो कम्पप्राप्तशरीरकः॥9॥
तुर्यशब्दं तु निर्धार्य चाश्वमास्स्य सत्वरम्।
बीजापुरदिशायान्तु प्राद्रवद्भयविह्वलः॥10॥
इष्वक्षिरसचन्द्राख्ये बुर्हन्नीजामशाहकः।
सदाशिवस्य साहाय्यं प्राप्याक्रमणमाचरत्॥11।
अलीवरीदशाहस्य बीदरस्योपरिक्रमात्।
शोलापुरस्य कल्याण्या दुर्गाणि च गृहीतवान्॥12॥

इब्राहीं वादिलशाहो बीजापूरस्य शासकः।
गतोऽपि तत्र साहाय्यं स तु तत्र पराजितः॥13॥
नेत्र रामर साब्जेऽब्दे मांगसावंतसंज्ञकः।
विद्रोहं कृतवान् तत्र चांदवाडादिदुर्गकान्॥14॥
ग्रामान् च कमलोजीतो बलात् स सङ्गृहीतवान।
कुडालस्थस्तु देसाई ग्रामान् श्रीकमलोजितः॥15॥
रक्षितुं प्रायतत किन्तु न तत्र सफलोऽभवत्।
षड्रामरसचन्द्राब्दे वर्षे बुर्हानसंस्थिता॥16॥
कल्याणी बहुकामस्था परं स गुण संयुतः।
कमलोजीजः कम्मोजीत्यस्य यस्तु सहोदरः॥17॥
बंकोजी ति चुलुक्यस्य वंशजो विनयान्वितः।
कल्याण्याः स्वत्वमत्राऽपि यथा पूर्वं च प्रापतुः॥18॥
अस्मिन्नेव च वर्षे तु अलीवादीलशाहकः।
सदाशिवस्य साहाय्यं प्राप्य नीजामशाहतः॥19॥
शोलापुरं च कल्याणीमगृह्णाच्च यत्नतः।
संग्रामं घोरमाश्रित्य सर्वार्तिकरमद्भुतम्॥20॥
अलीआदिलशाहस्तु सदाशिवविचारतः।
हुसेन शाहेन समं मैत्रीं कर्तुं समुत्सुकः॥21॥
त्रयस्तु नियमास्तत्र निश्चिताः सन्धिरक्षणे।
खां जहांगीरहननं कल्याण्यास्तु समर्पणम्॥22॥
उपायनप्रदानन्च हुसेनेन सहर्षतः।
सदाशिवाय रायाय पूण्यबुद्धिविचारतः॥23॥
हुसेनेनापि नियमाः स्वीकृताः कथमप्यमी।
हुसेनस्तु यदाऽऽगच्छत् सदाशिवगृहे पुनः॥24॥
सादाशिवस्तु रायः सः पस्पर्शास्य तु हस्तकम्।
गच्छतस्तु बहिर्द्वारे आदरेण च पृष्ठतः॥25॥
हुसेनस्तेन संसष्टो पात्रं च जलमेव च।
हस्तप्रक्षालनार्थं वै याचयामास कोपतः॥26॥
तस्य तद्वचनं श्रुत्वा कोपेन महता युतः।
भाषां कनाडीमाश्रित्याकथयत् स सदाशिवः॥27॥
अतिथिः सह्यतेऽन्यथा[1] कृन्तितौ ते करावुभौ
क्षेत्रं प्रक्षालितं भूत्वा पूतं स्याद्रक्तवारिणा॥28॥
ततस्तत्र तयोरासीद् महाकोलाहलेन वै।
विवादवाद[2] क्रोधेनाऽभवद् भयंकरस्तदा॥29॥

कमलोजीं परां तत्र शान्तिं संस्थाप्य यत्नतः।
कुन्जिकां दुर्गकल्याण्यास्तस्मात्तु स्ववशेऽकरोत्॥30॥
तत्तस्य परया बुद्धया विजयानगराधिपः।
तत्र ये ब्रह्मनि सुल्तानाः प्रीताः समभवन् किल॥31॥
दत्वोपाधिं तदा तस्मै नायकी नायकस्य च।
अधिकारं कुलप्राप्तं तस्य सम्यग् विचार्य च॥32॥
कल्याण्याश्चार्धमंशन्चऽधिकारं पूर्ववत्ततथा[3]।
अर्पयामासुरेवैते हृष्टाः कमलोजिकर्माणि॥33।
अङ्कवेदरसाब्जे तु शके वर्षे हुसेनकः।
निजामशाह इब्राहीं कुतुबश्शाहसंज्ञकात्॥34॥
परामर्शं गृहीत्वा तु जमीलां निजकन्यकाम्।
वरीदशाहइब्राहीं द्वितीयाय समर्पयत्॥35॥
कल्याणीदुर्ग ग्रहणे प्रबन्धश्च तदाऽभवत्।
परितो दुर्गकल्याणीं स्वसेवां निरधारयत्॥36॥
ततो बीजापुरप्याऽली आदिलशाहेन तत्क्षणम्।
रायात् सदाशिवादाप्य साहाय्यन्च पुनस्तदा॥37॥
समाक्रान्तं हुसेनस्य सैन्यमिब्राहिमस्य च।
न जाने हि कथं जातः शतघ्नीवारिसङ्[1]गमः॥38॥
वृष्ट्यभावेऽपि ता आर्द्राः शतसप्तकसंख्यकाः।
विचित्रविधिसंयोगात् सन्जातास्यु निरर्थकाः॥39॥
कुतुबश्शाहइब्राहीं तस्माद्दूरे पलायितः।
शतघ्नयस्तु विजयानगरस्य वशे गताः॥40॥
कल्याण्यादुर्गमेवन्तु विजित्य समरं तदा।
विजयी स वशे स्वीये तस्माच्छीघ्रं समानयत्॥41॥
सदाशिवस्य सेनायां शिखानष्टास्तु पीड़िताः।
चन्द्रवेदरसाब्जे तु तस्माद्धानिरजायत॥42॥
वृष्टिकाले सदाशिवो ह्यहमदनगरस्य च।
समीपे स्थापयामास पृतनां स्वां सुरक्षिताम्॥43॥
बंकोजी चाऽथ तिम्मोजी द्वावपि तौ सहायकौ।
महतीं क्षतिमायातौ तत्र तेनैव संस्थितौ॥44॥
तत्पितृव्यस्य पुत्रस्तु ज्योतियाजीति नामकः।
जले मग्नो मृतः सोऽभूत् तत् स्याद् दुःखकरं महत्॥45॥
शाहकुतुबइब्राहीं नेतृत्वे वेदसंख्यकाः।
सुल्तानास्तु विरोधे च विजयानगरस्य वै॥46॥

परस्परस्य कलहं दूरीकृत्य क्षणात्तदा।
विवाहौ रचयामासुः सौमनस्य विधित्सया॥47॥
सुल्तानालेः भगिन्यास्तु हुसेन्मुल्ताजसूनुना।
हुसेन्कन्याचांदबीबी तया सार्धं ह्यलेस्तथा॥48॥
शोलापुरस्य दुर्गं हि सुदृढं नीतिवत्तथा।
दत्तवान् तदसौ तस्यै चांदबीबी प्रशासिका॥49॥
जहांगीरशाहखानस्य वशरस्य वधात् पुनः।
कलहे तु निवृत्तेऽपि कलहाङ्कुरमजीजनत्॥50॥
अलीवरीदशाहश्च सोऽलीआदिलशाहकर।
न तत्र मिलितौ तस्मात् कलहः स्थित एव सः॥51॥
चत्वारस्ते शिखानष्टाः सुल्ताना दक्षिणस्य च।
नेत्रवेदरसाब्जे च शके सर्वे पुनस्तथा॥52॥
विजयानगरस्याऽथ विरोधं संविचार्य च।
शोलापुरं समागत्य नीतिवार्तां विचार्य ते॥53॥
तालीकोट्टायगमने प्रस्थिताः सत्वरं तु ते।
कमलोजी तु युद्धेऽस्मिन् समागन्तुं तु बाधितः॥54॥
नगेभवेदचन्द्राख्ये शके युद्धे हतश्च सः।
चालुक्यवीरपुरुषो दुर्दैवाभिहतस्तदा॥55॥
युद्धेनाऽनेन विजयानगरस्यतु राष्ट्रकम्।
दुर्दैवग्रसितं पूर्णं नाशं च समुपागतम्॥56॥
शास्ताऽहमद्नगरस्य बरारं संगृहीतवान्।
बीजापुरस्य शास्ता तु कर्नाटककोंकणौ॥57॥
तस्मिन् काले तु सुतरां महद्भयमुपस्थितम्।
चालुक्यान्वयजातानां स्वधर्मा लम्बिनामपि॥58॥
येमत्रावश्च माधोजी तुकोजीति त्रिसूनवः।
कमलोजीत्यस्य तदा त्रय आसन् तु पुत्रकाः॥59॥
कर्नाटके कोंकणो च विप्लवस्यैव कारणात्।
तेषां सम्पत्तिहानिश्च सन्जाता बहुधा तदा॥60॥
कलहो बन्धुभिः सार्धं संजातस्तु परस्परम्।
कलिकोलाहलो यत्र लक्ष्मीस्तत्र न तिष्ठति॥61॥
ततश्च दक्षिणे जातो तुरुष्काणां समन्ततः।
सद्याश्चाभ्युदयोदेशे हिन्दूनां हानिकारकः॥62॥
वेदाद्रिवेदचन्द्राब्दे सम्राडकबरस्य च।
स्वीकृता भृत्यता तेन खानदेशाधिपेन च॥63॥

फारुकीति प्रसिद्धेन नीतिमार्गं विधानता।
तेनाऽभवत्तदा रक्षा विस्तृते दक्षिणापथे॥64॥
वेदशास्त्ररसाब्जान्तं भेदनीतिस्तदा न[8] च।
मोगलानां प्रधानेन त्वकबरेणाऽत्र योजिता॥65॥
चन्द्रेषुरसचन्द्राब्दे अलीआदिलशाहकः।
बंकापुरे धारवाडेऽकरोदाक्रमणं पुनः॥66॥
कमलोजीत्यस्य बन्धोर्युद्धे बंकापुरस्य च।
बंकोजीत्यस्य पुत्रस्तु नरसोजीति संज्ञितः॥67॥
तथा च रावो वेलप्पाऽयुद्धयतां सार्धहायनम्।
तावप्राप्य तु साहाय्यमन्ते युद्धे पराजितौ॥68॥
अलीआदिलशाहस्तु तत्र देवालयान् समान्।
बभब्ज तरसा तत्र मस्जिदाश्च चकार सः[9]॥69॥
अस्मिन् युद्ध हि वेलप्पा रावो वीरो दिवङ्[10]गतः।
सहायकस्तु नरसोजीत्यस्य तु महाबलः॥70॥
बंकापुरान्नारसूजीपुत्रौ नानाजिराजुजी।
वेलप्पाराव भ्रातृव्यो मङ्गूजीनामकस्तथा॥71॥
प्रस्थाय कोंकणात् सर्वे बदाम्यां तुर्गलेऽपि च।
न्यवसन् यत्र तेषां तु पितृव्यो वीरपुङ्गवः॥72॥
मिलितो येमतो रावो कथां बंकापुरस्य च।
श्रुत्वा महद्दुःखमाप माधोजी तत्र संस्थितः॥73॥
सम्पाल्य नित्यं निजपूर्वजानां
व्रतं न राज्ये बिहितस्तु लोभः।
सदा स्वधर्मे निरतस्तथापि
प्राप्तुं तु दुःखं चुलुकान्वयैस्तुतैः॥74॥

॥इति चालुक्यराजअय्यणवंशचरिते काव्ये
चालुक्यान्वयसम्भूतानामात्यसागरपतनं नाम चतुर्दशः सर्गः॥

## सन्दर्भ

अजी आदिलशाहो हि ब्रह्मनीराजवंशीय आसीत् तथा च अली-अमिल-शाहोऽपि ब्रह्मनीराजवंशीय आसीत्।
बुर्हाननिजामशाहो हि बीजापुरस्य शासक आसीत्।
इब्राहीमौऽसौ ब्रीजापुरस्य बुर्हाननिजामशाहस्य सेनापतिरासीत्।
अलीवरीदशाहो हि ब्रह्मनीराजवंशीयो वीदरस्य शाह आसीत्।

1. अतिथिरिति सह्यत तदन्यथा तु करावुभौ।

क्रान्तितौ तु पुनस्तत्र करौ स्यातां न संशयः॥

2. वादः विवादः

3. चा यथापूर्वं स्वत्वमेव।

4. न ज्ञायते कथं जाता हसेनस्य शतघ्नयः।
अलीवरीदशाहऽइब्राहीमो हि बीदरस्य शास्ता ब्रह्मनीशाहवंशीय आसीत्। निजमशाह-इब्राहीमो हि स्वकन्यायाः जमीलायाः विवाहं अली-वरीदशाह-इब्राहीमेन समकारयत्।

5. हुसेनस्य च कन्याया : चांदबीबी—अलेः सह।

6. कृतौ विवाहौ तेनात्र दुर्गं शोलापुरस्य च।
यौ तुके सा प्राप्तवती चांदबीबीति विश्रुता॥

7. सद्योऽभ्युदयेदेशेषु

8. भेदनीतिर्न चालयत्।

9. अलीआदिलशाहस्तु तस्मिन् काले सुमन्दिरान्।
भङ्क्ताऽरचयत्तत्र मस्जिदानुत्तमान् पुनः॥

10. अस्मिन् युत्रे हतो वी वेलप्पा राव नामकः।

# ॥ अथ पञ्चदशः सर्गः॥

तदा ह्यादिलशाहस्य शासनस्थाधिकारिभिः[1]।
विरुद्धं तु मराठानामनौचित्यं महत्कृतम्॥1॥
बालकोंडाख्यदुर्गस्य[2] ग्रहणस्य विधौ सदा।
आसक्तिन्च मराठानां शङ्किताेन नित्यशः॥2॥
तेषां नाशे प्रयत्नांश्च इत्वा ते भयविह्वलाः।
आत्मरक्षार्थगास्ते च गोलकुण्डप्रशासनम्[3]॥3॥
तस्मादादिलशाहस्तु तदा तेषां हि दण्डने।
नैवालभतसाफल्यं तेनायं कूटनीतिकः[4]॥4॥
भूयो वीरान् स्वपक्षे च महाराष्ट्रान् विधित्सुना[5]।
बीजापूरे समायातुं प्रार्थितास्तेन ते तदा॥5॥
कमलोजीत्यस्य सूनुर्द्वितीयो नायको विदः।
तुकोजीत्यस्य नेर्तृत्वे मरठास्त्ते समागताः[6]॥6॥
ततः स बीजापूरस्य राजकन्यां विधानतः।
हिन्दुधर्मवतीं कृत्वा तुकोजी समुवाह ताम्[7]॥7॥
रूष्टस्तेनादिलशाहस्तु[8] तुकोजीत्यस्य चक्षुषी।
निष्काषिते बलात्तेन जातश्च स मदोन्मदः॥8॥
इभेषुरसचन्द्राब्दे शके वर्षे बलात् पुनः।
हत आदिलशाहस्तु नीतिमार्गच्च्युतो हि सः[9]॥9॥
तत्रासीन्नगरे जाता विशिष्टा क्वापि देववाग्।
मन्दिरध्वंसनिरतो निर्दयोऽनीति कारणात्[10]॥10॥
गमिष्यति यथाशीघ्रं पन्चत्वं निरयं तथा।
रुष्टास्तुष्टाश्च तत्रस्थाः नेमुस्ते तां परां गिरम्॥11॥
इब्राहीम् कुतुबश्शाहो मृतोऽस्मिन् हायने दुःखी।
अलीबरीदशाहश्च सूयाश्वेषुरसाब्जके॥12॥

मृतास्ते पूर्वमेवासन् तेषां सुल्तानकत्रयम्।
दक्षिणापथराज्येषु धर्मकेतुविकृन्तकम्॥13॥
कलहं दक्षिणस्थानां सुल्तानानां परस्परम्।
दृष्ट्वा ह्यकबरो वीरो जेतुं दक्षिणभारतम्॥14॥
रामाब्धिरसचन्द्राब्दे शके शक्तिसमन्विताम्।
स्वसेनां प्रेषयामास दक्षिणस्य जये ह्यसौ[11]॥15॥
अहमदपरं समाक्रम्य सेनामादाय ह्यकबरः[12]।
जित्वा च तद्गतां सेनां सेना सा स्ववशेऽकरोत्॥16॥
गजाब्धिरसचन्द्राब्दे चांदबीबीति विश्रुता।
भीत्या प्रेम्णा बरारं सा प्रादात् तस्मै तरस्विनी[13]॥17॥
तदा त्वादिलशाहो हि शोलापूरं समन्ततः।
कल्याणीन्वापि जग्राह बीजापूरस्य शासकः॥18॥
अहमद्पूरसुल्तानं वशे कृत्वा हठात् पुनः।
प्रान्ते ग्वालियरे यत्नात् स्थापयामास नीतिविद्॥19॥
वेदरामाभि चन्द्रान्तं शशिवह्न्यब्धि चन्द्रतः।
आसीत् कल्याणि दुर्गं हि वर्षाण्येतस्य[14] शासने॥20॥
तत आदिलशाहेन कमलोजी सुतस्य वै।
माधोजीत्यस्य तत्सूनोः साबाजीत्यस्य सत्वरम्॥21॥
खण्डोजीत्यस्य तत्सूनोस्तद्भ्रातृणां तथैव च।
अधिकारास्तु कष्टेन[15] प्रान्ते कर्नाटके शुभे॥22॥
बंकापुरे कोंकणे च वदाम्यां वदता तथा[16]।
कल्याण्यां तेन धूर्तेन स्वीकृता आत्मानिना[17]॥23॥
एतन्मात्रेण सन्तुष्टा नैव जातास्तु ते पुनः।
दत्तस्याप्यधिकारस्य भोगं चक्रुर्नते तदर[18]॥24॥
उभयस्थाकूटनीतीनां कारणानां प्रसारतः।
उपभोगं तु लब्धास्ते भुन्जन्ति स्म न कारणात्[19]॥25॥
विजयानगरस्याथ राज्ञा सुल्तान संज्ञकैः।
दक्षिणस्थैर्यदा द्वेष आसीत्प्रचलितस्तदा॥26॥
तस्मात् कल्याणिदुर्गस्थां विष्णोर्मूर्तिं सुशोभनाम्।
रत्नैस्तु खचितां दिव्यां प्राचीनां हि कुलागताम्॥27॥
तुसष्काणान्च[20] राज्येत्र तस्या रक्षान सम्भवा।
कम्मोजी सुविचार्यैवं विजयानगरस्य वै॥28॥
प्रधानेन समं धीरस्तामादाय ततः सुधीः[21]।
स्थापयामास मूर्तिं तां विजयानगरे तदा॥29॥

मन्दिरेऽर्चाविधौ तत्र ह्यधिकारी नियोजितः।
आसीदत्र स्वतन्त्रः सः देवार्चनविधौ वृती[22]॥30॥
अनेके नियमास्तत्र कृता मन्दिररक्षणे।
यथामन्दिरकार्यं तद् यथावत्प्रचलेत् सदा॥31॥
व्यवस्थायां मन्दिरस्य नियमानां च पालने।
यदि कोऽपि प्रमाद्येत दण्डनीयो भवेत्तु सः॥32॥
द्रव्यं वै गडियानाख्यमूकोत्तरशतं[23] तदा।
दण्डरूपेण गृह्येत प्रमादकरणेन च॥33॥
तथा प्राप्तं तु तद् द्रव्यं देवपूजार्चनादिषु।
प्रयुज्यते स्म तत्रस्था व्यवस्थेयं कृता स्थिरा॥34॥
तत्संख्याकन्च तद्द्रव्यं दीयते स्मापराधिना।
ग्रामाय चापि विधिना यत्र तन्मन्दिरं स्थितम्॥35॥
व्योमाङ्केष्वब्जवर्षीयं तत्राऽऽस्ते ताम्रपट्टकम्।
बंकापुरस्य सामन्तः प्रधानः कथितोत्र सः॥36॥
कम्मोजी यस्य कर्तव्यमग्रे लिखितवान् पुनः।
पदातीनां सहस्रैकमारबाश्वं तदर्धकम्॥37॥
सैन्यं सुसज्जं संस्थाप्य कम्मोजीति मनस्विना।
तद्भ्राता च महावीरोऽप्पाजीत्यभिधानभाक्॥38॥
''कलेगा केसरी'' नाम्ना प्रसिद्धिमगमत्तदा।
साधूनां रक्षणं सम्यगसाधनां विनाशनम्॥39॥
स्वप्रतापेन विहितं ताभ्यां तद्वंशजैः पुनः।
न कदापि सुरापानं कृतमित्युक्तमत्र वै॥40॥
सद्गोत्रजाताश्च विशुद्धरक्ताः
स्वगोत्रधर्मान् परिपालयन्तः।
शीले च दाने च गुणेषु ते पुनः
चालुक्यवंश्याः सुदृढ़व्रतेस्थाः॥41॥
चरितं तु तेषां लोकेषुपूतं
भरितं जगत्यां राष्ट्रं हि धर्मः।
हरितं धरा स्यात् लोकाः प्रसन्नाः
विलसन्तु वेदाः वर्णाश्रमाश्च॥42॥

॥इति श्रीचालुक्यराज-अय्यणवंशचरिते काव्ये विजयानगरे
कम्मोजीकृतविष्णुमूर्तिस्थापनं नाम पन्चदशः सर्गः॥

# सन्दर्भ

1. आदीलशाहस्य तदा शासने त्वधिकारिणाम्—क. पुस्तके
2. यद्बालकोण्डादुर्गस्य—ग. पुस्तके
3. गोलकुण्डा शाहपार्श्वे गतास्ते चण्डतारक्षणे—ख. पुस्तके
4. सफलो नैव जातोऽयं तेनासौ नीतिकोविदः। —ग. पुस्तके
5. पुनर्मराठीवीरांस्तानानेतुं निजपक्षकं।
   बीजापूरेः समायातुं निमन्त्रणमथाकरोत्॥—क. पुस्तके
6. तुकोजी मकस्तस्य नेतृत्वे ते समागताः—ग. पुस्तके
7. तस्माद् बीजापूरगतां राजकन्यां विधानतः। कृत्वा हिन्दूधर्मवतीं तुकोजी समुपाहताम्।
8. तस्मादादिलशाहस्तु—क. पुस्तके
9. जातासीत्तत्र नगरे विशिष्टा तु भविष्ववाक्।
   यदा भग्नं तु दुष्टेन हिन्दूनां मन्दिरं शुभम्॥
10. यदयं निर्दयो दुष्टो स्वस्यैवानीतिकारणात्।
    गमिष्यतीह पंचत्वं शीघ्रमेव न संशयः॥
11. विजयस्यैव हेतु ना—ग. पुस्तकं
12. अहमदपुरनामाख्यमाक्रम्य सुमहत्पुरम्।—क. पुस्तके
13. मुगलेभ्यो बरारं तु प्रादात् प्रेम्णा भयेन च। —क. पुस्तके
14. सततं तस्य—ग. पुस्तके
15. तु कष्टेन—क. पुस्तके
16. वदाभ्यां च तथैव च—ग. पुस्तके
17. कल्याण्यान्चापि तु तदा स्वीकृतास्तेन मानिना।—क. पुस्तके
18. दत्तस्य चाधिकारस्योपभोगं नैव प्राप्नुयुः—ग. पुस्तके
19. आसन् तत्र कारणानि बहून्यन्यानि येन वै।
    प्राप्तानामप्युपभोगं कर्तुं नैवाशकन् तदा॥
20. मुस्लिमानां—क. पुस्तके
21. प्रधानेन सहैवैनां स्थानात्तस्मात् प्रगृह्य च। —ख. पुस्तके
22. आसीत् स्वतन्त्रः सोऽप्यत्र पूजनार्चादिकर्मसु॥—ग. पुस्तके
23. गडियानाख्यद्रव्यं वै—ग. पुस्तके

# चालुक्यराजाय्यणवंशचरितमहाकाव्ये राज्यानि

अत्रास्मिन् काव्ये ह्यनेकेषां राज्यानां वर्णनं कविना कृतम्, तेषामत्र नामानि प्रस्तूयन्ते—1. चालुक्यराज्यम्, 2. पल्लव राज्यम्, 3. राष्ट्रकूटराज्यम्, 4. नलवंशीयराज्यम्, 5. कदम्बवंशीयराज्यम्, 6. वङ्गराज्यम्, 7. कलिङ्गराज्यम्, 8. वट्टूरराज्यम्, 9. मगधराज्यम्, 10. मद्रकराज्यम्, 11. केरलराज्यम्, 12. मूषकराज्यम्, 13. गाङ्गराज्यम्, 14. पाण्ड्यराज्यम्, 15. द्रमिलराज्यम्, 16. चोलराज्यम्, 17. चालुकराज्यम्, 18. लाटराज्यम्, 19. कान्यकुब्जराज्यम्, 20. गंगवंशीयराज्यम्, 21. अलूपवंशीयराज्यम्, 22. मालवराज्यम्, 23. गुर्जरराज्यम, 24. कोशलराज्यम्, 25. कावेरराज्यम्, 26. कालभ्रराज्यम्, 27. विलराज्यम्, 28. हैहयवंशराज्यम्, 29. शैलरवंशीयराज्यम्, 30. सिन्धुदेशराज्यम्, 31. पन्चालराज्यम्, 32. चेदिराज्यम्, 33. कामरूपराज्यम्, 34. गौडराज्यम्, 35. चक्रकोटराज्यम्, 36. गाङ्गकूटराज्यम्, 37. वेंगीराज्यम्, 38. कुन्तलराज्यम्, 39. सौराष्ट्रराज्यम्, 40. दर्शार्णराज्यम्, 41. आन्ध्रराज्यम्, 42. अवन्तिराज्यम्, 43. कुरुराज्यम्, 44. द्रविडराज्यम्, 45. खशराज्यम्, 46. आभीरराज्यम्, 47. यादवराज्यम्, 48. बर्बरराज्यम्, 49. मरूराज्यम्, 50. नेपालराज्यम्, 51. वराटराज्यम्, 52. कहाटराज्यम्, 53. कश्मीरराज्यम्, 54. होसालराज्यम्, 55. शिह्यियावंशराज्यन्चेति राज्यानि। राज्यान्येतानि बहुवारं चालुक्यैर्विजितानि चालुक्यानां प्रतिपक्षीयाः पल्लवाः, राष्ट्रकूटाः, कदम्बाः, हैहयाः यादवाश्च चालुक्यानां सम्बन्धिनोऽप्यासन्।

**चालुक्यराजाय्यणवंशचरितमहाकाव्ये राजवंशीयसम्बन्धाः—**

1. विजयादित्यस्य पुत्रश्चालुक्यकुलश्रीविवर्धको विष्णुवर्धनः, अस्य विद्यया, विक्रयेण प्रभावितः पल्लवानां राजा कान्चीश्वरः महता विनयेन रूप-गुणभूषितां स्वकन्यामस्मै प्रायच्छत्।

   अस्योत्कटप्रतापेन प्रीतः पल्लववंशजः।
   कान्चीश्वरो महाराजो हर्षेण विनयेन च॥
   प्रादात् कन्यां निजां तस्मै सुन्दरीं गुणगुम्फिताम्।
   दासीदासं धनं रत्नं श्रियं सिन्धुसमुद्भवाम्[1]॥

2. तृतीयो विजयादित्यो द्वितीयस्य पुलकेशिनः प्रपौत्र आसीत्। अस्य पुत्रो द्वितीयो विक्रमादित्योऽभवत्। अयं राजा विद्यया विनयेन च, ओजसोत्साहेन च, बलेन विक्रमेण च, नयेन शीलेन च, पराक्रमेण प्रतापेन च विभूषितः शत्रूणां मानभन्जकः प्रजानामनुरन्जकः आसीत्। लोकमहादेवी त्रैलोक्यमहादेवी चास्य पत्न्यावास्ताम्। ते रूपगुणविभूषिते हैहयराजस्य कन्ये, तयोर्मध्ये लोकमहादेवी ज्येष्ठासीत्[2]।

3. विमलादित्यस्य पुत्रो भीम आसीत्। अयं भीम एव द्वितीय आदित्य वर्माभवत्। उज्जयिनीपतेः कर्मसेनराजस्य राज्ञयाः शशाङ्क-पुरराङ्नन्दिन्याः कन्या ह्यदित्यवर्मणो द्वितीयस्य राज्ञी ह्यासीत्[3]।

4. कृष्णराजस्य कन्या प्रथमस्य अय्यणस्य पत्न्यासीत्। अयं प्रथमोऽय्यणस्तृतीयस्य विक्रमादित्यस्य पौत्र आसीत्[4]।

5. राष्ट्रकूटस्य राज्ञः कर्कस्य पुत्री जाकब्बा चालुक्यानां राज्ञो द्वितीयस्य तैलपस्य राज्ञी ह्यासीत्। एषैव लोके जक्कलदेवीति नाम्ना प्रसिद्धाभवत्[5]।

6. राज्ञोममासाख्यस्य पुत्री लक्ष्मीरासीत्। सा तैलपस्य द्वितीया राज्ञी आसीत्[6]।

7. राष्ट्रौढवंशसंभूतस्य राज्ञः कृष्णराजस्य पुत्री चन्द्रिका दशवर्मणः पुत्रस्य चालुक्यकुलश्रेष्ठस्य द्वितीयस्याय्यणस्य देवी आसीत्। कृष्णराजो ह्ययणस्य श्वशुर आसीत्।[7]

8. गोवा प्रान्ते राज्यं प्रकुर्वतः कदम्बवंशीयस्य द्वितीयस्य जयकेशिन महिषी मेयलासीत्। मेयला चालुक्यवंशजातस्य राज्ञः सोमेश्वरस्य कन्यासीत्[8]।

9. अय्यणस्य भगिनी नयनिपुणा राज्यकार्ये दक्षा अक्का कदम्ब-वंशीयस्य सामन्तस्य षष्ठदेवस्य पत्न्यभूत। साय्यणस्य भगिनी अक्का युद्धसंचालने दक्षा युद्धक्षेत्रे च साक्षाद् भैरवीवासीत्। विदुष्येषा सनातनधर्मशास्त्रेषु परिनिष्ठता जैनबौद्धशैववैष्णवसम्प्रदायदर्शनेषु विदुषी समेषु धर्मेषु समदृष्टिमती चाभूत्[9]।

10. अय्यणस्यैका कन्या कदम्बवंशीयस्य राज्ञ इष्टदेवेन सार्धं 944 शकवर्षे विवाहिताऽभवत्[10]।

11. अय्यणस्य ज्येष्ठः पुत्रश्चन्द्रदेवस्तस्य विवाहो हि रूपमत्या सार्धम-भवत्। रूपमती भानुङ्गलस्य राज्ञः सोमदेवस्य कन्यासीत्। सोमदेवोऽयं अक्कायाः पुत्र आसीत्। परन्तु सोमदेवस्य निजा मता वनवारस्याधिकारिणी कन्यासीत्[11]।

12. विजल्ला चालुक्यानां सेनानायकः, निर्बलान् चालुक्यान् वीक्ष्य विजल्ला 1239 शकवर्षे ह्यात्मानं राजनमघोषयत्। लिङ्गायतानां शासको बसवा आसीत्, तस्य भगिनी पद्मावत्यासीत्। स बसवा स्वभगिन्याः पद्मावत्याः विवाहो विजल्ला अनेन साकंमकरोत्[12]।

13. शिंदेवंशस्य चन्द्रदेवी चालुक्यस्याय्यणस्य पत्नी ह्यासीत्[13]।

14. वारङ्गलस्य राजा गणपतिस्तस्य द्वितीया दुहिता रुद्राम्बा सा चालुक्यान्वयभूषणस्य वीरभद्रेश्वरस्य पत्न्यासीत्।[14]

15. वारङ्गलस्य शासिकायाः वीरभद्रेश्वरस्य पत्न्याः रुद्राम्बायाः कन्या मुम्मदाम्बासीत्। तां सा यादवान्वये देवगिर्यां प्रादात्। तस्या पुत्रो रुद्राम्बायाः दौहित्रो दत्तकविधानेन तं रुद्राम्बा पुत्रं कृत्वा राज्याधिकारिणमकरोत्। स हि मुम्मदाम्बायाः पुत्र एवं प्रतापरुद्र इति नाम्ना सुख्यातोऽभवत्[15]।

16. चालुक्यस्य कामदेवतृतीयस्य विवाहो हि कदम्बकुलजातया पद्ममालया साकमभवत्[16]।

17. सोमेश्वरचतुर्थस्य पुत्रः कामदेवस्तस्य विवाहो हि कदम्बवंशीयस्य पुरन्दररायस्य कन्यया साकमभवत्। कदम्बवंशस्यैषैवाधिकारिण्या-सीत्[17]।

18. कामदेवतृतीयस्य प्रथमा पत्नी कमलादेवी गोवानृपस्य त्रिभुवनमल्लस्य कन्यासीत्। त्रिभुवनमल्लो हि कदम्बवंशीय आसीत्[18]। एषा षष्ठदेव-द्वितीयस्य भगिनी कदम्बवंशाधिकारिणी चासीत्।

19. कामदेवतृतीयस्य द्वितीया पत्नी शेलरवंशजस्य सह्याद्रेः राज्ञः कन्यासीत्[19]।

20. यादवानां राजा रामदेवः, सहि स्वां कन्यां चालुक्याय हरिपालाय ददौ। यादवः शङ्करदेवो हि हरपालस्य श्यालक आसीत्। स हि शंकरः 1390 शके वर्षे मल्लिककफूरनामकेन घातितः[20]।

21. 1484 शकवर्षे ताज्जदीन फिरोजशाहो हि परथाविषयं गृहीत्वा बुक्कया-क्रमत्। अस्मिन् युद्धे पराजितः फिरोजशाहः पुनराक्रमात् द्वितीये समाक्रमणे विजयी फिरोजः बुक्कस्य कन्यया सार्धं विवाहमकरोत्। कथ्यते यत् सा वेश्यायां जाता बुक्कस्य कन्यकासीत्।[21]

22. निजामशाह-इब्राहीम इत्यस्य कन्या जमीला, तस्याः विवाहो वरीद-शाहइब्राहीमद्वितीयेन सममभवत्[22]।

23. हुसेनमूल्ताजसुलतानो हि शोलपुरस्य शासकः, तस्य कन्या चांदबीबी, तस्याः विवाहो हि सुलतानालीरथनेन साकमभवत्[23]।

24. सुलतानालेर्भगिन्याः विवाहो हि हुसेनमुल्ताजसूनुनाभवत्।

## सन्दर्भ


1. चालुक्यराज. 2/10-12
2. तदेव 5/24-27
3. चालुक्यराज. 5/11-12
4. तदेव 6/35
5. तदेव 7/4-5
6. तदेव 7/6
7. तदेव 7/22-23
8. चालुक्यराज. 7/59-60
9. तदेव 7/28–30
10. तदेव 7/25-27
11. तदेव 9/1-4
12. चालुक्यराज. 9/22-23
13. तदेव—9/42-43
14. तदेव 9/55-60
15. तदेव 9/67-69
16. तदेव 9/72
17. तदेव 10/1-3
18. चालुक्यराज. 10/4-6
19. तदेव 10/9
20. तदेव 10/15-17
21. तदेव 12/10-16
22. तदेव 14/34-35
23. चालुक्यराज. 2/4

# चालुक्यराजाय्यणवंशचरितमहाकाव्यस्थनां स्थानानां विवरणम्

चालुक्यवंशस्य सम्भवः सोमादभवत्। अस्मिन् वंशेऽनेके प्रतापिनो राजाभवन्। महान् प्रतापी उदयनो हि, यस्य पुत्रो भरतोऽभवत् स अस्य वंशस्यैव पुरुष आसीत्। उदयनात् परमस्मिन् वंशे जाता एकोनषष्ठि राजानः। एकोनषष्ठिराज्ञामनन्तरं वर्ण्यविषयस्य पूर्वं त्वन्ये अशीतिसंख्याः राजानोऽभवन्। अतः परं राजा कोल्हालोऽभवदस्मिन् चालुक्यवंशे। चालुक्यश्चलुक्यो वा ह्येष्वेव राजसु कुत्रचित्स्थित इति कवेर्निष्ठा।

राजाकोल्हालो महाराष्ट्रे (अद्यतने) स्वनाम्ना कोल्हापुरं नगरं रचयामास। कोल्हापुरस्याम्बायाः मन्दिरमतीव सुप्रसिद्धिं यत्र स्थिता सा जगदम्बा समेषां योगक्षेमं वहति।

अनन्तरं कोल्हालस्य वंशजाः दक्षिणतः भारतमुत्तरमागत्यायोध्यां स्वां राजधानीं चक्रुः। अयोध्या नाम नगरी सप्तपुरीषु प्रथमास्ति। अत्रैव सूर्यवंशीयाः राजानः शासनं चक्रुः। चालुक्यश्चित्रकण्ठोऽत्र 341 शकवर्षसविधौ राजासीत्[1]। विजयादित्यश्चित्र-कण्ठस्य भ्रातासीत्। भ्रात्रा भर्त्सितो विजयादित्यो देशस्य दक्षिणं भागं जगाम[2]।

अयोध्यातः प्रचलितो विजयादित्य दक्षिणापथं गत्वा नर्मदायास्तटे माहेश्वरसन्निधै, एकस्मिन् ग्रामे वसतिं चकार[3]।

अजन्तापर्वतश्रेणिस्तु प्रसिद्धैव, अत्र सकुटुम्बो विजयादित्य कांश्चिद्दिव-सान्नयापयत्[4]।

दक्षिणे भारते मुडिवेडग्रामे सोमयाजिनो विष्णुभट्टस्याश्रमे न्यवसद्विजयादित्यस्त्रि-लोचनेन न पराजितो भूत्वा त्रिलोचनो हि पल्लवानां राजासीत्[5]।

दक्षिणे भारते चालुक्यगिरिस्थानम्, बाल्ये विष्णुवर्धनस्तत्रैव तपः कृत्वा महतीमात्मशक्तिं संग्रह्य राजाधिराजोऽभवत्[6]।

वातापी चालुक्यानां राजधानी या हि रणरागस्य पुत्रेण प्रथम-पुलकेशिना निर्मिता सा वातापी कीर्तिवर्माणं यावद् वैभवशालिनी भूत्वा तिष्ठत्[7]।

नलवाडी महाराष्ट्रसुदूरदक्षिणस्था, एषा नलवंशीयानां राज्ञां राजधान्यासीत्[8]।

कानडराज्यं कोंकणस्य सविध एवासीत्[9]।

कोंकणं महाराष्ट्रस्य सुदूरदक्षिणभागे रत्नागिरेः समीप एव स्थितो भूभागः। अत्रस्थाः ब्राह्मणात्मात्मानं कोंकणस्थ ब्राह्मणा इति कथयन्ति।[10]

रेवतीद्वीपं कलचुरीवंशीयानामासीत्। कीर्तिवर्मणो भ्राता मङ्गलीशस्तज्जित्वा स्वाधिकारेऽकरोत्[11]।

वनवासीति वनवासी दुर्गं द्वितीयः पुलकेशी ससैन्यं गोविन्दं विजित्य स्ववशमानयत्[12]।

पिष्ठपुरदुर्गं कुलालदुर्गन्च द्वितीयेन पुलकेशिनैव स्थायत्तीकृतम्[13]।

ईरानदेशः भारतस्य पश्चिमे स्थितो देशः, द्वितीयपुलेकेशिनः समये इरानदेशस्य शास्ता खुसुरासीत्। स मैत्रीबुद्धया स्वदूतं पुलेकेशिनं प्रैषयत्[14]।

चीनदेशो हि भारतवर्षस्योत्तरे स्थितो देशः, द्वितीयस्य पुलकेशिनो राज्यकाले चीनदेशीयः यात्री हुएन्त्साङ्गो भारतं पुलकेशिनो राज्ये चागत्य सर्वं दरीदृश्य यात्रावृत्तेऽत्रस्थं सर्वं वृत्तं तेन वर्णितम्[15]।

कान्चीनगरी पल्लवानां राजधानी, या हि प्रथमेन चालुक्यकुलावतंसेन द्वितीयपुलकेशिनः पुत्रेण प्रथमविक्रमादित्येन पल्लवानां राजानं परसिंहवनर्माणं विजित्य स्ववशे कृता[16]।

पट्टलकडे चालुक्यानां राजधानी वातापी तस्या एको भागः पट्टलकड इति तत्र विक्रमादित्यस्य पौत्रो विजयादित्यो विजयेश्वरमन्दिरं कारयामास[17]।

राजसिंहेश्वरस्य मन्दिरमस्ति। मन्दिरमेतत् पल्लवानां राजधानी कान्चीतस्यामस्ति। विक्रमादित्यस्य प्रथमस्य पौत्रो विक्रमादित्यो द्वितीयः, स पल्लवानां राजानं नन्दिपोतं विजित्य कान्चीं स्ववशमानीय राजसिंहेश्वरमन्दिरे शिलालेखं सन्तस्थौ। तदद्याप्यस्ति।

पातुङ्गलप्रदेशः दक्षिणभारतीयः प्राचीनश्चालुक्यानां प्रदेशः यो हि कीर्तिवर्मणा माधवशर्मणे विप्राय प्रदीयते स्म[18]।

महिशूरं मैसूरनगरं कर्नाटकेस्थितम्, अत्रैव पुरा चालुक्यकुलजेनादित्यवर्मणा स्वबुद्धिबलनयेन स्वल्पं राज्यं संस्थापयामास[19]।

सिन्धुदेशो ह्यधुना पाकिस्तानस्य सिन्धुप्रदेशो वर्तते[20]।

कल्याणी चालुक्यानां राजधानी यथा वातापी[21]।

रणदेवी चालुक्यानां राजधान्याः कल्याण्याः नाम, एवं कल्याणी चालुक्यराजरान्येव रणदेवीति[22]।

धारा परमारवंशीयस्य राज्ञः भोजस्य राजधानी सुप्रसिद्धा[23]।

काशी सप्तनगरीषु प्रसिद्धा मोक्षदाशङ्करस्य नगरी, यासौ उभरभारते, अधुनातूत्तरप्रदेशस्य पूर्वीयभागे राजते[24]।

हारदवडि दक्षिणभारते येतागिरिस्तस्य समीपः स्थितो ग्रामः[25]।

कल्याणीविपिनं कल्याण्याः समीपस्थितं वनम्[26]।

अकण्यागाचिका ह्येका पर्वतगुहास्ति। गुहेयं त्रिपुरान्तसरः समीपं एवास्ति। अत्रैव अय्यणस्य तद्गुरोः शम्भोश्च समाधी वर्तेते[27]।

इरट्टपाडी कोल्हापुरस्य दक्षिणपूर्वदिग्भागेकर्नाटकेऽस्ति[28]।

चांदवादादुर्गं हि चन्द्रादित्येन कृतम्। चन्द्रादित्यो द्वितीयस्य पुलकेशिना पुत्र आसीत्। अस्य दुर्गस्य जीर्णोद्धारं अय्यणस्य ज्येष्ठः पुत्रश्चन्द्रदेवोऽकरोत्[29]।

धारवाडप्रदेशः दक्षिणे सुप्रसिद्धः, तस्य समीप एव सूवीप्रान्तमासीत्। सूवीप्रदेशो हि गंगवंशीयानां राज्ञामासीत्। चालुक्यो द्वितीयस्तैलपो राजा गंगवंशीय राजानं जित्वा सूवीप्रान्तं स्ववशमकरोत्[30]।

साममगढदुर्गं कोंकणप्रान्ते तथा च नेरूरादुर्गमपि कोंकण एव स्थितमआसीत्[31]।

पहन्कुटी गोकाग्रं चोभौ भूभागौ शिंदियाराज्याङ्गभूतावास्ताम्, तयोरुपरि प्रशासनं नरसूजीति नामा चालुक्यः 1239 शकवर्षाणां सविधेऽकरोत्[32]।

देवगिरी यादवानामासीत्। अस्य स्थानस्य स्थितिस्तु कोंकण-कर्नाटकयो-र्मध्येऽस्ति[33]।

गोवात्वधुना सुप्रसिद्धं भारतस्य प्रान्तं महाराष्ट्रस्य दक्षिण-पश्चिमभागे समुद्रस्य तटे स्थितमस्ति[34]। अस्य प्राचीनं नाम गोभागपट्टनमस्ति।

वारङ्गलं राज्ञो गणपतेः राजधान्यासीत्। रुद्राम्बा गणपतेः कनिष्ठा कन्यासीत्। सा हि वीरभद्रेश्वरस्य पत्नी रुद्रदेवति नाम्ना वारङ्गलं शशास[35]।

पानुङ्गलं शाङ्गपाणिनः शासन आसीत्। शाङ्गपाणी द्वितीयस्य जयतुङ्गिनः कनिष्ठः पुत्र आसीत्। वारङ्गलं पानुङ्गलं च राज्ये दक्षिणभारते कर्नाटके त्वास्ताम्[36]।

भूदरगढदुर्गं कोंकण आसीत्। दुर्गमिदं शेलरराजस्यासीत्। तद्धि वैवाहिक-सम्बन्धादयौतकरूपे चालुक्यवंशे समागच्छत्[37]।

दिल्ली प्रसिद्धा भारतवर्षस्य राजधानी[38]।

नन्दूरवारं महाराष्ट्रे राज्यमासीत्। नन्दूरवारं हि यादवानामासीत्। यादवराजराम-देवश्चालुक्याय कर्णदेवाय तत् प्रादात्। कर्णदेवस्तु गुर्जरदे आसीत्[39]।

द्वारावती सुप्रसिद्धा नगरी। अलाउद्दीनतः पराजितो बल्लालो हि स्वकीयां स्वल्पकं राज्यमत्र संस्थापितवान्[63]।

कृष्णानदी घटप्रभानदी चाधुनान्ध्रप्रदेशवाहिन्यौ वर्तेत[10]।

कलाबगूरं, मूघोलं कामवसि भूभागास्तु दक्षिणापथस्थाः सन्ति[11]।

कोहीरदुर्गं पुरा चालुक्यशासन एवासीत्, पुनस्तेभ्योगतन्, ततः अलाउद्दीन ब्रह्मनशाहेन जित्वा तेषां शासनं स्वायत्तीकृतम्[12]।

त्रिचनापल्लीति सुप्रसिद्धा दक्षिणभारतस्य नगरी[13]।

बंकीपुरं चालुक्यबांकदेवेन निर्मितम्[14]।

गुलबर्गदुर्गं गुलबर्गे आसीत्। गुलबर्गं हि दक्षिणभारते स्थितम्[15]।

दौलताबादं सुप्रसिद्धिं नगरम्। मुहम्मदतुगलकेन दिल्लीतः दौलताबादे राजधानी नीतासीत्[16]।

बरारदेशः सुप्रसिद्धं दक्षिणस्थं राज्यमासीत्[17]।

वीरदरप्रदेशः सुप्रसिद्धं दक्षिणापथस्थमेकं राज्यमासीत्[48]।

दाभोलं गोवानिकटे समुद्रतटेऽस्ति[49]।

गुर्जरदेशोऽधुना सौराष्ट्रप्रदेशे इति नाम्ना भारतस्य मानचित्रेऽस्ति[50]।

बगलानाराज्यमासीत्। यत्र 1338 शकवत्सरसविधे मानसिंहो राजा आसीत्[51]।

विजयानगरं तु सुप्रसिद्धं दक्षिणभारतस्य राज्यं नारन्च[52]।

कौलाशं विजयनगरसमीपस्थं राज्यमासीत्[53]।

रायचूरं विजयनगरसमीपस्थं राजयमासीत्[54]।

वेलम्पालम्भेति स्थानं तच्च दक्षिणे भारते[55]।

तिलङ्गानाप्रदेशोऽद्युनान्ध्रप्रदेश[56]।

गोलकुण्डाप्रदेशो हि आन्ध्रप्रदेश एवास्ति[57]।

कौथलं हि आन्ध्रप्रदेशे एवास्ति[58]।

मुड्गलं ब्रह्मनीशाहस्यालाउद्दीनस्य शासन आसीत्[59]।

तुङ्गभद्रा नदी दक्षिणे भारते विद्यते[60]।

पाङ्गुनं दुर्गं विजयानगरस्यासीत्[61]।

बसरा हि दूरानदेशे सागरतटे नगरं, अत्र बसरास्थाने पोतविश्रान्तिस्थानमस्ति। बसराखाडींति प्रसिद्धो सामुद्रिको भागः यस्मानिर्गताः मुक्ता एव मुक्ता भवन्ति[62]।

बीजापुरं महाराष्ट्रे स्थितं नगरं पुरा राज्यमासीत्[63]।

खेलनादेशो हि महाराष्ट्रे राज्यमासीत्[64]।

विशालगढदुर्गं मराठानां राज्ञामासीत्[65]।

सुघोलग्रामो हि महाराष्ट्रे वर्तते[66]।

मदीना मुस्लिमजनानां तीर्थस्थानम् स्थानमेतदरवभूभागेऽस्ति[67]।

मक्का इसलामधर्मपरायणानां मीर्थस्थानं तच्चारबभूभागे वर्तते[68]।

सोनगीरं महाराष्ट्रेऽस्ति[69]।

कराटं राज्यमासीत्। तदिदानीं महाराष्ट्रपेदेशस्य भागः[70]।

संगमेश्वरं कोंकणे राज्यमासीत्। तदिदानीं महाराष्ट्रे वर्तते[71]।

वेलगांवनगरं महाराष्ट्रेऽस्ति[72]।

राजापुरं राज्यं कोंकणे ह्यासीत्। इदानीं राजापुरं महाराष्ट्रेऽस्ति[73]।

मीरजनगरं महाराष्ट्रे वर्तते[74]।

होनावरं गोवाप्रान्तेऽस्ति[75]।

अंजेदीरं गोवाप्रान्तेऽस्ति[76]।

सोलापुरं महाराष्ट्रे नगरं विद्यते[77]।
परेण्डेस्थानं महाराष्ट्रे वन्यं जलीयन्चासीत्[78]।
मांग इति मराठाशासनेतृवेकं राज्यमासीत्[79]।
कुडालं महाराष्ट्रे स्वल्पकं राज्यमासीत्[80]।
तालीकोहं दक्षिणभारतेऽस्ति[81]।
अहमदनगरं दक्षिणभारतेऽस्ति[82]।
खानदेशो हीदानीं महाराष्ट्रस्य भूभागोऽस्ति[83]।
बालकोण्डादुर्गं मराठाशासकानामसीत्[84]।
ग्वालियरनगरं शिंदियावंशस्य राजधानीभूत्वा प्रसिद्धिं गता[85]।
ग्वालियरनगरं मध्यप्रदेशे विद्यते[86]।
वदामीनगरं महाराष्ट्रेऽस्ति[87]।

## सन्दर्भ

1. चालुक्यराजा. 2/4
2. तदेव 2/3
3. तदेव 2/4
4. तदेव 2/5
5. तदेव 2/18
6. तदेव 2/30, 37
7. चालुक्यराज. 3/9-10
8. तदेव 3/17
9. तदेव 3/17
10. तदेव 3/17
11. तदेव 3/30, 4/5
12. तदेव 4/22
13. तदेव 4/29
14. चालुक्यराज. 4/34-35
15. तदेव 4/36
16. तदेव 4/59
17. तदेव 5/13
18. चालुक्यराज. 5/20
19. तदेव 5/37
20. तदेव 6/9
21. तदेव 6/13, 16
22. तदेव 6/24
23. तदेव 7/22, 7/35
24. चालुक्यराज–8/17

25. तदेव 8/34
26. तदेव 8/34
27. तदेव 8/46
28. तदेव 8/49
29. तदेव 4/51, 9/1, 3-6
30. तदेव 9/7-8
31. चालुक्यराज. 9/11
32. तदेव 9/17
33. तदेव 9/48
34. तदेव 9/51
35. तदेव 9/55-60
36. चालुक्यराज—9/64
37. तदेव 10/10
38. तदेव 10/17
39. तदेव 10/21
40. तदेव 10/47
41. तदेव 10/57
42. तदेव 10/64
43. चालुक्यराज—10/68
44. तदेव 10/72
45. तदेव 10/74
46. तदेव 10/76
47. तदेव 10/76
48. तदेव 10/77
49. तदेव 10/77
50. तदेव 10/80
51. चालुक्यराज 10/90
52. तदेव 10/94
53. तदेव 11/2
54. तदेव 11/4
55. तदेव 11/4
56. तदेव 11/16
57. तदेव 11/22
58. तदेव 11/24
59. तदेव 11/33
60. चालुक्यराज—12/6
61. तदेव 12/13
62. तदेव 12/36
63. तदेव 12/60
64. तदेव 13/24

65. तदेव 13/28
66. तदेव 13/28
67. तदेव 13/33
68. तदेव 13/36
69. चालुक्यराज–13/36
70. तदेव 13/40
71. तदेव 13/40
72. तदेव 13/40
73. तदेव 13/40
74. तदेव 13/41
75. तदेव 13/48
76. तदेव 13/57
77. तदेव 13/62
78. तदेव 14/3
79. चालुक्यराज–14/8
80. तदेव 14/14
81. तदेव 14/15
82. तदेव 14/54
83. तदेव 14/57
84. तदेव 14/63
85. तदेव 15/2
86. तदेव 15/19
87. तदेव 15/19
88. तदेव 15/23

# चालुक्यराजाय्यणवंशचरितेमहाकाव्ये कालिकं विवरणम्

1. चालुक्यस्यायोध्याधिपतेश्चित्रकण्ठस्य भ्राता विजयादित्यो भ्रात्रा चित्रकण्ठेन भर्त्सितो सर्वसौख्यसमायुक्तां पुण्यां ह्ययोध्यां जन्मभूमिं सर्वथा नमस्कृत्य प्रचलितः 143 चौवलिनामके शके वर्षे नर्मदायास्तटे माहेश्वरसन्निधावेकस्मिन् ग्रामे सुकुटुम्बो निवसतिं चक्रे1 ।
2. विजयादित्यस्य प्रपौत्रश्चालुक्यकुलदीपको जयसिंहः, अस्य 359 शक वर्षे राज्यं सुविस्तृतमासीत्। अयं चालुक्यो राजा प्रबलान् राष्ट्रकूटादिकान् राज्ञो विजित्य स्वराज्यं विस्तारयामास। अस्य राज्ञः समये राष्ट्रकूटानां राजा कृष्णदेव आसीत्2।
3. 383 शक वर्षे जयसिंहो राज्यभारं पुत्रे निधाय स्वर्गं गतः। अस्य पुत्रो बालवर्मासीत्3।
4. बालवर्मणः पुत्रो विजयवर्मा 394 शकवर्षं यावद्राज्यं कृत्वा राज्यधूः पुत्रे निधाय दिवं जगाम[4]। अस्य पुत्रो हि वनराज आसीत्।
5. वनराजात् पंचमः पुरुषो रणरागश्चालुक्यकुलभूषण आसीत्। अस्यैव रणरागस्य पुत्रः प्रथमः पुलकेशी, यस्य राज्यं 451 शक वर्षे सुविस्तृतं महता वैभवेन श्रिया च सम्पन्नमासीत्5।
6. चालुक्यराजकुलभूषणाप्रथमपुलकेशिना 488 शक वर्षे भुवः प्रस्थानं कृतम्। ततः परमस्य पुत्रः 488 शक वर्षे राज्यासनमलन्चकार कीर्तिवर्मा[6]।
7. 489 शके वर्षे कीर्तिवर्मा द्युलोकं जगाम। अस्य पुलकेशीविष्णुवर्धन-जयसिंहबुद्धवर्षकाश्चत्वारपुत्राः शिशव एवासन्। अतः अस्य भ्राता मंगलीशो राज्यासनं सनाथं चकार[7]।
8. मङ्गलीशः 500 शके संवत्सरे वातापीगिरिमुत्कृत्य तत्र गुहायां

विशालं भव्यं महदद्भुतं विष्णुमन्दिरं कारयामास। तदर्थं तेन तत्र या व्यवस्था प्रकल्पिता-सा प्रचलति[9]।

9. चालुक्योमङ्गलीशः 489 शक वत्सरात् 532 शकवत्सरं यावद्राज्यम-करोत्। राज्यं सम्यक् संवर्ध्य प्रजाश्च सम्पाल्य 532 वर्षे पुरन्दपुरातिथिर्बभूव।

10. दिवङ्गते मङ्गलीशेऽस्य पुत्र 532 शक वर्षे कंपुचिद्दिवसेषु राज्यमकरोत्। पितरि शासके सत्ययं सामन्त आसीत्। असाविन्द्रवर्मैव ध्रुवराजश्चालुक्येषु ख्यातनामाभवत्[10]।

11. ध्रुवराजादनुकीर्तिवर्मणो ज्येष्ठः पुत्रः पुलकेशी द्वितीयः 532 शकवर्षस्य सविध एव राज्ये शास्ताभवत्। कान्यकुब्जेश्वरः श्रीहर्षो द्वितीयपुलकेशिना राज्यकाले दक्षिणापथमाक्रमत्। परमस्य पराक्रमादसफलमनोरथः स ततो रिक्तहस्त एव परावर्तत[11]।

12. द्वितीयः पुलकेशी 532 शक वर्षात् 592 शक वर्षं यावद्राज्यं चकार। शासनान्तिमचरणेऽतिवृद्धोऽयं राजा राज्यमोहाद्राज्यं विनाशमार्गमनयत्। कीर्तिवर्मणो भ्राता मङ्गलीशः, कीर्तिवर्मा 489 शक वर्षे दिवमगच्छत्। अस्य मृत्यु समये पुत्राः शिशव एवासन्, तेषु पुलकेशी ज्येष्ठः पुत्रः, स हितदाष्टवर्षीयो भवेत्। मङ्गलीशः 43 वर्षाणि राज्यमकरोत्। 532 वर्षे पुलकेशी द्वितीयोऽयं चालुक्यानां राजा भवत्।

रघोवंशे यथा रामः पाण्डवेषु यथार्जुनः।
तथा चालुक्यवंशेऽयं पुलकेशीति विश्रुतः[12]॥

अयं चालुक्येषु माहान् राजाभवत्। अस्य राज्यं सुविस्तृतं सुव्यवस्थन्चासीत्। अस्य शासनस्यान्तिमे चरणेऽस्य प्रतिपक्षिनो राजानः पाण्ड्यचोलकेरलादयः संगठिताः भूत्वैन माक्रम्यास्य राज्यस्याधिकांशं भागं ते स्ववशमानयन्। एषा घटना षष्ठशताब्द्याः नवमदशकस्य भवेत्। अस्याः घटनायाः समयेऽस्यावस्था 90 वर्षाणां सविध आसीत्। वार्द्धक्याद्धतबुद्धिर्लोभाक्रान्तश्च पुलकेशी निर्बलो राज्यं गर्तेऽपतयत्। अस्य मृत्यु 592 शकवर्षेऽभवत्, तदायं 103 वर्षाणां भोक्तासीत्[13]।

13. राजासौ पुलकेशी महान्, अस्य राज्यस्य द्वितीयचरणप्रारम्भसविध एव ईरानदेशनृपखुस्रोर्दूतोऽस्य राजसभायामागत्योपायनैः सार्धं मैत्री सन्धिमनेन साकमकरोत्[14]।

14. चीनदेशस्य यात्री हुएन्त्साङ्गो ह्यस्य राज्यकालेभारतमगच्छत्। स अस्य राज्येऽपि यात्रामकरोत्। तेनास्य राज्यस्य सुवृत्तं स्वयात्रावृत्ते

लिखितं महता गौरवेण[15]।

15. बौद्ध धर्मे समागतानां विकृतीनां प्रभावाद् सनातनं धर्मं ररक्षायं पुलकेशी[16]।

16. भारतीयस्य धर्मस्य संस्कृतेश्च संरक्षणाय यानि कार्याणि समारब्धानि द्वितीयेन पुलकेशिना तन्येवाग्रे पूज्यैराघशङ्कराचार्यैः सम्पाद्य देशस्य गौरवः सुस्थिरीकृतः[17]।

17. पुलकेशिनि द्वितीये दिवंगतेऽस्य तृतीयः पुत्रो विक्रमादित्यः 592 शकवर्षे राज्यासनमारूरोह। अयं पितुः प्रतिपक्षिनो राज्ञो विजित्य पुनः राज्यं संवर्धयामास। अयं प्रथमो विक्रमादित्यः 592 शकवर्षाद् 603 शकवर्षं यावद्राज्यं चकार[18]।

18. पितर्युपरते विक्रमादित्ये तत्सूनुविनयादित्यो राज्यासनं जग्राह। 603 वर्षे विनयादित्यो राजा भूत्वा धर्मतः प्रजाः पालयन् 618 शकवर्षं यावत् पंचदश्वर्षाणि राज्यं दधार[19]।

19. 618 शके वर्षे विनयादित्य दिवंगते, तस्य पुत्रो विजयादित्यो राजासने रेजे। राजायं महाप्रतापी 655 शकवर्षं यावद्राज्यं कृत्वा पुत्रे विक्रमादि त्ये द्वितीये राज्यभारं निधायाखण्डमण्डलं जगाम[20]।

20. विक्रमादित्यो द्वितीयः 655 शकवत्सरे राजा सनमासद्य पल्लवानां राजानं नन्दिपोतं विजित्य, अनेकानन्यान् राज्ञः रिदान् विधाय राज्यं सुदृढ़ सुविस्तृतं व कृत्वा 669 शकसंवत्सरे मर्त्यलोकं तत्याज[21]।

21. द्वितीयस्य विक्रमादित्यस्य पुत्रो द्वितीयः कीर्तिवर्मा 669 शके वर्षे चालुक्यानां राजासनमारुह्य बहून्नुद्धतान् नृपान् विजित्य स्वराज्यं सुदृढ़मकरोत्। परं युद्धेषु क्षीणबलो राज्यरक्षां कर्तुं नापारयत्। अतः राज्यस्य दक्षिणान्चलमेवास्याधिकारेऽतिष्ठत्। अतः परं चालुक्यराज्यं प्रायेण द्विशतवर्षाणि यावद् राष्ट्रौढवंश्यानां राज्ञामायत्तमभवत्[22]।

22. प्रथमस्य अय्यणस्यपुत्रश्चतुर्थो विक्रमादित्यो राजसु श्रेष्ठोऽभवत्। अयं राजा 919 शकवर्षे स्वपुत्राय चालुक्यश्रेष्ठाय तैलपाय राज्यं दत्वां स्वर्गं जगाम[23]।

23. 919 शके वर्षे राज्यासनमारुह्य तैलपः परमारपान्चालगंगादिकान् नृपान् विजित्य राष्ट्रकूटस्य राजानं कर्कं श्वशुरं विधाय राज्यं चकार[24]।

24. द्वादशवर्षाणि यावद्राज्यं कृत्वा दिवङ्गते तैलपे तस्य ज्येष्ठः पुत्रः सत्याश्रयः 930 शकवत्सरे चालुक्यानां राजा भवत्। सत्याश्रयो हि 20 वर्षाणि राज्यं चक्रे[25]।

25. सत्याश्रयो राजा 950 शकवत्सरे दिवङ्गतः। सत्याश्रयस्य सन्तानाभावादस्यानुजः अय्यणो राज्यभारं जग्राह। अयं विरक्त-प्रवृत्तिकः योगनिष्ठः पुरुषः स्वभगिन्या अवकायाः सहयोगात् 'जिजाबाय्यण' इति नाम्ना राज्यं चक्रे[26]।

26. अय्यणस्य भ्राता जयसिंहः। अयं पंचमो जयसिंहः। असौ लौल्याद्राज्यस्य अय्यणस्य विरुद्धे विद्रोहमकरोत्। कुलक्षयभिया अय्यणो हि राज्यासनं भ्रात्रेजयसिंहाय दत्वा वनमगच्छत्। घटनैषा 964 शकवर्षात्पूर्वं घटिता[27]।

27. अय्यणश्चालुक्योऽसौ ज्योतिषशास्त्रे परिनिष्ठितो विरक्तस्वभावः योगनिष्ठपुरुषश्रेष्ठ आसीत्। अनेन ज्योतिषशास्त्रे खगोलेऽनेके शोधाः कृताः, अस्य शोधकार्यस्य स्वरूपं सूर्यसिद्धान्तो ग्रन्थः। अय्यणस्य खगोले शोधकार्यं 964 शकवर्षाद् 997 शकवर्षाणां मध्येऽभवत्[28]।

28. जयसिंहस्य पुत्रः सोमेश्वरः 990 शकवर्षे चालुक्यानां राजा भवत्। अनेनानेके राजानो जिताः जयस्तम्भाश्च स्थापिताः[29]। अस्य राज्यं 997 शकवर्ष पर्यन्तमासीत्।

29. सोमेश्वरस्य पुत्रो विक्रमादित्यस्य 1048 शकवर्षे राज्यं सुविस्तृत-मासीत्[30]।

30. विक्रमादित्यस्य षष्ठस्य पुत्रोऽपि सोमेश्वर एवाभवत्। स 1060 शकवर्षं यावद्राज्यं चकार[31]।

31. सोमेश्वरस्य पुत्रः कमल्लः, स हि 1072 शकवर्षं यावद्राज्यं चक्रे[32]।

32. कमलूलस्य भ्राता तैलपः, स हि 1084 शकवर्षं यावद्राज्यमकरोत्[33]।

33. तैलपस्य पुत्रस्तृतीयः सोमेश्वरः, स हि 1111 शकवर्षं यावद्राज्यम-करोत्[34]।

34. 817 शकवर्षे भूदेदः स्वनाम्ना भूदरगढदुर्गं कारयत्[35]।

35. तृतीयस्य सोमेश्वरस्य पश्चाद्भवाश्चालुक्यानिर्बला अभवन्। अतस्तेषां सेनानायको विजल्लाख्यश्चालुक्यराजासनमधिकृत्य 1239 शकवर्षे स्वयं राजाभवत्[36]।

36. तैलपपुत्रेण तृतीयेन सोमेश्वरेण कथन्चित् कल्याण्यां राज्यं स्थापित-मपि 1275 शकवर्षे होसालैर्यादवैश्च मिलित्वा स्ववशमानीतम्[37]।

37. त्रयाणां राज्यानां साहाय्यं सम्प्राप्य महादेवः यादवानां शास्ता 1346 शके वर्षे कर्णदेवं समुपाद्रवत्। नावा पलायितः स कुटुम्बः सागरे निमग्नोऽभवत्।

38. चालुक्यस्य वीरभद्रेश्वरस्य पत्नी रुद्राम्बा, सा वारङ्गले रुद्रदेव इति नाम्ना शासिका नयनिपुणा वीराङ्गनाभवत्। यादवानां राजा

महादेवस्तां जित्वा 1339 वर्षे स्ववशमनयत्[38]।

39. मलिककफूरो हि दिल्लीशासकस्य नायकः, यो हि 1390 शके वर्षे यादवानां देवगढदुर्गमाक्रम्य यादवानां राज्ञो रामदेवस्य पुत्रं शङ्करदेवमघातयत्[39]।

40. चालुक्यान्वयसम्भवो गुर्जरेशः कर्णदेवः 1375 शकवर्षे अलाउद्दीनेन जितो रामदेवाश्रयमजगाम[40]।

41. दिल्लीशो मुबारकः 1319 शके वर्षे स्वविरोधिनश्चालुक्यस्य हरपालस्य शिरश्छित्वा देवगिरीदुर्गद्वारे लम्बयित्वा स्वातकङ्क-प्रचारमकरोत्[41]।

42. 1428 शके वर्षे अलाउद्दीनहसनो हि दक्षिणभारते स्वराज्यं संस्थापयामास[42]।

43. 1433 वर्षीये युद्धे शिखानष्टैः योगिभुजबलौ चालुक्यस्य वीरदेवस्य पुत्रो मारितौ[43]।

44. 1438 शके वर्षे वीरवरश्चालुक्यो नारायणदेवः दिवंगतः[44]।

45. 1440 शके वर्षे विनायकदेवः कौलाशमाक्रमत्[45]। अस्मिन् युद्धे शक्तिदेवगोगीदेवौ वीराणां गतिं गतौ।

46. वारङ्गलयुद्धं कन्हैयानायकमुहम्मदयोर्मध्ये वर्षद्वयं यावत् प्राचलत्। अस्मिन् युद्धे मुहम्मदो विजयी भूत्वा 1443 शकवर्षे नानोयायनैः सार्धं गोलकुण्डाप्रदेशं कन्हैयानायकस्य बहुमूल्यं सिंहासनं गृहीत्वा विजयोत्सवं चकार[46]।

47. विजयानगराधीशबुक्कमुहम्मदयोर्मध्ये 1445 शकवर्षे युद्धमभवत्। अत्रास्मिन् युद्धे तुरुष्कैः सर्वप्रथमं शतघ्नीनां प्रयोगः कृतः[47]।

48. 1484 शके वर्षे विजयानगराधीश्वरो राजा हरिहरो हि दिवंगतः[48]।

49. राज्ञो हरिहरस्य पुत्रो बुक्कः, स हि 1484 शकवर्षे राज्यासनं जग्राह। मुडगलग्रामस्थितेषु स्वर्णकारेषु ह्येकस्य स्वर्णकारस्य कन्यासीत् परथाला। सा परथाला परमसुन्दरी रमणीया रमणीति श्रुत्वा तस्या आनयनाय तेन प्रेषिता तेना, मुडगलं ताज्जुद्दीफिरोज-ब्रह्मनीशाहस्य राज्ये आसीत्। तेन रुष्टः शाहो हि 1484 शकवर्षे विजयानगरमाक्रमत्, परन्तु पराजितोऽभावत्[49]।

50. 1491 शकवर्षे हुसेनेः जमालुद्दीनसाबुश्च दिल्लीतो निवासार्थं गुलबर्गाप्रदेशमाययुः[50]।

51. 1495 शकवर्षे वारङ्गलयुद्धमभवत्। अत्र विजयानगरेण सह फिरोजशाहस्य वर्षद्वयं यावद्युद्धमभवत्[51]।

52. 1497 शके वर्षे स्वसम्बन्धिभ्यो दिल्लीश्वराच्च साहाय्यमधिगम्य

विजयानगराधिपः फिरोजं विजित्य स्वराज्यान्निष्कासयामास[52]।

53. चालुक्यानां साहाय्याद् आसपहसनखानः गुलबर्गामाक्रम्य फिरोजपुत्रौ हसनखानमुबारकखानौ बन्दीकृत्य 1500 शकवर्षे गुलबर्गं स्वाधिकारेऽकरोत्। अस्मिन् युद्धे फिरोजो दिवंगतः[53]।

54. 1510 शके वर्षे जमालुद्दीनस्य परामर्शादहमदखानो हि कल्याण्यां चालुक्यानामधिकारं स्वीकृतवान्। गुलबर्गे दशवर्षीयं कोण्डिबा-देवस्यपुत्र तवाजीनामानं सरनोबते पदे न्ययोजयत्[54]।

55. 1502 शके वर्षे अहमदब्रह्मनीशाहो हि वारङ्गलमग्रहीत्। अस्मिन् युद्धे स्वसुतेनकेशवेन सार्धमेव सुखदेवश्चालुक्योवीरो वीरगतिं जगाम[55]।

56. 1515 शके वर्षे दिलावरखानः कोंकणमाक्रमत्[56]।

57. 1521 शके वर्षे विजयानगराधिपदिलावरखानयोर्मध्ये युद्धमभवत्, तत्र दिलावरखानः पराजितोऽभवत्[57]।

58. 1547 शकवर्षसविधे बीजापुरस्य शास्ता मुहम्मदगवां कोंकण-माक्रमत्। अस्मिन् युद्धप्रसंगे भोसलेवंशीयैः कोल्हापुरे गोधानां प्रयोगं कृत्वा दुर्गे सैनिकान् प्रवेश्य दुर्गस्य द्वारमुद्घाट्य तज्जितम्। महाराष्ट्रीयभाषायां गधायाः नाम 'घोरपड' इत्यस्ति। घोरपडानां प्रयोगात् भोसलेवंशः 'घोरपडे' इत्यपरनामाभवत्[58]।

59. 1549 वर्षे मुहम्मदगवां इति नामा तुरुष्को गोवाप्रदेशस्यो-पर्याक्रमणमकरोत्[59]।

60. 1550 शकवर्षे कर्नाटक कोंकणस्थैः राजभिः मुहम्मदगवां नामानमा-क्रमणकारिणं तुरुष्कं जित्वा स्वतन्त्रा अभवन्[60]।

61. 1551 शक वर्षे हिन्दुमुस्लिमयोर्मध्ये विप्लवोऽभवत्61।

62. 1588 शके वर्षे कम्मोजी चालुक्यः पुर्तगालदेशीयानां साहाय्यमधिगम्य तुरुष्कान् बहिष्कृत्वा गोवाप्रान्तं स्ववशेऽकरोत्[62]।

63. 1621 वर्षे कल्याणी बुरहानशाहस्याधिकारे समागता[63]।

64. 1625 शकवर्षे बुर्हानशाहो हि सदाशिवस्य साहाय्यं गृहीत्वा शोलापुरस्य कल्याण्याः दुर्गाणि स्वायत्तीकृतवान्[64]।

65. 1632 शकवर्षं यावत् कल्याणी बुर्हानशाहस्याधिकारे स्थिता[65]।

66. 1649 शकवर्षे निजामशाहइब्राहीमो हि जमीलां निजकन्ययां वरीदशाह इब्राहीमद्वितीयाय ददौ[66]।

67. 1641 शके वर्षे अली-आदिलशाहो हि कल्याणीं स्वायत्तीकर्तुं हुसेन-इब्राहीमयोरुपर्याक्रमणकरोत्[67]।

68. 1642 शक वर्षे तालीकोट्टयुद्धमभवत्, तस्मिन् चत्वारोऽपि सुलतानाः

सम्मिलिता अभवन्। अस्मिन् युद्धे चालुक्यवीरः कमलोजी वीरगतिं लेभे[68]।

69. 1630 शक वर्षे खानदेशाधिपोह्यकवरस्य वश्यतां स्वीचकार[69]।

70. 1651 शक वर्षे आदिलशाहो हि बंकापुरं धारवाडचाक्रमत्[70]।

71. कमलोजीत्यस्य पुत्रतुकोजीत्यनेन बीजापुरराजकन्यां हिन्दुधर्मे दीक्षितां कारयित्वा तया सार्धं विवाहमकरोत्। अनेन रुष्ट आदिलशाहोहि तुकोजीत्यस्य चक्षुषी निष्काषयामास। 1658 शकवर्षे आदिलशाहोऽपि हतः[71]।

72. 1658 शकवर्षे एव इब्राहीमकुतुबशाहो मृतः[72]।

73. 1657 शके वर्षे अलीबरीदशाहो दिवंगतः[73]।

74. 1673 शके वर्षे अकबरो हि दक्षिणापथं हेतु स्वसेनां प्रेषयत्[74]।

75. 1678 शके वर्षे चांदबीबी बरारं अकबराय प्रादात्[75]।

76. 1761 शके वर्षे दिल्लीशासकः अहमदनगरसुलतानं बन्दिनं कृत्वा ग्वालियरप्रान्ते स्थापयामास[76]।

77. कम्मोजी कल्याणी दुर्गस्थां रत्नैः खचितां कुलागतां विष्णोः मूर्तिं ततो विजयानगरं नीत्वा तत्रैव स्थापयामास तुरुष्काणां भयेभ्यः। अत्र 1590 शकवर्षे लिखितं तामपट्टकं सुरक्षितमस्ति।

## सन्दर्भ


1. चालुक्यराज–2/4
2. तदेव 2/44
3. तदेव 3/2
4. तदेव 3/3
5. चालुक्यराज–3/14
6. तदेव 3/25
7. तदेव 3/29
8. तदेव 4/97
9. चालुक्यराज्य–5/11
10. तदेव 4/13
11. तदेव 4/14-18
12. चालुक्यराज–4/44
13. तदेव 4/13-39
14. तदेव 4/34-35
15. चालुक्यराज्य 4/36
16. तदेव 4/37
17. तदेव 4/38

18. तदेव 4/63
19. तदेव 5/3
20. चालुक्यराज 5/15
21. तदेव 5/27
22. तदेव 5/27, 6/1
23. चालुक्यराज 6/37
24. तदेव 6/37, 7/7
25. तदेव 7/8
26. तदेव 7/18-20
27. चालुक्यराज. 7/27-32
28. तदेव 7/28-63
29. तदेव 7/32-54
30. तदेव 7/55
31. चालुक्यराज 7/58
32. तदेव 7/61
33. तदेव 7/62
34. तदेव 7/63
35. तदेव 9/12
36. तदेव 9/22
37. चालुक्यराज. 9/28
38. तदेव 9/56, 65
39. तदेव 10/16
40. तदेव 10/19
41. चालुक्यराज. 10/32
42. तदेव 10/49
43. तदेव 10/85
44. तदेव 10/96
45. तदेव 11/11-12
46. तदेव 11/26
47. चालुक्यराज्य. 11/31
48. तदेव 12/1
49. तदेव 12/1-11
50. तदेव 12/31
51. चालुक्यराज्य—12/34-49
52. तदेव 12/40
53. तदेव 12/54-66
54. तदेव 12/68-71
55. तदेव 12/72-74
56. चालुक्यराज्य—13/1
57. तदेव 13/3

58. तदेव 13/24-33
59. तदेव 13/34
60. तदेव 13/38
61. चालुक्यराज्य–13/45
62. तदेव 13/64
63. तदेव 14/2
64. तदेव 14/11
65. तदेव 14/16
66. तदेव 14/34
67. तदेव 14/42
68. चालुक्यराज्य 14/52
69. तदेव 14/63
70. तदेव 14/66
71. तदेव 15/6-9
72. तदेव 15/12
73. तदेव 15/12
74. चालुक्यराज्य–15/15
75. तदेव 15/17
76. तदेव 15/19-20

# चालुक्यराजाय्यणवंशचरितेमहाकाव्ये स्त्रियः

1. द्वितीयः पुलकेशी प्रथमस्य पुलकेशिनः पौत्र आसीत्। अयं राजा महाप्रभावोऽभवत्। अस्य राज्ञश्चत्वारः चन्द्रादित्यः, आदित्य वर्मा, विक्रमादित्यो जयसिंहश्चासन्। एतेषामेका भगिनी अम्बेरा आसीत्[1]।
2. तृतयिस्य विजयादित्यस्य महाराज्ञी लोकहादेवीति नाम्नाख्यातासीत्[2]।
3. विजयादित्यस्य सूनुर्विक्रमादित्यः, तस्य ज्येष्ठा राज्ञी लोकमहादेवी, सहि हैहयानां राज्ञो ज्येष्ठा कन्यासीत्[3]।
4. विजयादित्यस्य पुत्रो विक्रमादित्यः, अयं द्वितीयो विक्रमादित्यः, अस्य द्वितीया राज्ञी त्रैलोक्यमहादेवी, सा हि हैहयानां भूपतेः द्वितीया कन्यासीत्[4]।
5. उज्जयिनीपतेः राज्ञयाः शशाङ्कपुराराड्नदिन्याः पुत्री चालुक्यस्य भीमस्य पत्नीति विश्रुता[5]।
6. तृतीयस्य विक्रमादित्यस्य पुत्रो द्वितीयो भीमः, भीमस्य पुत्रो हि प्रथमः अय्यणोऽभवत्। अस्य पत्नी कृष्णराजस्य कन्यासीत्[6]।
7. द्वितीयस्य तैलपस्य राज्ञी जाकब्बा जक्कलदेवी वासीत्। एषा जाकब्बा राष्ट्रकूटाधिपतेः कर्कस्य कन्यासीत्[7]।
8. लक्ष्मीर्द्वितीयस्य तैलपस्य द्वितीया महिषी, सा हि ममासाख्यस्य कन्यासीत्[8]।
9. अम्बिकादेवी सत्याश्रयस्य महिषी आसीत्। सत्याश्रयस्तैलपस्य पुत्र आसीत्[9]।
10. भाग्यवती दशवर्मणः पत्नी पंचमस्य विक्रमादित्यस्य मातासीत्। असावेव भाग्यवती भगलदेवीति नाम्नापि विश्रुतासीत्[10]।
11. दशवर्मणो द्वितीयस्य पुत्रो द्वितीयोऽय्यणः, तस्य भगिनी अक्कासीत्[11]।
12. रणदेवी ह्ययणस्य प्रथमा पत्न्यासीत्[12]।
13. राष्ट्रौवंशीयस्य कृष्णराजस्य पुत्री चन्द्रिकादेवी अय्यणस्य द्वितीया

पत्न्यासीत्। प्रथमाय्यणस्यापि पत्नी कृष्णराजस्य कन्यासीत्[13]।

14. दशवर्मणस्तृतीयः पुत्रो जयसिंहः, यो हि चालुक्यवंशे पंचमो जयसिंहस्तस्य महिषी सग्गलदेवीति विश्रुतासीत्[14]।

15. मेयला सोमेश्वरस्य कन्या कदम्बवंशीयस्य जयकेशिनो महिषी ह्यभूत्। अयं जयकेशी द्वितीयः, यो हि गोवा प्रान्ते राजासीत्[15]।

16. रूपमती कदम्बवंशजातस्य षष्ठदेवस्य कन्यासीत्। एषा रूपमती चालुक्यस्य चन्द्रदेवस्य भायार्भवत्[16]।

17. पद्मावती लिङ्गयतबसवा इत्यस्य भगिन्यासीत्। अस्याः विवाहो हि विज्जला इत्यनेन साकमभवत्। विजल्ला हि चालुक्यानां सेनानायकः, स हि चालुक्यैर्विद्रोहं कृत्वात्मनं 1239 शकवत्सरे राजाघोषयत्[17]।

18. चन्द्रादेवी अय्यणस्य पत्नी, सा हि शिंदेवशस्य कन्यासीत्। एषो हि शिंदेवंशस्तगलेपुरे स्थित आसीत्। तारगले स्थानं कोंकणे विद्यते[18]।

19. गणाम्बा राज्ञो गणपतेर्ज्येष्ठा दुहितासीत्[19]।

20. रुद्राम्बा राज्ञो गणपतेः कनिष्ठा कन्यासीत्। गणपति र्हि वारङ्गलस्य राजा, स हि स्वां द्वितीयां कन्यां रुद्राम्बां वारङ्गलस्य शासिकाकरोत्। रुद्राम्बा चालुक्यस्य वीरभद्रेश्वरस्य भार्या राज्यप्रशासने सुदक्षा तया रुद्रदेव इति नाम्ना शासनं कृतम्[20]।

21. मुम्मदाम्बा रुद्राम्बायाः पुत्री, एषा यादवान्वये दत्तासीत्। अस्याः पुत्रं रुद्राम्बा शास्त्रविधिना पुत्रीकृत्य राज्याधिकारिणमकरोत्। असौ चालुक्यो प्रतापरुद्रोऽभवत्[21]।

22. पद्ममाला कदम्बकुलजाता राजकन्या, तस्याः विवाहो हि चालुक्येन कामदेवतृतीयेन साकमभवत्[22]।

23. कमलादेवी चालुक्यस्य कामदेवतृतीयस्य पत्नीं, सा हि त्रिभुवन-मल्लस्य कदम्बवंशीयस्य गोवानृपस्य कन्यासीत्[23]।

24. कमला अस्याः विवाहसम्बन्धो हरपालेन सुनिश्चित आसीत्। परन्तु एषा 1391 शकवत्सरसविधे दिल्लीशेन अलाउद्दीनननामकेन बलाद्धृता[24]।

25. परथाला हि मुडलग्रामनिवासिषु स्वर्णकारेषु कस्यचित् स्वर्णकारस्य कन्यासीत्। सा परथाला रूपगुणयौनसम्पन्ना रमणीया रमणीति विजयानगरस्याधिपेन बुक्केन श्रुतम्। तां कामयमानः स कामी बुक्कवार्तां श्रुत्वा, ताङ्गृीत्वा, ततः पलायिताः। मुडगलं हि ब्रह्मनी राज्यस्य भागं आसीत्। बुक्कस्य सैनिकैस्तामनवाप्य तत्रोपद्रवः कृतः, तेन रुष्टस्ताज्जुदीनफिरोजशाहसुलतानोहि 1484 शकवर्षे

बुक्कमाक्रमत्[25]।

26. परथाला स्वर्णकारस्य कन्याः तस्याः विवाहः हसनखानेनाभवत्। हसानो हि ताज्जुदीनफिरोजशाहसुल्तानस्य पुत्र आसीत्[26]।

27. जमीला निजामशाह-इब्राहीमस्य कन्या, यस्याः, विवाहो हि वरीदशाह-इब्राहीमद्वितीयेन सममभवत्[27]।

28. चांदबीबी एषा शोलापुरस्य शासकस्य हुसेनस्य कन्यासीत्। अस्याः विवाहो हि अलीसुलतानेनाभवत्। चाँदबीबी नयनिपुणा विदुषी-वीराङ्गना प्रशासिकासीत्[28]।

## सन्दर्भ


1. चालु. राज. 4/50-51
2. तदेव 5/5
3. तदेव 5/24-25
4. तदेव 5/24-25
5. चालु. राज. 6/11-12
6. तदेव 6/34-35
7. तदेव 7/4-5
8. तदेव 7/6
9. तदेव 7/13
10. तदेव 7/17
11. चालु. 7/19
12. तदेव 7/22
13. तदेव 7/22-23, 6/35
14. तदेव 7/31
15. तदेव 7/59-60
16. तदेव 9/1-4
17. चालुक्य. राज. 9/22-23
18. तदेव 9/42-43
19. तदेव 9/
20. तदेव 9/55-60
21. चालु. रा. 9/67-68
22. तदेव 9/72
23. तदेव 10/4-6
24. तदेव 10/
25. चालु. राज. 12/1-9
26. तदेव 12/18
27. तदेव 14/34-35
28. तदेव 14/48-49

# चालुक्यानां समाजिकानि कार्याणि

## 1. विज्यादित्यः

चालुक्यवंशस्य वृत्ते विजयादित्य आदिपुरुष इवास्ति। अयं मनस्वी, महान्, चालुक्यकुलतिलको राजाभवत्। राजायं विद्यानां विदुशान्च रक्षक आसीत्।

दानमानैश्च सन्तोष्य विप्रान् वेदविदां वरान्[1]।

## 2. विष्णुवर्धनः

चालुक्यकुलदीपको विष्णुवर्धनो विद्याविनयशलिसद्गुणसाहसोत्साह-पराक्रमपौरुषोत्स इव स्वाध्यायसदाचारमूर्तिरिव परपक्षपक्षकृन्तको विद्वषवनवहरणोत्सक-पन्चाननः परमतत्वश्रद्धालुर्धर्मावतार इवासीत्। अनेन राज्ञा बाल्ये तपस्तप्त्वा देवेभ्यो राजचिह्नानि सम्प्राप्तानि।

ततः प्रभृति सर्वेऽपि चालुक्यकुलनन्दनाः।
चिह्नान्येतानि संधार्य प्रथिव्यां प्रथिता बभुः॥
अथं प्रभावतस्तेन तपसा स हि सारभृत्।
सैन्येन महता युक्तो राजराजाधिपोऽभवत्[2]॥

एषो विष्णुवर्धनः चालुक्यवंशे पुरुषसिंह एव बभूव। अयं राजा दक्षिणभारतेऽनेकान् नवीनान् ग्रामान् संस्थापयामास[3]। अस्य पराक्रमात् प्रभावितः पल्लवानां राजा—

अस्योत्कटप्रतापेन प्रीतः पल्लववंशजः।
कान्चीश्वरो महाराजो हर्षेण विनयेन च॥
प्रादात्कन्यां, निजां तस्मै सुन्दरीं गुणगुम्पिताम्।
दासीदासं धनं रत्नं श्रियं सिन्धुसमुद्भवाम्[4]॥

## 3. जयसिंह प्रथमः

विष्णुवर्धनस्य पुत्रो जयसिंहश्चालुक्यवंशे पुरुषसिंह एव बभूव। राष्ट्ररक्षायै

येन जयसिंहेन

यो राष्ट्रकूटकुलमिन्द्र इति प्रसिद्धः,
कृष्णाह्वयस्य सुतमष्टशतेभ सैन्यम्।
निर्जित्य दग्धनृपपन्चशतो बभार,
भूयश्चुलुक्यकुलवल्लभराजलक्ष्मीम्[5]॥

## 4. रणरागः

रणरागो जयसिंहद्वितीयस्य पुत्रो महान् शैवोऽभवत्[6]।

## 5. प्रथमः पुलकेशी

प्रथमः पुलकेशी द्वितीयस्य जयसिंहस्य पुत्र आसीत्। अस्य राज्ञो विरुदैरस्य कार्याणां चारित्रिकगुणानान्च ग्रन्थः प्रस्तूयते। अनेनैव वातापीनगरी विनिर्मिता या चालुक्यानां राजधान्यभवत्।

चालुक्यश्रीर्यत्प्रतापात् परां वृद्धिं समागमत्।
सत्याश्रयो महाराजो रणविक्रमवल्लभैः॥
श्रीवल्लभेतिविरुदैर्भूषितो बहुमानैः॥
निर्मिता राजधानी सा वातापी तेन भूभृता[7]॥

अनेन राज्ञा यज्ञा अश्वमेधादयः कृतास्तथा चानेकानि दानानि च दत्तानि। राजा यं विद्यानां पारदृश्वासीत्। 451 शकवर्षेऽस्य राज्यं सुविस्तृतमासीत्[8]।

## 6. कीर्तिवर्मा

प्रथमस्य पुलकेशिनः पुत्रः कीर्तिवर्मानेकानि राज्यानि विजित्याग्निष्टोमादीन्नेकान् यज्ञान्चकार।

अग्निष्टोमादिकान् लोके प्राज्यान् बहुसवर्णकान्॥
ब्राह्मणेभ्योऽर्पिता भूमिर्दत्तश्च बहुदक्षिणाः[9]।
अयं राजा स्वराजधानीं वातापीं नानाभवनादिनिर्माणैरभूषयत्।
सौन्दर्यं परमं प्राप्ता वातापी तस्य शासने।
विष्णुमन्दिरकूपादिनिर्माणैश्चान्यशिल्पकैः[10]॥
अस्य राज्ञः राज्यकालः 488 शकवर्षं यावदासीत्।

## 7. मङ्गलीशः

मङ्गलीशः कीर्तिवर्मणो भ्रातासीत्। अयं राजा महाप्रतापी विद्विषां जेताभवत्। स्वशासनकालेऽयं वातापीगिरिमुन्कृत्य गुहां निर्माय तस्यां भव्यं विष्णुमन्दिरं कारयामास, तस्य मन्दिरस्य व्यवस्थापितेन सुविहिता—

वर्षे पन्चशते तेन स्थापित विष्णुमन्दिरम्।
वातापीगिरिमुत्कृत्य गुहायां परमाद्भुतम्॥
कल्पिता महता तेन महसा देवताबलिः॥
विप्राः षोडशसंख्याकाः भोजनं नित्यमामुनवन्॥
वरिव्राजश्च बहवस्तुष्टास्तेन तदा मुदा॥

अस्य मन्दिरस्य स्थापना मङ्गलीशेन 500 तमे शकवर्षे कृता[11]।

## 8. पुलकेशी द्वितीयः

अयं कीर्तिवर्मणो ज्येष्ठः पुत्र आसीत्। चालुक्यवंशेऽयं महान् राजाभवत्। पुलकेशी द्वितीयः 548 शक संवत्सरसविधे ईरानदेशस्य राज्ञा खुसुणा साकं मैत्रीसन्धिमकरोत्[12]। दशमशताब्यामाद्यशङ्कराचार्यैर्यानि क्रान्तिकराणि कार्याणि कृतानि तेषां समारम्भो ह्ययं पुलकेशी षष्ठशताब्द्यामकरोत्।

धर्मार्थं षड्प्रकाराचार्यो यत्कार्यं कृतवान पुरा।
प्रारम्भस्तस्य कार्यस्य पुलकेशी समाचारत[13]॥

कवेरभिमतं यत्—

रघोवंशे यथा रामः पाण्डवेषु यथार्जुनः।
तथा चालुक्यवंशेऽयं पुलकेशीति विश्रुतः[14]॥

अस्य राज्ञो राज्यकालो हि 593 शकवर्षं यावदासीत्।

## 9. तृतीयो विजयादित्यः

अयं हि चालुक्यश्रेष्ठो द्वितीयस्य पुलकेशिनः प्रपौत्र आसीत्। 618 शकवर्षेऽयं राजपदमलन्चकार। अस्य राज्यं महत्समृद्धिमदासीत्। अनेन राज्ञा समेषां देवानां मन्दिराणि कारितानि तेषु वाताप्यां राजधान्यां पट्टलकडभागे स्थापितं विजयेश्वरं शिवमन्दिरं विशिष्यते। विजयादित्योऽयं ब्राह्मणेभ्यस्तथा च जैनधर्मसेविभ्यो ग्रामाणां दानानि विहितानि।

तस्य राज्यं समृद्धिन्तु कः शक्तो वर्णितुं भुवि।
देवराडपि तद्राज्यं दृष्ट्वा सेव्योऽभवद्धृदि॥
ब्रह्मविष्णुशिवादीनां स्थापिता मूर्तयो मुदा॥
मन्दिराणि विनिर्माय सुन्दराणि ततस्ततः॥
वाताप्यां पट्टलकडे विजयेश्वर मन्दिरम्।
रचितं तेन दत्तन्च भूमिदानं द्विजातिषु।
जैनेषु ग्रामदानन्च विहितं तेन भूभृता[15]॥

समेषां धर्माणां समादरकरोराजा विजयादित्यः 655 शकवर्षं यावद्राज्यं चकार।

## 10 द्वितीयो विक्रमादित्यः

तृतीयस्य विजयादित्यस्य पुत्रो द्वितीयो विक्रमादित्य 655 शके वर्षे राजासनमारुरोह। महान् विक्रमशाली च विक्रमादित्यः पल्लवानां राजधानीं विजित्य तत्रस्थान् ब्राह्मणान् दानमानैः संपूज्य कान्चीराजधान्याः गौरवं संवर्धयामास।

पल्लवीयं नन्दिपोतं वर्माणं बलगर्वितम्।
युद्धे निर्जित्य कान्चीं तां जित्वा स स्ववशेऽनयत्॥
दर्शनीयान्च दृष्ट्वा तां राजधानीं सुखप्रदाम्॥
लुठयतिस्म न तां राजा रक्षां तस्याश्च सोऽकरोत्॥
तत्रस्था ब्राह्मणाः सर्वे दानमानैः सुपूजिताः।
प्रसिद्धे मन्दिरे तत्र राजसिंहेश्वरस्य च॥
शिलालेखे स्थिरा कीर्तिः विरुदावलि संयुता[16]॥

नृपोऽयं चालुक्यः स्वराज्यकालेऽनेकानिमन्दिराणि कारयामास, तानि च प्रचुरैः स्वर्णदानादिभिः सुसमृद्धानि चाकरोत्।

मन्दिराण्यप्यनेकान्यस्थापयद् देवभक्तितः।
महता स्वर्णदानेन समृद्धानि सदा करोत्[17]॥

हैहयवंशसंभूते लोकमहादेवीत्रैलोक्यमहादेव्यावस्य महहिष्यावास्ताम्। ताभ्यामपि लोकेश्वरत्रैलोक्येश्वरयोः मन्दिरे स्थापिते।

जग्राह ते च त्रैलोक्येश्वरलोकेश्वरस्य च।
स्थापित मन्दिरे तत्र विप्राः द्रव्यैः सुपूजिताः[18]॥

विक्रमादित्योऽसौ 669 शकवर्षं यावद्राज्यं चकार।

## 11. भीमः

पुलकेशिनो द्वितीयस्य पुत्रश्चतुर्थो जयसिंह आसीत्। अस्य परम्परायां विमलादित्योऽभवत्। भीमात्पुलकेशिद्वितीयः सप्तमः पूर्वपुरुष आसीत्। अस्यां परम्परायां भीमो महान् राजा भवत्। भीमस्य जन्मनि चालुक्यानां राजपरम्परा विघटितासीत् परमप्रतापवानयं भीमः महिशूरे चालुक्यानां राज्यं संस्थाप्य पुनश्च चालुक्यसंस्कृतिं सजीवामकरोत्। असौ भीमश्चालुक्येषु द्वितीयोऽदित्यवर्मा।

## 12. अय्यणः

प्रथमाद् भीमादय्यणो हि नवमः पुरुष आसीत्। अय्यणोऽसौ दशवर्मणः पुत्र आसीत्। अस्य वैमातृको भ्रातासीज्जयसिंहः, असौ जयसिंह पंचमश्चालुक्येषु दशवर्मणो ज्येष्ठः पुत्रो विक्रमादित्यः, स राज्यं कृत्वा पुत्र एव दिवङ्गतः विक्रमादित्ये दिवङ्गते तस्य सहोदरः अय्यणाद्वितीयः राज्यासनं समुपाविशत्। अस्य भगिनी अक्का परमविदुषी राजनीतिविचक्षणा वीरबालासीत्। अय्यणो हि जिजाबाअय्यण रति नाम्ना

राज्यमकरोत्। परममस्य बीरवरोभ्राता जयसिहों हि राज्यासनलौल्याद्राज्यसमुचित-व्यवस्थायैवा विद्रोहमकरोत्। अय्यणस्तु स्वभावत एव विरक्तः योगी पुरुषो विद्याव्यासङ्गनिरतो राजासीत्।

अय्यणेन विरक्तेन खबाणङ्कमिते शके।
मासान् पन्चशसंख्याकान् धृता शानधूः स्वयम्॥
श्रुत्वानुजस्य विद्रोहं जयसिंहस्यु बुद्धितः।
विचार्य वंशसंघातं वैराग्यमतिनाऽमुना॥
असारः खलु संसारः सारस्तु भगवत्स्मृतिः।
इति निश्चित्य मनसि समाचरितमद्भुतम्॥
भ्रात्रे श्रीजयसिंहाय राज्यधूः परिकल्पिता।
येन स्यान्नात्र कलहो मा भवेद्वंश संक्षयः[19]॥

स हि कुलक्षयनिवाराणाय राज्यं भ्रात्रे जयसिंहाय दत्वा वनं जगाम। तत्रासौ श्रुतीनां, शास्त्राणां, पुराणानां दर्शनानामनुचिन्तनं कुर्वन्, सर्वत्र प्रकृतेः पुरुषस्य च साम्राज्यं पश्यन् ज्योतिषशास्त्रे बहून्ननुसन्धानान् विधाय 'विरह-अभीहरा' नामकं खगोले ग्रन्थमकरोत्। अयमन्यं ग्रन्थमय्यणनशा संज्ञकमकरोत्। अस्यैवानुसन्धानानां रूपं 'सूर्यसिद्धान्तो' ग्रन्थः।

चन्द्रातारकागत्योश्चाकरोत् सूक्ष्माभिवीक्षणम्।
गणितज्योतिषोज्ञानात् खगोले कृतनिश्चयः।
विरह-अभी हरा यो शोधितस्तेन धीमता॥
संशोधनं नवं शोधमकरोद् ग्रहजस्थितौ।
अन्योपपत्तीर्भूयोऽसौ खगोले समदर्शयत्॥
ग्रन्थेऽय्यण-नशा संज्ञे स सर्वं संगृहीतवान्।
संस्कृते चानुवादेन सूर्यसिद्धान्तसंज्ञया॥
प्रसिद्धोऽभूदयं ग्रन्थो विद्वद्गणसंस्तुतः[20]॥

ज्योतिषशास्त्रेऽस्य कार्यममृतरूपमस्य कीर्तिं सततं विस्तारयिष्यति। चालुक्याय्यणेन स्वग्रन्थयोः प्रणयनं प्राकृतभाषायामेव कृतं तयोः संस्कृतभाषायां रूपान्तरणकरणमस्य प्रपौत्रेण प्रथमेन गोविन्देन काश्यां विद्वद्भिः कारितम्।

तत्प्रपौत्रेण गोविन्दनामकेनेति श्रद्धया।
काशीस्थैः पण्डितैस्यानुवादोऽकारि संस्कृते[21]॥
एवमसौ विद्वान्, धर्मात्मा, विरक्तः, राजा, योगी—
श्रुतिशास्त्रपुराणेषु तत्वशास्त्रेषु निष्ठितः।
तत्वमस्यादिवाक्येषु दत्तचित्तः क्षमान्वितः॥
दानशौण्डः सत्यवक्ता धर्मात्मा शंसितव्रतः।
धर्मराजावतारश्च यज्ञयागरतः सुधीः।

साक्षान्नारायणस्यांशः शशिशेखरभक्तिमान्।
सदैव ब्रह्मचिन्तायां निरतो योगतत्ववित्[22]॥

चालुक्यकुलचन्द्रो दशवर्मणः पुत्रः—

धर्मावारनाम्नासौ प्रसिद्धो गण कोत्तमः।
योगविद्योगिनां श्रेष्ठः स आसीदूय्यणः सुधीः[23]॥

अस्मात्प्रचलिता वंशपरम्परा अष्टादशशताब्धन्तं यावद्देशे चालुक्यराजासनं ररक्ष। अस्माद् महामहमाशालिनोऽय्यणात् प्रचलितायां चालुक्यराजवंशपरम्परायां चन्द्रदेवस्त- स्माद्धरपालदेवः, हरपालदेवाद्गोविन्ददेवः, तस्मात् बंकिदेवः, बंकिदेवाच्चन्द्रदेवः, चन्द्रदेवात् कामदेवः, कामदेवात्, सोमेश्वरः, तस्मात् कामदेवः, कामदेवाद् हरिपालदेवः, हरिपालदेवान्नारायणदेवः, तस्मात् कोण्डिबादेवः, कोण्डिबादेवत्तुकदेवः, तुकदेवात् कोण्डिबादेवः, तस्माद् मालोजी, मालोजीतः नरसोजी प्रधानाश्चालुक्यवंशीया अभवन्।

## सन्दर्भ


1. चालु. राज. 2/6
2.
3. चालु. राज. 2/39
4. तदेव 2/40-41
5. तदेव 2/45
6. चालु. राज. 3/6
7. तदेव 3/9-11
8. तदेव 3/12-14
9. चालु. राज. 3/18-19
10. तदेव 3/24
11. चालु. राज. 4/7-8
12. तदेव 4/34
13. तदेव 4/38
14. चालु. राज. 4/44
15. चालु. राज. 5/11-14
16. चालु. राज. 5/18-21
17. तदेव 5/22
18. तदेव 5/25-26
19. चालु. राज. 7/24-27
20. चालु. राज. 8/12-16
21. तदेव 8/17
22. तदेव 8/2-4
23. चालु. राज. 8/22

# चालुक्यवंशे ह्येकस्य नाम्नोऽनेके पुरुषाः

अस्ति दक्षिणभारतेऽद्याप्येवंभूता परम्परा यत् पितरः स्वपुत्रपौत्रादीनां नामकरणं स्ववंशपरम्परायै जीवप्रदानाय स्वमान्यानां पूर्वपूरुषाणां नामकरणं कुर्वन्ति। नैषा परम्परद्यतनापि त्वतिप्राचीना। चालुक्यवंशे भवाः बहवोऽपि समाननामानः। तद्यथा—

**विजयादित्यः प्रथमः**

अयं प्रथमो विजयादित्यश्चित्रकण्ठस्य भ्राता। अस्य जन्म ह्ययोध्यायामुत्तर-भारतेऽभवत्। अयं हि भ्रातुर्दुवचनपीडितः दक्षिणं भारतमगच्छत्।

**विजयादित्यो द्वितीयः**

अयं महाप्रतापिनो राज्ञो विष्णुवर्धनस्य पुत्रः प्रथमस्य विजयादित्यस्य पौत्र आसीत्।

**तृतीयो विजयादित्यः**

अयं विजयादित्यः प्रथमाद् विजयादित्यादष्टादशतमः पुरुषो द्वितीयस्य पुलकेशिनः प्रपौत्रः प्रथमस्य विक्रमादित्यस्य पौत्रो विनयादित्यस्य पुत्र आसीत्।

**चतुर्थो विजयादित्यः**

चतुर्थोऽयं विजयादित्यः प्रथमाद् विजयादित्यादेकत्रिंशत्तमः पुरुषः सोमेश्वरस्य प्रथमस्य पुत्र आसीत्।

**विष्णुवर्धनः प्रथमः**

विजयादित्यस्य प्रथमस्य पुत्रो विष्णुवर्धनो हि चालुक्यकूलदीपकोऽभवत्। दक्षिणे भारतेऽनेन चालुक्यपुरुषेण चालुक्यवंशस्य पुनः स्थापना कृता।

## द्वितीयो विष्णुवर्धनः

द्वितीयो विष्णुवर्धनः प्रथमस्य पुलकेशिनः पौत्रः, प्रथमस्य कीर्तिवर्मणः पुत्रो द्वितीय पुलकेशिनः सहोदरश्चासीत्।

## जयसिंहः प्रथमः

प्रथमो जयसिंहः द्वितीयस्य विजयादित्यस्य पुत्रः प्रथमस्य विजयादित्यस्य प्रपौत्रो विष्णुवर्धनप्रथमस्यपौत्रः आसीत्।

## द्वितीयो जयसिंहः

द्वितीयोऽयं जयसिंहः प्रथमाज्जयसिंहात् सप्तमः पुरुष आसीत्। अयं द्वितीयस्य विजयवर्मणः पुत्रः पृथ्वीराजस्य पौत्र आसीत्। अस्य पुत्रः प्रथमः पुलकेशी ह्य भवत्।

## तृतीयो जयसिंहः

तृतीयो जयसिंहो द्वितीयस्य जयसिंहस्य प्रपौत्रस्य कीर्तिवर्मणः प्रथमस्य पुत्र असीत्। अस्य जयसिंहस्य रणरागः प्रपितामहः, प्रथमः पुलकेशी पितामहस्तथा च द्वितीयः पुलकेशी ज्येष्ठभ्रातासीत्।

## चतुर्थो जयसिंहः

चतुर्थो जयसिंहः प्रथमाज्जयसिंहाद् द्वादशतमः, द्वितीयाज्जयसिंहात् षष्ठ-स्तृतीयाज्जयसिंहाच्च द्वितीयः पुरुष आसीत्। अयं प्रथमस्य पुलकेशिनः प्रपौत्रस्तथा च द्वितीयस्य पुलकेशिनः पुत्रः आसीत्।

## पंचमः जयसिंहः

जयसिंहोऽयं प्रथमाज्जयसिंहात् पंचविंशतितमः, द्वितीयाज्जयसिंहाद् विंशतितमः, तृतीयाज्जयसिंहात् सप्तदशमश्चतुर्थाज्जयसिंहाचच षोडशा पुरुष आसीत्। अस्य पिता तैलपद्वितीयस्य पुत्रो दशवर्मासीत्। अयमेव जयसिंहो ह्ययूयणस्य वैमातृको भ्राता, यो ह्ययूयणाद् विद्रोहं कृत्वा राजासनं जग्राह।

## षष्ठो जयसिंहः

षष्ठोऽयं जयसिंहः पंचमस्य जयसिंहस्य पौत्रः प्रथमस्य सोमेश्वरस्य पुत्र आसीत्।

### बालवर्मा प्रथमः

प्रथमजयसिंहस्य पुत्रो बालवर्मा सहि विष्णुवर्धनः प्रथमस्य प्रपौत्रो विजयादित्य-द्वितीयस्य पौत्र आसीत्।

### बालवर्मा द्वितीयः

अयं बालवर्मा द्वितीयस्य जयसिंहस्य पुत्रोऽभवत्। जयसिंहात् प्रथमाद् द्वितीयो जयसिंहः सप्तमः पुरुष आसीत्। प्रथमस्य जयसिंहस्य बालवर्माबुद्धिवर्माणौ पुत्रौ द्वितीयस्य जयसिंहस्य बालवर्मरणरागौ पुत्रावासन्। रणरागस्य पुत्रः प्रथमः पुलकेशी, द्वितीयस्य बालवर्मणो भ्रातृव्य आसीत्।

### विजयवर्मा

विजयवर्मा प्रथमाद् विजयादित्याद् षष्ठः पुरुष आसीत्तथाचायं द्विजीयस्य विजयादित्यस्य प्रपौत्रो जयसिंह प्रथमस्य पौत्रो बालवर्मणः प्रथमस्य पुत्र असीत्।

### द्वितीय विजयवमा

अयं द्वितीयो विजयवर्मा प्रथमस्य विजयवर्मणः प्रपौत्रो, वनराजस्य पौत्रः, पृथ्वीराजस्य पुत्र आसीत्। अयं द्वितीयो विजयवर्मा प्रथमस्य पुलकेशिनः प्रपितामह आसीत्। प्रथमः पुलकेशी द्वितीयस्य पुलकेशिनः पितामह आसीत्।

### पुलकेशी प्रथमः

प्रथमाद् विजयादित्याद् द्वादशतमः पुरुषोऽभवत् प्रथमः पुलकेशी। अयं हि द्वितीयस्य विजयवर्मणः प्रपौत्र आसीत्। प्रथमो कीर्तिवर्मा प्रथमस्य पुलकेशिनः पुत्र आसीत्।

### पुलकेशी द्वितीयः

अयं द्वितीयः पुलकेशी प्रथमाद् विजयादित्याच्चतुर्दशमः पुरुष आसीत्। अस्य पिता कीर्तिवर्मा पितामहः पुलकेशी प्रथमो प्रपितामहोरणराग आसीत्।

### तृतीय पुलकेशी

अयं जयसिंहचतुर्थस्य कनिष्ठः पुत्रोऽभवत्। प्रथमो विक्रमादित्योऽस्य पितृव्यो द्वितीयः पुलकेशी पितामह आसीत्।

### प्रथमः कीर्तिवर्मा–

अयं कीर्तिवर्मा प्रथमस्य पुलकेशिनः पुत्रो द्वितीयस्य पुलकेशिनः पिता तथा

च प्रथमस्य विक्रमादित्यस्य पितामह आसीत्।

**द्वितीयः कीर्तिवर्मा**

अयं द्वितीयः कीर्तिवर्मा प्रथमात् कीर्तिवर्मणः सप्तमः पुरुष आसीत्। प्रथमाद् विक्रमादित्यादयं पन्चमः पुरुषोऽभवत्।

**आदित्यवर्मा प्रथमः**

अयमादित्यवर्मा प्रथमस्य पुलकेशिनः प्रपौत्रो कीर्तिवर्मणः प्रथमम्य पौत्रो द्वितीबस्य पुलकेशिनः पुत्रो विक्रमादित्यप्रथमस्य ज्येष्ठ भ्रातासीत्।

**आदित्यवर्मा द्वितीयः**

द्वितीयस्य पुलकेशिनः पुत्रः प्रथम आदित्यवर्मा, अस्य भ्राता चतुर्थो जयसिंहः तस्य परम्परायां सप्तमः पुरुषो द्वितीय आदित्यवर्मा, अयमेवादित्यवर्मा द्वितीयो विमलादित्य पुत्रः प्रथमो भीम आसीत्। अस्यैव प्रथमस्य भीमस्यापरं नाम आदित्यवर्माभवत्। तैलपो राजास्यैव पुत्र आसीत्। अयं तैलपः प्रथम एव।

**प्रथमो विक्रमादित्यः**

अयं विक्रमादित्यः प्रथमाद् विजयादित्यात् पन्चदशमःपुरुषोऽभवत्। अस्य पिता द्वितीयः पुलकेशी, पितामहः प्रथमः कीर्तिवर्मा, प्रपितामहः, प्रथमः पुलकेशी, चतुर्थो जयसिंहः भ्रातासीत्।

**द्वितीयो विक्रमादित्यः**

असौ द्वितीयो विक्रमादित्यः प्रथमस्य विक्रमादित्यस्य प्रपौत्रो विनयादित्यस्य पौत्रो विजयादित्यतृतीयस्य पुत्र आसीत्। प्रथमाद विजयादित्यादयं ह्यष्टदशतमः पुरुषोऽभवत्। द्वितीयः कीर्तिवर्मास्यैव पुत्र आसीत्।

**तृतीयो विक्रमादित्यः–**

तृतीयो विक्रमादित्यः प्रथमस्य राज्ञस्तैलपस्य पुत्रो भीमस्य पौत्र आसीत्। अयं हि प्रथमाद् विजयादित्याद् त्रयोविंशतितमः पुरुषोऽभवत्।

**चतुर्थो विक्रमादित्यः**

तृतीयो विक्रमादित्यो भीमस्य पौत्रः चतुर्थो विक्रमादित्यस्तु तृतीयस्य विक्रमादित्यस्य प्रपौत्र आसीत्। अयं चतुर्थो विक्रमादित्यः प्रथमाद् विजयादित्यात् षड्विंशतितमः पुरुष आसीत्।

## पन्चमो विक्रमादित्यः

अयं पंचमो विक्रमादित्यो दशवर्मणः पुत्रः, द्वितीयस्य तैलपस्य पौत्रः, चतुर्थस्य विक्रमादित्यस्य प्रपौत्र आसीत्। अयं पंचमो विक्रमादित्यः प्रथमाद् विजयादित्यादेकोन-त्रिंशत्तमः पुरुष आसीत्।

## षष्ठो विक्रमादित्यः

अयं हि षष्ठो विक्रमादित्यः सोमेश्वरपुत्रो जयसिंहपन्चमस्य पौत्रो दशवर्मणः प्रपौत्र आसीत्। अयं हि षष्ठो विक्रमादित्यः प्रथमाद् विजयादित्यादेकत्रिंशत्तमः पुरुष आसीत्।

## मंगलीशः प्रथमः

प्रथमस्य पुलकेशिनः कनिष्ठः पुत्रो ममङ्गलीशोऽस्य ज्येष्ठभ्राता **प्रथमः** कीर्तिवर्मासीत्।

## द्वितीयः मङ्गलीशः

अयं मङ्गलीशो हि चतुर्थस्य जयसिंहस्य पुत्रः, द्वितीयस्य पुलकेशिनः पौत्रः प्रथमस्य कीर्तिवर्मणश्च प्रपौत्र आसीत्।

## भीमः प्रथमः

प्रथमस्य पुलकेशिनः पौत्रो द्वितीयः पुलकेशी, तस्य पुत्रो जयसिंहचतुर्थस्तस्माद्-मङगलेशोमङ्गलेशाद् माणिक्यादित्यस्तस्मान्नरसिंहतस्मात्कतियारः कतियाराद् विमलादित्यः विमालादित्याद् भीमः, असौ प्रथमो भीम एवादित्यवर्मेति नाम्ना सुख्यातोऽभवत्।

## द्वितीयो भीमः

प्रथमस्य भीमस्य पुत्रस्तैलपः, स प्रथमस्तैलपः, तस्माद् विक्रमादित्यः, विक्रमादित्याद् द्वितीयोभीमोऽभवत्।

## प्रथमः अय्यणः

अयमय्यणः प्रथमो हि द्वितीयस्य भीमस्य पुत्र आसीत्। तृतीयो विक्रमादित्योऽस्य पितामह आसीत्।

## द्वितीयः अय्यणः

अयमय्यणद्वितीयःप्रथमाय्यणात् पन्चमः पुरुषोऽभवत्। अस्य ज्येष्ठभ्राता पन्चमो

विक्रमादित्य आसीत्। अस्यैव वंशपरम्पराग्रे प्राचलत्। दशमवर्मास्य पिता सत्याश्रयः पितृव्यश्चासीत्।

## प्रथमस्तैलपः

प्रथमो भीम एव द्वितीय आदित्यवर्मा। भीमस्यास्य पुत्रः प्रथमस्तैलपः। तृतीयो विक्रमादित्योऽस्यैव तैलपस्य पुत्र आसीत्।

## द्वितीयस्तैलपः

विक्रमादित्यतृतीयस्य प्रपौत्रोविक्रमादित्यचतुर्थः, अस्यैव चतुर्थस्य विक्रमादित्यस्य पुत्रो द्वितीयस्तैलपो राजा। द्वितीयस्य तैलपस्य पुत्रौ सत्याश्रयदशवर्माणौ, दशवर्मणः पुत्रो हूयय्यणः।

## तृतीयस्तैलपः

द्वितीयस्य तैलपस्यपुत्रो दशवर्मा, तस्य पुत्रो जयसिंहः पंचमः, तस्मात् सोमेश्वरप्रथमः, तस्य पुत्रो विक्रमादित्यषष्ठस्तस्मात् सोमेश्वरो द्वितीयः, द्वितीयात् सोमेश्वरात्तृतीयस्तैलपो नृपोभवत्।

## प्रथमः सोमेश्वरः

प्रथम सोमेश्वरो हि दर्शवर्मणः पौत्रो जयसिंहपंचमस्य पुत्र आसीत्। षष्ठो विक्रमादित्यो हि प्रथमस्यास्य सोमेश्वरस्य पुत्र/आसीत्।

## द्वितीय सोमेश्वरः

द्वितीय सोमेश्वरः प्रथमस्य सोमेश्वरस्य पौत्रो षष्ठस्य विक्रमादित्य पुत्र आसीत्।

## तृतीयः सोमेश्वरः

तृतीयोऽसौ सोमेश्वरो द्वितीयस्य सोमेश्वरस्य पौत्रस्तथा च षष्ठस्य विक्रमादित्यस्य प्रपौत्र आसीत्।

## चतुर्थः सोमेश्वरः

दशवर्मणः पुत्रो द्वितयः अय्यणः, अस्याय्यणस्य प्रपौत्रो गोविन्ददेवः, अस्य गोविन्ददेवस्य प्रपौत्रः, प्रथमः कामदेवः, अस्यैव कामदेवस्य पुत्रश्चतुर्थः सोमेश्वरः, अयमेव सोमेश्वरः कर्णदेव इत्यपरनाम्नापि सुख्यात आसीत्।

**प्रथम कतियारदेवः**

जयसिंहचतुर्थस्य पुत्रो मङ्गलेशः मङ्गलेशस्य प्रपौत्रः कतियारकः, अस्यैव कतियारदेवस्य प्रपौत्रस्तैलपः प्रथमः।

**द्वितीय कतियारदेवः**

प्रथमाय्यणात् पन्चमः पुरुषो द्वितीयोऽय्यणः, अस्माद् द्वितीयादय्यणाच्चतुर्दशमः पुरुषो द्वितीयाः कतियारदेवः, अय्यणद्वितीयस्य प्रपौत्रो गोविन्ददेवः, गोविन्ददेवस्य प्रपौत्रः कामदेवः, कामदेवस्य प्रपौत्रो हरपालदेवः, हरपालदेवस्य प्रपौत्रस्तुकदेवः, अस्य तुकदेवस्य पुत्रः कतियारदेवद्वितीयोऽभवत्।

**तृतीयः कतियारदेवः**

अयं हि द्वितीयस्याय्यणस्य तृतीयः पुत्र आसीत्।

**चन्द्रदेवः प्रथमः**

अय्यणद्वितीयस्य पुत्रश्चन्द्रदेव आसीत्।

**चन्द्रदेवो द्वितीयः**

अय्यणद्वितीयस्य पुत्रश्चन्द्रदेबः, चन्द्रदेवस्य पौत्रो गोविन्ददेवः, गोविन्ददेवस्य पौत्रश्चन्द्रदेवो द्वितीयः, अस्य पिता बंकिमदेव आसीत्।

**बंकिदेवः प्रथमः**

अय्यणस्य प्रपौत्रो गोविन्ददेवस्तस्य पुत्रो बंकिदेवः, बंकिदेवो द्वितीयस्य चन्द्रदेवस्य पितासीत्।

**द्वितीयो बंकिदेवः**

बंकिदेवप्रथमस्य पुत्रश्चन्द्रदेव द्वितीयः, अस्य पुत्रः कामदेवः, कामदेवस्य पुत्रः सोमेश्वर चतुर्थः, अस्य सोमेश्वरचतुर्थस्य पुत्रः कामदेवः, स एव बंकिदेव द्वितीयः।

**कामदेवः प्रथमः**

बंकिदेबप्रथमस्य पौत्रः कामदेवप्रथमः।

**कामदेव द्वितीयः**

कामदेव प्रथमस्य पौत्रः कामदेव द्वितीयः, अयमेव बंकिदेव द्वितीयोऽपि।

**कामदेवस्तृतीयः**

कामदेवप्रथमस्य सोमेश्वरः कर्णदेवापरनामकस्तथा च नरेन्द्रदेवो व्याघ्रदेवा परनामकः द्वौ पुत्रौ, तयोः सोमेश्वरस्य पुत्रः कामदेवो बंकिदेवापरनामकस्तथा च नरेन्द्रदेवस्यापि पुत्रः कामदेवः। एवमत्र कामदेवत्रयी चालुक्येषु जाता।

**कर्णदेवः प्रथमः**

चालुक्यवंशे चतुर्थः सोमेश्वरः कामदेवस्य पुत्रः कर्णदेवायर नामक आसीत्।

**द्वितीयः कर्णदेवः**

गुर्जरेश्वरः कर्णदेवोऽपि चालुक्यवंशीय एवासीत्। अस्य पुत्रो हरणदेवो, हरणदेवस्य मानकदेवः पुत्रोऽभवत्।

**गोविन्ददेवः प्रथमः**

अयं हि अय्यणस्य प्रपौत्रश्चन्द्रदेवप्रथमस्य पौत्रः हरपालदेवप्रथमस्य पुत्र असीत्।

**गोविन्ददेवो द्वितीयः**

चतुर्थस्य सोमेश्वरस्य पौत्रो द्वितीयो हरपालदेवः द्वितीयस्य हरपालदेवस्य पौत्रो द्वितीयो गाविन्ददेवोऽभवत्।

**प्रथमो हरपालदेवः**

अयं हि द्वितीयस्यय्यणस्य पौत्रश्चन्द्रदेव प्रथमस्य पुत्र आसीत्।

**द्वितीयो हरपालदेवः**

द्वितीयो हरपालदेवः बंकिदेवापरनामककामदेवस्य पुत्रः सोमेश्वरचतुर्थस्य पौत्र आसीत्।

**प्रथमः शक्तिदेवः**

द्वितीयस्य हरपालस्य नारायणदेववीरदेवशक्तिदेवास्त्रयः पुत्राः अभवन्।

**द्वितीय शक्तिदेवः**

द्वितीय शक्तिदेवः वीरदेवस्य पुत्रो हरपालदेवस्य पौत्रश्चासीत्।

**कोण्डिबादेवः प्रथमः–**

प्रथमहरपालाद्द्वितीयो हरपालोऽष्टमः पुरुषः अस्य हरपालस्य पुत्रो नारायणदेवः, तस्य नारायणदेवस्य पुत्रोऽभवत् कोण्डिबादेवः।

**द्वितीयः कोण्डिबादेवः**

प्रथमस्य कोण्डिबादेवस्य पौत्रो द्वितीयः कोण्डिबादेवः, अयं हि तुकदेवस्य पुत्र आसीत्।

**प्रतापरुद्रः प्रथमः**

वीरभद्रेश्वरस्य कन्या मुम्मदाम्बा, सा हि रुद्राम्बायां जाता, रुद्राम्बा शास्त्रविधिना दौहित्रं पुत्रीकृत्य वारङ्गलस्य स्वामिनमकरोत्। असौ एव वीरभद्रेश्वरस्पदत्तकः पुत्रः प्रतापरुद्रनाम्ना विख्यातो महाप्रतापी राजाभवत्।

**प्रतापरुद्रद्वितीयं**

हरपालदेवद्वितीयस्य पुत्रो वीरदेवः, तस्य पुत्रो गोविन्ददेवद्वितीयः, अस्य पुत्रः सुखदेवः, अयमेव प्रतापरुद्रनाम्नापि विख्यातोऽभवत्। अस्य प्रतापरुद्रद्वितीयस्य पुत्रः केशवदेव आसीत्। द्वावपि पिता पुत्रौ 1502 शकवर्षे वारङ्गलस्य युद्धे वीरगतिं गतौ।

एवमुक्त्या पर्यालोचनया विज्ञायते यच्चालुक्यराजवंशपरम्परायां चत्वारो विजयादित्याः, द्वौ विष्णुवर्धनौ, षड् जयसिंहाः, द्वौ बालवर्माणौ, द्वौ विजयवर्माणौ, त्रयः पुलकेशिनः, द्वौ कीर्तिवर्माणौ, द्वौ आदित्यवर्माणौ, षड् विक्रमादित्याः, द्वौ मङ्गलीशौ, द्वौ भीमौ, द्वौ अय्यणौ, त्रयस्तैलपाः, चत्वारः सोमेश्वराः, त्रयः कतियारदेवाः, द्वौ चन्द्रदेवौ, द्वौबंकिदेवौ, त्रयः कामदेवाः, द्वौ कर्णदेवौ, द्वौ गोविन्ददेवौ, द्वौ हरपालदेवौ, द्वौ शक्तिदेवौ, द्वौ कोण्डिबादेवौ द्वौ च प्रतापरुद्रौ राजानोऽभवन् ये च समाननामान आसन्।

# चालुक्यराजाय्यणवंशचरितकाव्ये मुस्लिमाः

**मलिककफूरः**

यादवानां राजा रामदेवस्तस्य पुत्रो हि शङ्करदेव आसीत्। हरपालदेवस्तु चालुक्यानां राजासीत्। दिल्लीशासने मलिककफूरः समासीन आसीच्छक 1390 वर्षे। स हि रामदेवं कर प्रदानाय समादिशत्। रामदेवेन तस्यादेशस्यावहेलना कृता, तत्कारणात् स मल्लिकफूरस्तमाक्रमंत्। प्रथममिदं युद्धं दक्षिणभारते तुरुष्कैः सार्धमभवत्। अस्मिन् युद्धे मलिककफूरो हि रामदेवस्य पुत्रं शङ्करदेवं प्राणदण्डेनादण्डत्। अस्मिन् युद्धे चालुक्यः हरपालदेवो रामदेवस्य सहायक आसीत्। तेन तुरुष्कस्तस्मद्रुष्टोऽभवत्।

**अलाउद्दीनः**

1375 वर्षे अलाउद्दीनो हि गुर्जरेशं कर्णदेवं चालुक्यं समाक्रमत्। अलाउद्दीनेन पराजितः कर्णदेवो यादवानां राज्ञो रामदेवस्य शरणमागच्छत्। हरपालदेवः कर्णदेवस्य साहाय्यमकरोत्, तेन रुष्टः अलाउद्दीनो हरपालदेवस्य भविनीं पत्नीं कमलां गृहीत्वा दिल्लीमनयत्।

**मलिकनजीबः**

1391 शके वर्षे दिल्लीराजधान्या अधिपतेरलाउद्दीनस्य सम्मतः कार्यवाहको मलिकनजीबो यादवानां राजधानीं देवगिरीमाक्रमत्। अस्मिन् युद्धे गुर्जरदेशः कर्णदेव वीरगतिमगच्छत्।

**मुबारकः**

1391 शकवर्षसविधे मुबारको दिल्ली राजधान्या अधीशोऽभवत्। स हि महतीं सैन्यशक्तिमादाय दक्षिणं भारतमुपाद्रवत्। अनेन तुरुष्केण हरपालस्य महतीदुर्दशा कृता—.

मुबारको महावीरो दिल्लीशोऽभूत्तदन्तरे।
महता सैन्यभारेण स दक्षिणमुपाद्रवत्॥
हरपालो वर्षषट्कैरपि तद्राज्य गोपने।
असमर्थोऽभवत्तत्र मुबारकबलार्दितः॥
प्रतिज्ञातन्च साहाय्यमप्राप्य निजमित्रतः।
स घातितः शिखानष्टैर्दुर्दशा मनुभाव्य च॥
अङ्कचन्द्राग्निचन्द्राख्ये शके दुष्टैस्तु तच्छिरः।
मुख्यद्वारे देवगिर्यादुर्गे लम्बितमन्ततः[1]॥

एवमनेन दुष्टेन तुरुष्केण हरपालस्यान्तः कृतः।

### अलाउद्दीनब्रह्मनीशाहः

1428 शकवर्षसविधे अलाउद्दीनब्रह्मनीशाहो हि दक्षिणेभारते शक्तिसम्पन्नोभूत्वा राज्यं संस्थापयामास। नारायणदेवो हरपालदेवस्य ज्येष्ठः पुत्रः, स हि सर्वा राजनीतिकस्थितिमाकलय्य अलाउद्दीनब्रह्मनीशाहस्य पक्षेऽगच्छत्।

समयेऽस्मिन् महानासीद्धाहाकारस्तु दक्षिणे।
स्थापनं प्रथमं तत्र जातं राज्यस्य पापिनाम्॥
भयाक्रान्तोऽभवद्देशः स्वार्थान्धैः समुपस्थितौ।
हिन्दूनां घातनं तेषां धर्मस्य परिवर्तनम्॥
होसालकाकतीयानां पाण्ड्ययादवभूभृताम्।
सुसमृद्धानि राज्यानि नष्टानि कलहान्मिथः॥
हिन्दूनां नाशनैस्तेषां धनराज्यादिलुण्ठनैः।
व्यवस्थारहितैर्रक्तपातैर्दक्षिणमङ्कितम्॥
देवो नारायणो दृष्ट्वा दशां चिन्तासमन्वितः।
अलाउद्दीनब्रह्मनशाहस्य पक्षतां गतः[2]॥

### गयासुद्दीनतुगलकः

खिलजीवंशस्यान्तेऽस्मिन्नेव समये गयासुद्दीनतुगलकः स्वदोर्दण्डशक्तितो दिल्लयां स्वराज्यं संस्थापयामास। ततो मुहम्मदतुगलको दक्षिणापथे स्वराज्यस्यथापनाय प्रायतत[3]।

### अलाउद्दीनहसनः

अलाउद्दीनहसनो ह्यस्मिन्नेव समये ब्रह्मनीशाहशासनात् पृथक् राज्यं दक्षिणभारते समस्थापयत्[4]।

**कम्बरखानः**

अलाउद्दीनस्य सेनापतिः कम्बरखानः, स हि कल्याणीमाक्रम्य स्ववशगामकरोत्। दिवसानां पन्चाशत्तत्र भयङ्करं युद्धमभवत्। अन्ते कम्बरखानस्य विजयोऽभवत्[5]।

**नवाबमहीनुद्दीनः**

अयं तुरुष्कः स्वबलेन कल्याण्याः परितो ग्रामान् जित्वा शासको नवाबोऽभवत्। 1428 शक सविधेऽयं शासक आसीत्[6]।

ख्वाजाजहानमिजीमुन्दारः

अलाउद्दीनब्रह्मनशाहस्य सेनानायकः ख्वाजाजहानमिर्जीमुन्दारो महीनुद्दीन-नवाबकृतविद्रोहप्रशमनव्याजेन प्रेषितः शाहेन कुतुबुल्मुल्कनाम्ना साधम्[7]।

**कुतुबुल्मुल्कः**

अयमलाउद्दीनब्रहमनशाहस्य सेनायाः प्रधानः कुतुबुल्मुलकः ख्वाजाजहान-मिजीमुन्दरस्य नायकत्वे महीनुद्दीननवाबकृतब्याजरूपविद्रोहप्रशमनब्याजेन कल्याण्यां कम्बारीदुर्गे समाक्रान्तौ।

ख्वाजाजहानमिरजामुन्दारो बलमास्थितः।
कुतुबुल्मुल्कनामा च विद्रोह द्रावणाय तौ॥
श्रीनारायणदेवस्य कम्बारीदुर्गकं प्रति।
प्रेषिते सैन्यके ख्वाजाजहानोद्रोहमन्वभूत्[8]॥

**मुहम्मदतुगलकः**

दिल्लीशो मुहम्मदतुगलको हि अस्य समयस्य सविध एवदिवङ्गतः, इति श्रुत्वा दक्षिणे भारते विद्रोहाः सर्वत्रैव प्रसृता अभवन्। दक्षिणापथे समुद्भूतानां विद्रोहाणां प्रशमनाय ब्रह्मनशाहो सामयिकं नयं विचार्य चालुक्यान् स्वपक्षे कृत्वा प्रायतत[9]।

**मुहम्मदः**

अयं मुहम्मदश्चालुक्यानांवातापिदुर्गं जित्वा तत्रस्थः शासकः अवसरमधिगम्य तत्रैव नारायणदेवस्तं हतवान्।

तदा नारायणो देवः कूटनीतिविशारदः।
स्वस्य वातापिदुर्गस्थं जहौ तन्च मुहम्मदम्[10]॥

**शैफुद्दीनघुरी–**

त्रिचलापल्लीविद्रोहस्य प्रशमनान्तरं अलाउद्दीनब्रह्ममनशाहो गुलबर्गराज्यस्य

शासकं शैफुद्दीनघुरीनामानमकरोत्[11]।

**बहरामखानः**

अलाउद्दीनब्रह्मनशाहो बहरामखानं दौलताबाद प्रान्तस्य शासकमरोत्[12]।

**सफदरखानः**

अलाउद्दीनब्रह्मनशाहो राज्यं भागचतुष्टयेषु विभज्य शैफद्दीनघुरीं गुलबर्गे, बहरामखानं दौलताबादे, सफदरखानं बरारे प्रशासकान् न्ययोजयत्। अयं सफदरखानो हि शैफुद्दीनघुरीत्यस्य पुत्र आसीत्।

## हुमायूँ-अजमी

भागेषु चतुःषु राज्यं विभज्य प्रशासनस्य सुदृढ़ीकरणाय अलाउद्दीनब्रह्मनीशाहेन वीदरस्य शासकः कृतो हुमायूँ-अजमी[13]।

**अलाउद्दीनब्रह्मनीशाहः**

ब्रह्मनशाहेन अलाउद्दीनेन राज्यं चतुभार्गेषु विभज्य तत्र प्रशासनस्य दृढभ्करणायात्मनो विश्वस्तान् नीतिज्ञान् वीरान् शैफुद्दीनघुरी-बहरामखान-सफदरखान-हुमायूँ-अजमीनामकान् प्रशासकान् नियुज्य गुलबर्गदौलताबादबरारबीदरप्रान्तान् सुरक्षितान् विधाय गोवाकोंकणप्रदेशान् प्रति समाक्रमणसमारम्भः कृतः।

राज्यं ब्रह्मनशाहेन चतुर्भागे विभज्य च।
चत्वारः स्थापितास्तत्र सुनीतिज्ञाः प्रबन्धकाः॥
सैफुद्दीनघुरीं कृत्वा गुलबर्गे प्रशासकम्।
दौलताबादभागं तु बहरामाख्यखानकम्॥
बरारेसफदरखानं शैफुद्दीनसुतं पुनः।
हुमायूँ—अजमीसंज्ञं वीदरे च न्ययोजयत्॥
एवं विधिविधानेन सुतरां दक्षिणे तदा।
विद्रोहस्तेन नैवासीद् राज्ये तस्य प्रतापिनः॥
पुनः संवर्धनार्थन्च स्वयं राज्यं बहुसेनया।
चचाल कोंकणं गोवां पूर्वं सन्जित्य शत्रुतः[15]॥

एवमनेन तुरुष्केण महता पराक्रमेण कोंकणगोवाकरहाटकोल्हापुरादीनि हिन्दु राज्यानि स्ववशमानीय राज्यविस्तारकमरोत्। परं हि शान्तिरेषा न चिरस्थायिन्यभवद्यतो हि 1434 शकवर्षे पुनस्तत्रेपाद्रवाः युद्धन्चाभवत्[16]। एतैर्ब्रह्मनीशाहस्याक्रमणैस्तु चालुक्यानां महतीक्षतिरभवत्। अतो रुष्टौ नारायणदेवः समस्तान् चालुक्यादीन् संगठितान् कृत्वैकीभूयकोंकणाद्रावयामासुः।

सर्वे सम्बन्धिनस्तस्य मिलित्वा प्रेमभावतः।
चालुक्यकुलरक्षार्थं सम्मानात् तत्कुलस्य च॥
कोंकणाद्भावयामासुः ब्रह्मनस्य सुविस्तृताम्।
चतुरङ्गबलोपेतां पृतनां शक्तिशालिनीम्[17]॥

चालुक्यः पराभूत अलाउद्दीनब्रह्मनशाहः बभलानानरेशस्य परामर्शेण नारायण-देवकर्णदेवाभ्यां 1338 शकवर्षसविधे सन्धिमकरोत्। अस्य ब्रह्मनशाहस्य 1438 वर्षे मृत्युरभवत्[18]।

## मुहम्मदतुगलकः

मुहम्मदतुगलको ग्यासुद्दीनतुगलकस्य पुत्रः स हि हठप्रधानस्वभावोराऽभवत्। असावेव राजधानीं दिल्लीतो दौलताबादेऽनयत्। अनेनादूरदर्शिना मुहम्मदतुगलकनाम्ना स्वर्णमुद्राः प्रचालिताः—

मोहम्मदो महावीरो मदोन्मत्तेऽभवेत्तदा।
चक्रे च स्वर्णमुद्राणां प्रचारः स्वस्य नामतः[19]॥

अस्मात्कार्याद्विरतकरणाय विजयानगराधिपस्तं दूतद्वारासूचयत्। परं धूर्तो मुहम्मदो न विरराम। अतो विजयानगराधिपकन्हैया नामकमुहम्मदयोर्मध्ये 1440 शकवर्षे युद्धमभवत्। अस्मिन् युद्धे कन्हैयानायकस्य चालुक्यानान्च महती क्षतिरभूत्[20]।

## बहादुरखानः

मुहम्मदतुगलकस्य सेनानायकः, स 1440 वर्षीये युद्धे जेताभवत् अस्मिन् युद्धे नारासणदेवस्य पुत्रौ शक्तिदेवगोगीदेवौ वींराणां गतिङ्गतौ[21]।

फिरोजशाहतुगलकः

फिरोजशाहतुगलको हि दिल्लीपतिरासीत् 1443 शकवर्षसविधे[22]।

## मुहम्मदखानः

मुहम्मदतुगलस्य सेनापतिरासीत् अयं विद्रोहिणं दौलताबादस्य प्रशासकं बहरामखानं 1446 शकवर्षे प्राद्रवत्[23]।

## ताजुद्दीन फिरोजशाहः

ताज्जुद्दीनफिरोजशाहो हि ब्रह्मनीराज्यस्य सुलतान आसीत्। अन्य ब्रह्मनीराज्यस्य संस्थापकः अलाउद्दीनब्रह्मनशाहोऽभवत्[24]। अयं हि परथालाकाण्डव्याजेन 1484 शकवर्षे विजयानगरस्योपर्याक्रमणमकरोत्।

**अहमदखानः**

अयमहमदखानो हि ताज्जुद्दीनफिरोजशाहस्य भ्रातासीत्।

**फजुल्लाइंजुः**

1484 शकवर्षे समाक्रमणे फिजुल्लाइंजुनामा तात्जुद्दीनफिरोजशाहस्य सेनानायकः, यः अहमदखानेन सहबुक्कस्योपर्याक्रमण कृत्वा, तं जित्वा, तस्य कन्यां फिरोजाय दापयति स्म[25]।

**हसनखानः**

हसनो हि ताज्जुद्दीनफिरोजशाहस्य पुत्रः, यस्य विवाहो हि स्वर्णकारस्य कन्यया परथालया सकमभवत्[26]।

**हुसेनः जमालुद्दीनसाबुश्च**

हुसेनस्तथा च जमालुद्दीनसाबुः द्वावपि दिल्लीप्रशासनस्याधिकारिणौ, तौ च 1491 वर्षे दक्षिणे भारते निवासर्थं गुलबर्ग प्रदेशमायतुः।

**मुहम्मदअलाउद्दीनः**

ताज्जुद्दीन फिरोजशाहस्य ज्येष्ठः पुत्रो मुहम्मदअलाउद्दीनध्यासीत्[28]।

**जमालुद्दीनहुसेनीमिस्मूदः**

अयं हि जमालुद्दीनहुसेनीमिस्मूदो ब्रह्मनीशाहस्य वंशजस्य मुहम्मद-अलाद्दीनस्य पक्षीय आसीत्[29]।

**खलफहसनः**

खलफहसनो हि आरबीयानामश्वानां व्यापारी वीरवरश्चासीत्। अयं खलफ-हसनोजमालुद्दीनहुसेनीमिस्मूदस्य मित्रं, स मुहम्मअलउद्दीनस्य प्राणरक्षायां जमालुद्दीन-हुसेनीमिस्मूदस्य साहाय्यमकरोत्[30]।

**खान-आसफहसनः**

आसफहसनखानो हि चालुक्यानां साहाय्यं लब्ध्वा 1500 शकवर्षे मुहम्मद-अलाउद्दीनपक्षेण गुलबर्गं समाक्रमत्। अस्मिन् युद्धे ताजुद्दीनफिरोजस्य द्वौ पुत्रौ हसनखानमुबारकखानौ पराजितौ भूत्वा बन्दिनावभवताम्। फिरोजशाहस्तु युद्धे हतः[31]।

**मुबारकखानः**

हसनखानमुबारकखानौ यौ 1500 वर्षे गुलबर्गयुद्धे हतौ तौ ताजुद्दीनफिरोज-शाहस्य पुत्रावास्ताम्[32]।

**अहूमदः**

अहमदोऽयं ताज्जुद्दीनफिरोजशाहस्य पुत्रः, अस्य त्रयो भ्रातरः मुहम्मद-अलाउद्दीनः, हुसेनखानो मुबारकखानश्चान्य आसन्। अयं 1500 शके वर्षे चालुक्यानां साहाय्यनगुलबर्गयृद्धं विजित्य गुलबर्गराज्यस्य शासको भूत्वा हसनखानं मुबारकखानं च बन्दिनौ कृत्वा पितरमदण्डयत्[33]। 1521 शके वर्षे अहमद-अलाउद्दीन रायचूर-गुबगल-बंकापुरसंग्रामान् विजित्य दक्षिणभारते स्वशासनं सुदृढ़मकरोत्। एतेषु युद्धेषु चालुक्यानां हिन्दुनृपाणां च बहु हानिरभवत्[34]।

**दिलावरखानः**

दिलावरखानो हि गुलबर्गोधिपतेरहमदशाहस्य सेनापति 1515 शकवर्षे सुदूरदक्षिणप्रदेशान् जेतुं प्रेषितः[35]।

**मिनुल्लाम्यानः**

अयं नवीनाक्रान्ता बाह्मतस्समागतस्तुरुष्को दक्षिणे भारते राज्यस्थानार्थ प्रयत्नमकरोत्[36]।

**मुहम्मदगवां**

1547 शकवर्षेऽयं बीजापुरस्य सूबेदार-शासक आसीत्[37]।1549 शकवर्षेऽयं गोवानगरस्योपर्याक्रमणमकरोत्[38]। 1550 शकवर्षेऽयं गोवाकर्नाटककोंकणादिभूभागं विजित्योत्सवमकरोत्[39]।

**तृतीयो मुहम्मदशाहः**

ब्रह्मनीवंशीयो वीदरस्य शासक आसीत्[40]।

**अली-आदिलशाहः**

आदिलशाहः अली-अमिलशाहश्चोभौ कम्मोजीनरसोजी-प्रयत्नबाधकावभवताम्[41]।

**बुर्हाननिजामशाहः**

बुर्हाननिजामशाहोऽसौ बीजापुरस्य शासक आसीत्[42]।

**इब्राहीमः**

बीजापुरस्य सेनापतिरासीत्[43]।

**अलीबरीदशाहः**

अयमलीबरीदशाहः 1625 शकवर्षे वीदरस्य अलाउद्दीन ब्रह्मनशाहवंशीयः शासक आसीत्[44]।

**इब्राहीमवादिलशाहः**

1632 शकवत्सरविधेऽयमिब्राहीमवादिलशाहो बीजापुरस्य शासक आसीत्[45]।

**जहाँगीरखानः**

अयं जहांगीरखानस्तुरुष्कः अली-आदिलशाहस्य प्रतिपक्षी[46]।

**कुतुबशाह-इब्राहीमः**

निजामशाह-इब्राहीमस्याप्तः[47]।

**जमीला**

निजामशाह-इब्राहीमस्य कन्या जमीला, तां सः निजाम इब्राहीमाय ददौ[48]।

**सुल्तानः**

राजा शासकः। कुतुबशाह-इब्राहीम-निजामशाह-इब्राहीम-वरीदशाह-इब्राहीम-अलीआदिलशाहा इति चत्वारः सुल्तानाः परस्परं सम्बद्धा आसन्[49]।

**हुसेनमुल्ताजः**

हुसेन मुल्ताजो हि हुसेन-अली-सुल्तानस्य पुत्र आसीत्[50]।

**चाँदवीवी**

इयं चाँदबीबी हुसेन-अली-सुल्तानस्य कन्यासीत्[51]।

**तुरुष्कः**

इस्लामधर्मानुपालकः शिखानष्ट मस्जितदेषु, मृतकस्थानेषु कब्रगाहेषु नमाजादिद्वारा समुपासकः[52]।

**अकबरः**

श्रेष्ठतमो मुगलशासकः, अस्य पिता हुमायूं, पितामहो बाबर आसीत्[53]।

**फारूकी**

खानदेशस्य शासकः[54]।

## सन्दर्भ


1. चालु. राज. 10/29-32
2. चालु. राज. 10/39-43
3. चालु. राज. 10/43-44
4. तदेव 14/49-50
5. तदेव 14/52.54
6. चालु. राज. 10/57-59
7. तदेव 14/59-60
8. तदेव 14/61-61
9. चालु. राज. 10/62-66
10. तदेव 10/70
11. तदेव 10/76
12. चालु. राज. 10/76
13. तदेव 10/77
14. तदेव 10/77
15. चालु. राज. 10/75-79
16. तदेव 10/86
17. चालु. राज. 10/92-93
18. तदेव 10/96
19. तदेव 11/1
20. चालु. राज. 11/11-13
21. तदेव 11/12
22. तदेव 11/21
23. चालु. राज. 11/48
24. तदेव 12/6
25. तदेव 12/9-16
26. चालु. राज. 12/18
27. तदेव 12/31
28. तदेव 12/56-57
29. चालु. राज. 15/58
30. तदेव 12/59-60
31. तदेव 12/64-66

32. तदेव 12/65
33. चालु. राज. 12/65-66
34. तदेव 13/4-8
35. तदेव 13/1
36. चालु. राज. 13/16
37. तदेव 13/24
38. तदेव 13/34
39. तदेव 13/35-43
40. तदेव 13/47
41. तदेव 13/68, 14/1
42. चालु. राज. 14/1
43. तदेव 14/6
44. तदेव 14/7
45. तदेव 14/12
46. तदेव 14/13
47. चालु. राज. 14/22, 50
48. तदेव 14/34
49. तदेव 14/35-46
50. तदेव 14/34
51. चालु. राज. 14/48
52. तदेव 14/62
53. तदेव 14/63
54. तदेव 14/64

# तुरुष्कजनकृतात्याचाराणां स्थालीपुलाकन्यायः

विश्वस्मिन् सर्वेषु देशेषु पुरा प्रायः राजतन्त्रव्यवस्थैव व्यापकरूपेणासीत्। भारते बहवो राजवंशाः शासनारूढा आसन् राज्यायां संख्या प्रभूतासीत्। राज्येषु परस्परं मैत्रीभावस्याभावः प्राय एवासीत्। परस्परं कलहायमानाः राजवंशा नैवातिसमृद्धाः न वा सुस्थिरा अभवन्। राज्येषु परस्परस्य कलहेन किमपि राज्यं नैव पुरषायुः सुखेन शान्त्या च धारितं स्वजीवनम्। द्वितीयसहस्राब्देः प्रारम्भकाल एव भारते तुरुष्कानां प्रवेशोऽभवत्। भारते तुरुष्काणां मूलसंवर्धनस्य कारणं राज्याणां पारस्परिकः कलह एव। भारतीयानामनेकेषां राज्याणां नृपेषु संगठनसौहार्दभावाद् लुण्टाकजीवनजीविनां समागतानां शिखानष्टानां तुरुष्काणां भारते बद्धमूलताभवत्। तैर्लुण्टाकैस्तुरुष्कैः भारते लुण्टनं कुर्वद्भिर्भारतीयसामाजिकराजनैतिकवातावरणस्याकलनं कृत्वा लुण्टाकजीवनापेक्षयाऽत्र सुस्थिरवैभवमयनिरापदजीवनस्य सम्भावना दृष्टा।

अतस्तैरत्र स्वल्यशक्तिव्ययेनादम्योत्साहपराक्रमक्रूरकर्मभिश्च स्वानि राज्यानि संस्थाप्य सुस्थिरा अभवन्।

दक्षिणापथं तु तुरुष्काणां प्रभावेण पूर्वमेव प्रचुरं पीडितमभवत्। तेषां नीतिर्तथाभवद्यथा हिन्दुजनेषु भयं व्याप्तं भवेत्, ते ह्यातङ्कताडिता भवेयुः। एवं भूतायास्तुरुष्कजनसमायाताया अवस्थायान्चत्र 'चालुक्यराजाय्यणवंशचरितकाव्ये' कविना कानिचिदुद्धरणानि वर्णितानि तान्यत्र प्रस्तूयन्ते–

1. दिल्लीसुल्तानस्य सेनानायकः मलिककफूरः, सहि 1390 शके वर्षे देवगिर्याः शासकाद् रामदेवात् करमनवाप्य देवगिर्यामाक्रम्य रामदेवं विजित्य, स्वातङ्कस्य प्रसारार्थं स्वार्थान्धः क्रूरात्मा वृद्धस्य पितुः रामदेवस्य पुरस्तस्य पुत्रस्य शङ्करदेवस्य बधमकरोत्।

मलिककफूरनाम्ना च शंकरोधातितः क्रुधा[1]।

अहो तुरुष्कस्यक्रूरता!

2. दिल्लीशाहो हि अलाउद्दीनो गुर्जरप्रदेशमाक्रम्य चालुक्यं कर्णदेवं विजित्य, तत्र महातकङ्कमकरोत्। तेन भीतः कर्णदेवोदेवगिर्यां रामदेवस्याश्रयमगच्छत्। अस्य कौटुम्बिको भ्राता हरपालोऽपि तस्य सहायतामकरोत्। तेनरुष्टस्तुरूष्कः अलाउद्दीनो नान्दूखारमाक्रम्य कर्णदेवस्य वधं कृत्वा तस्य भाविनीं पत्नीं बलाद् दिल्लीमनयत्।

परन्तु भाविनी पत्नी दिल्लयां नीता तदाक्रुधा[2]। अहो राक्षसी प्रवृत्तिर्हितुरुष्कस्य!

3. 1391 शकवत्सरसविधे मुबारको दिल्लीधीश अभवत्। स हि महतीं सेनामादाय दक्षिणं भारतमाक्रमत्। अस्मिन् आक्रमेण स यादवानां पक्षपातिनो चालुक्यस्य हरपालस्य महतीं दुर्दशां कृत्वा तस्य शिरश्छित्वा देवगिर्याः दुर्गस्य मुख्यद्वार एव तल्लम्बितं तेन। अस्मिन्नेव वर्षे मलिकनजीवो देवगिर्यामेव कर्णदेवस्य प्राणान् गृहीतवान्।

स घातिः शिखानष्टैर्दुर्दशा मनुभाव्य च।
चन्द्राङ्काग्निचन्द्राख्ये शके दुष्टैस्तु तच्छिरः।
मुख्यद्वारे देवगिर्याः दुर्गेलम्बितमन्ततः[3]॥

तुरुष्का एते केवलं शासकाः, शासकाः नाम भयोद्भावकाः, भारतीयानां जनानां हिन्दुशासकानां मनसि तुरुष्कातङ्कमुत्पाद्य तेषां यत्किन्चिद्धनधान्यादिकं, तत्तेभ्य आहरणम्, हिन्दूनां सुस्वरूपाणां कन्यानामपहरणमेवैतेषां शिखानष्टानां वृत्तिरभवत्। एतेषां तुरुष्काणां ये हिन्दुजनाः विरोधमकुर्वन् ते तैराततायिभिर्लुण्ठाकैर्घातिता एवं भयातङ्काभ्यां शामदानाभ्यान्च हिन्दूनां जनानां धर्मस्य परिवर्तनं कृत्वा स्वानुयायिनां संख्यां संवर्ध्य हिन्दुजनानां सर्वस्वलुण्ठनं कृत्वा भारतस्य सर्वप्रकारेण मानमर्दनं[4] कृतम्, निर्बलैर्निस्तेजोभिर्भारतीयैस्तुरुष्कात्याचारप्रचारसमुदयः सह्यतेस्मेति दौर्भाग्यं भारतीयानाम्। भारतीयानां दौर्भाग्यस्य सृष्टा सततमभवत्पारस्परिकः कलहः

सुसमृद्धानि राज्यानि नष्टानि कलहान्मिथः।
हिन्दूनां घातनं तेषां धर्मस्य परिवर्तनम्॥
हिन्दूनां नाशनैस्तेषां धनराज्यादिलुण्ठनैः।
शिखानष्टानां भारते जीवनवृत्तिरेषैवासीत्। अहो भारतीयपौरुषाविडम्बना!

4. दण्डप्रधाना इस्लामसंस्कृतिः, धर्मस्यात्मभूतानां तत्वानां इस्लामधर्मे स्थानं नैव दृश्यते, अहिंसाकरुणादयादिदेववृत्तीनां चर्चैवोपहासस्य विषयः। दक्षिणे भारते तुरुष्कशासनं प्रति समुद्भूते विद्रोहे ब्रह्मनशाहस्तद्विनाशार्थं समुपाद्रवत्[5]। स हि विद्रोहिणां विनाशार्थं, न तु शमनार्थं प्रायतत्। भारतीयैः कृतो विद्रोहो भारतीयानामनधिकार-चेष्टासीदिति दृष्टिस्तुरुष्कस्य शासकस्य। एवंरूपेणाभवन् पाददलिताः भारतीयाः।

5. सन्देशवाहको दूतो नैव दण्डनीय इति राजनीतिः। मुहम्मदकृत-स्वर्णमुद्राप्रचारविरोधप्रकटनाय कन्हैयानायकेन प्रेषितो दूतः स्वागतसत्कारव्याजेन निरुद्धः, अस्मिन् ह्यष्टादशमासकालावकाशे स्वबलं सुदृढ मकरोत्। एवमेते शिखानष्टास्तु सर्वथा राजधर्मशून्यास्यात्मतुष्टिमात्रधर्मा आसन्[6]।

6. आतङ्कवादिन आसन् तुरुष्काः। कन्हैयानायके स्वर्णमुद्रा प्रचारस्य विरोधमभिलक्ष्यीकृत्य मुहम्मदतुगलकः 1440 शकवर्षसविधे कन्हैयानायकमाक्रम्य तस्य पुरतस्तस्य पुत्रं विनायकदेवं बन्दीकृत्य, बन्दिनो विनायकदेवस्य जिह्वामुत्पाट्य, जीवितमेव तं ह्यग्नौन्यक्षिपत्[7]। किं किन्चिदप्यस्ति मानवतायाः गन्धोऽत्र तुरुष्कसंस्कृतौ राजधर्मे वा!

7. अविवेकस्य पराकाष्ठा दृश्यते तुरुष्केषु। बुक्को हि विजयानगरस्य राजा, स हि 1443 शक वर्षे मुहम्मदेन विजितः, उभयोर्मध्ये सन्धिरभवत्, तदनुसारेण बुक्केनाचरितम्। ततः परं स धूर्तो मूर्खश्च मुहम्मदउः विजयानगरकोषागारात् द्रव्यनिष्काषनस्यादेशमकरोत्[8]।

8. मुहम्मदबुक्कयोर्युद्धेऽयं तुरुषकोऽधमश्चतुर्लक्षसंख्यानां हिन्दूनां बालवृद्धनारीणां वधमकारायत्। अत्रैव दुष्टेन मुहम्मदतुगलकेन दशसहस्रसंख्याकाः विद्यापराङ्गताः विद्वांसोऽपि हताः। मुसलमानानामेषां संस्कृतिः[9]।

9. 1500 शकवर्षे अलाउद्दीन-अहमदशाहो हि चालुक्यानां साहाय्येन गुलबर्गप्रदेशस्य सुलतानोऽभवत्। अयमहदशाहः स्वराज्ये समान् देवालयान् भुङ्क्त्वा तत्र तेन मस्जिदभवनानि कारितानि[10]।

10. पुरा युद्धेऽश्वानां महत्वन्त्वतीवासीत्, तत्रारबाश्वास्त्वत्यन्तमहत्त्वपूर्णा आसन्। अरबदेशीयाः अश्वव्यापारिणः देशे-देशो हृयश्वानामापूर्तिमकुर्वन्। अरबीयाः सैयदाः अरबीयाश्वानां व्यापारिणो ब्रह्मनीशाहराज्येऽप्यश्वानामापूर्तिं कृत्वा मूल्यस्यपेक्षा ततः कृता, ततो हि तेसैयदास्तेन घातिताः[11]। एषा वृत्तिस्तु लुण्ठाकानामेव।

11. मुहम्मदगवां 1547 शकवर्षे कोंकणमाक्रम्य शिरकेनरेशं जित्वा तं स्वधर्मपरिवर्तनाय बाध्यमकरोत्[12]। एषैवासीत् संस्कृतिः समेषां तुरुष्काक्रान्तानाम्।

12. अली-आदिलशाहो हि यत्र-यत्रा-क्रमणमकरोत्, तत्र-तत्र समस्तान् हिन्दुदेवालयान् भङ्क्त्वा मस्जिदभवनानि कारयति स्म[13]। नैषाचारपरम्परादिल-शाहस्यैवापि तु समस्तानां मुस्लिमाक्रान्तानामासीत्।

एवमेतैः शिखानष्टैरस्माकं पारस्परिकेर्ष्याद्वेषादिना द्वेधीभावाल्लाभं लब्ध्वा भारतदेशतः प्रभूताः सम्पत्तयः स्वदेशे नीताः, असंख्याः जनाः कालगालसमर्पिताः, धर्मो ध्वंसितः धर्मग्रन्थाः भर्जिताः लज्जावतीनां लज्जा च पाददलिता। वयं केवलं दृष्टारः।

## सन्दर्भ


1. चालु. राज. 10/16-17
2. तदेव 10/23
3. चालु. राज. 10/30-31
4. चालु. राज. 10/39-42
5. तदेव 10/64
6. चालु. राज. 11/1-8
7. तदेव 11/16-17
8. तदेव 11/28
9. चालु. राज. 11/36, 39
10. तदेव 13/13
11. तदेव 13/14
12. चालु. राज. 13/18
13. तदेव 14/69

# उपसंहारः

भारतीयानामैतिहासिकमन्तरिक्षमतिप्रकाशपुंजपरिपूरितजाज्ज्वल्यमानैरनेकैर्ग्रहनक्षत्रभूतैर्महामानवसम्भूतिस्थलैः कुलैः पूतं परिपूर्णञ्चापि वर्तते। कुलानां वंशानां वा मनुरेव समुत्सः। भारते हि पुरातनौ सूर्यचन्द्रवंशौ। मनुः सूर्यस्य पुत्रस्तथा च चन्द्रो ह्यत्रेः पुत्र आसीत्। सूर्यवंशेत्विक्षाकुवंशो रघुवंशश्च प्रसिद्धौ वंशावभवताम्। चन्द्रवंशे सोमवंशे वा पुरुवंशयदुवंशौ प्रसिद्धौ, पुरुवंशात् कौरवपाण्डवप्रशाखे, ततस्तु पाण्डवप्रशाखायां कश्चित् चालुक्यानामधेयो राजाभवत्। ततः प्रचलितावंशप्रशाखा चालुक्यवंशोऽभवत्। अस्मिन् काव्ये प्रदर्शितायां वंशपीठिकायां चालुक्यनामको न कोऽपि प्रदर्शितः पुरुषस्तथापि काव्ये सुदीर्घा, चालुक्यपरम्परा, या चाति महिमाशालिनी कविना प्रदर्शिता महता गौरवेण। सोमपरम्परायांपाण्डववंशपरम्परा, तस्यामत्र राजा तूदयनोऽन्तिमं नाम। अयं स एवोदयनः, यो हि अवन्तिसुन्दरी वासवदत्तं जहार। वत्सराजोऽयमुदयनस्तथा चावन्तिसुन्दरी स्वप्नवातवदत्ता पुरातनमहाकवेभासस्योभौ प्रियौ पात्रौ साहित्यसर्जने। कालीदासोऽपि वासवदत्तामवन्ति सुन्दरीं वत्सराजमुदयनञ्च मेघादूते सादरं सस्मार।

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वादिद्दष्टामनुसर पुरीं श्रीविशालां विशालाम्।
स्वल्पीभूते सुपरिचतफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खाण्डमेकम्[1]॥
कालीदासः महाकविं मासमपि सादरं सस्मार।

प्रथितयशसां भासमौल्लिकविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्तमानस्य कवेः कालीदासस्य कृतौ बहुमन्यमानः[2]।

कालनीदासात् पूर्वो भासः, भासस्य स्थितिकालो हि 500 ई. पूर्वमितीतिहासज्ज्ञाः मन्यनते अतो हि वत्सराजोदयनस्य समयो हि कवेः भासस्य पूर्वमेव। अस्मिन् चालुक्यराज-अय्यणवंशचरितमहाकाव्ये प्रथमो विजयादित्यः, यो हि भारते ह्युत्तर-भारतस्थिताया अयोध्यायाः नरपतेः पुत्रश्चित्रकण्ठस्य भ्राता चासीत्।

अयं हि प्रथमो विजयादित्यः भ्रातुश्चित्रकण्ठस्यारुन्तुदैर्वचनैः भृशं पीडितः, अयोध्यां त्यक्त्वा दक्षिणापथं जगाम। तत्र दक्षिणापथे—

रामवेदाब्जसंख्याके शके चौवलिनामके।
ग्रामे निवतिं चक्रे श्रीमहेश्वर सन्निधौ[3]॥

ह्यसौ विजयादित्यः प्रथमः 143 शकवत्सरे श्रीमहेश्वरसन्निधौ चौवलिनामके ग्रामे निवसतिं चक्रे। 143 शकवत्सरे प्रथमस्य विजयादित्यस्य स्थितिरासीत्। उदयनादयं प्रथमो विजयादित्यः षष्ठितमः पुरुष आसीत्।

एकोनषष्ठिराजानोऽभवन्नुदयनात् परम्[4]।

विंशतिवर्षात्मिका पीढ़िः (वंशधरपुरुषस्थानं) भवति। एवं 59 × 20 = 1180 पूर्वं स्थितिरासीदुदयनस्य प्रथमाद् विजयादित्यात्। अतः 1150-143 =1107 शक. पू. वत्सराज उदयनस्य कालः 1028 ई. पू. भवेदिति। 1028 वर्षाणां मध्ये जातेषु राजसु एव यत्र कुत्र कालविन्दौ चालुक्यनामभाक् सोमवंशे राजाऽभवत्। पुराणेषु प्रसिद्धश्चालुक्यवंशो ह्यस्य 'चालुक्यराज-अय्यणवंशचरितमहाकाव्यस्य' वर्ण्यो विषयो विद्यते। अस्माद्राज्ञश्चालुक्याद् भवाश्चालुक्याः, एवमस्मात् प्रचलिता कुलपरम्पैव बहुकालं यावद् भारते राज्यमकरोत्। चालुक्यराजवंशस्य समकक्षराज-वंशाश्चानेकेऽभवन्। तत्र पल्लवराष्ट्रकूटनलकदम्बहैहययादवादिराजवंशाः प्रसिद्धा आसन्। एभिः सह चालुक्यवंशस्य सम्बन्धा अप्यासन्। चालुक्यकुलशासनकाले भारते पल्लवराष्ट्रकूटमगधमद्रकवङ्कलिंगकेरलद्रमिलमूषकगाङ्गपाण्डयचोलया-चालुकलाटकान्यकुब्जमालवगुर्जरकोशलकावेरकालभ्रविलहैहयसिन्धुपान्चालचेदि-कामरूपगौडकुन्तलदर्शार्णान्र्णान्ध्रावन्तिकुरुद्रविडखशाभीरयादवबर्बरमरूनेपाल-वराटकहाटकश्मीरप्रभृतीनि राज्यानि आसन्।

## सन्दर्भ

1. पूर्वमेघे-32
2. मालविकाग्निमित्र
3. चालु. राज. 2/4
4. चालु. राज. 1/62

# पुस्तकसूची


1. चालुक्यराजअय्यणवंशचरितकाव्यम्
2. काव्यप्रकाशः
3. भामहकृत काव्यालङ्कारसूत्रम्।
4. काव्यालंकारसूत्रम्।
5. काव्यालंकारः।
6. वाग्भट्टालंकारः
7. हेमचन्द्रालंकारः
8. विद्यानाथस्य प्रतापरुद्रयशोभूषणम्
9. काव्यादर्शः
10. काव्यमीमांसा
11. साहित्यदर्पणः
12. रसगंगाधरः
13. अमरकोषः।


●●●